No. १०६०-घ

Title परमहंसधर्म संग्रह

Author विश्वेश्वर सरस्वती

Extent ११५ Age

Subject धर्मशास्त्रम्, अपूर्णम्

नं० १०७० — घ

परमहंसधर्मसंग्रहः (धर्मशास्त्रम्)

पत्राणि ११५/१२५ (अपूर्णम्) ~~प० १२५~~ ११५/१२५

नं० १०७० — घ

पत्राणि

यति धर्म समुच्चय

कर्त्ता विश्वेश्वर सरस्वती

[illegible]

[illegible] १२५

[illegible]

[illegible] १०

[illegible] ११५

ॐ॥ श्रीनमो गणेशाय॥ प्रणम्य विष्णुमात्मानं सच्चिदानंदमुक्तिदं॥ गुरुं सर्वज्ञमाप्य श्रीशं माय
याधृतविग्रहं॥ विश्वेश्वरसरस्वत्या क्रियते वेदमाननत्॥ यतः परमहंसस्य धर्माणामेष
संग्रहः॥ तत्र संन्यासाश्रमकालनिर्णयः॥ जबालश्रुत्या विहितः॥ ब्रह्मचर्यं समाप्य गृ
ही भवेत्॥ गृही भूत्वा वनी भवेत्॥ वनी भूत्वा प्रव्रजेदित्याश्रमसमुच्चयः॥ तथा व्यवस्थिता
विकल्पोपि। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति। अव्यवस्थितविकल्पोपि॥
गृहाद्वा वनाद्वेति॥ आरुणेयोपनिषदि च। गृहस्थो ब्रह्मचारी वानप्रस्थो वा लौकि
काग्नीनुदराग्नौ समारोपयेदिति॥ तथा कुटीचरको ब्रह्मचारी कुटंबं विसृजेद्दंडं
लोकाग्नीन्विसृजेदिति। कुटीचरबहूदकसंन्यासीनां पारमहंस्यं विहितं॥ जाबा
लश्रुत्या॥ त्रिदंडं कमंडलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्स

र्वैं भूः स्वाहेति अप्सु परिस्च्य ज्यात्मानमन्विछेत् इति ॥ आरुण्युपनिषदि ॥ वेदार्थायाविद्वान्सो
पनयनादूर्ध्वं सतानि प्राग्वा त्यजेत् पितरं पुत्रमग्न्युपवीतं कर्म कलत्रं चान्यदपि इति ॥ स्मृतौ
च ॥ अनुष्ठानकर्माणि हियकामयित ततदारभेत यमिच्छेत् प्रभाव सेदिति ॥ अंगिराः ॥ वनवासाद्य
रिश्रांतः प्रव्रजेद्विधिपूर्वकं ॥ व्याध्याविष्टो विरक्तो वा ब्रह्मवित्संन्यसेद्द्विजः ॥ संन्यसे
द्ब्रह्मचर्याद्वा संन्यसेद्वा गृहादपि ॥ वनाद्वा संन्यसेद्विद्वानातुरो वाथ दुःखितः ॥ आतु
राणां विशेषोस्ति न विधिर्नैव च क्रिया ॥ प्रैषमात्रं तु संन्यासमातुराणां विधीयते ॥ य
दा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु ॥ तदा संन्यासमिच्छंति पतितः स्याद्विपर्यये ॥ यमः
॥ यीक्षे वेदव्रतो विद्वान् ब्राह्मणो मामिमाश्रयेत ॥ समः सर्वेषु भूतेषु चरेषु स्थावरे

2 षुच।उत्पन्नज्ञानविज्ञानाविराग्यंपरमेगतः॥प्रव्रजेद्ब्रह्मचर्याद्वायदीछेत्परमांगतिं।ज्ञा
तपुत्रोगृहस्थोवाविदितात्माजितेंद्रियः॥याज्ञवल्क्यः॥अधीतवादोजपकृत्पुत्रवान
न्नादाग्निमान्।शक्त्याचयज्ञकृन्मोक्षेमनःकुर्यात्तुनान्यथा॥मनुः॥कषायंपाचयित्वातु
श्रेणीस्थानेषुचत्रिषु।प्रव्रजेत्तुपरंस्थानंपारिव्राज्यमनुत्तमं।इत्यादिसर्ववाक्यप
र्यालोचनायामयमर्थोवगम्यते।अध्ययननियोगनिवृत्त्यनंतरकालेयस्यपुरुषस्यय
स्यामवस्थायांविराग्यंजायते।तस्यततएवसंन्यासाधिकारइति॥तथाचश्रुतिस्मृती॥य
दहरेवविरजेत्तदहरेवप्रव्रजेदिति॥कात्यायनः॥ब्रह्मचर्यात्गृहाद्वापिवनाद्वासंन्य
सेद्बुधः।पुत्रेषुभार्यांनिक्षिप्यमृतपत्नीकएववा॥व्यासः॥ब्रह्मचारीगृहस्थोवावान

मि

प्रसक्तो यद्वा पुनः। विरक्तः सर्वकामेभ्यः पारिव्राज्यं समाश्रयेत्। यावद्वर्णविभागोस्ति याव
द्वेदः प्रवर्त्तते। तावत्न्यासोग्निहोत्रं च कर्त्तव्यं तु कलौ युगे॥ विष्णुपुराणे॥ यत्कृते दशा
भिर्वर्षैस्त्रेतायां हायनेन तत्। द्वापरे तत्तु मासेन अहोरात्रेण तत्कलौ॥ तपसो ब्रह्मच
र्यस्य जपादेश्च फलं द्विजाः। प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितं॥ इति कल
वल्पेन कालेन ब्रह्मचर्यस्य जपादेरधिकं फलं वदन् ब्रह्मचर्यादिप्रधानस्य पारिव्रा
ज्यस्य कलावनुष्ठेयत्वं सूचयति॥ मनुः॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निव
शयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः। अधीत्य विधिवद्वेदान् पुत्रांश्चोत्पा
द्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्॥ यस्य दृष्टानुश्रविकविष

3

ण्यष्वादावच्च विरागं न जायते स एतत्सर्वं यथाशास्त्रं कृत्वा संन्यासं न्नान्यथेति श्लोकद्वयार्
थः। अन्यथा ब्रह्मचर्याद्देव प्रव्रजेद्दित्यादि प्रत्यक्षवेदवचनविरोधस्तदप्रामाण्यप्रसंगात्
व्रजन्त्यध इति मोक्षादर्वाक्तु स्वर्गलोकादिषु प्रवर्त्तन्तेत्यर्थः॥ नहि कल्याणकृत्कश्चिद्दु
र्गतिं तात गच्छतीति भगवद्वचनात्॥ अनाश्रमिणामपि जाबालश्रुत्या संन्यासो विहितः।
अथ पुनरव्रती वा व्रती वा स्नातको वास्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजे
त्तदहरेव प्रव्रजेत्॥ तथा॥ यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्॥ सौरपुराणे॥ यदा म
नसि विरागं जायते सर्ववस्तुषु। तदैव संन्यासेद्विद्वानन्यथा पतितो भवेत्॥ बृहस्प
तिः॥ यस्मिन् कामाः प्रविशन्ति विषयेभ्योपसंहृताः। विषयान्न पुनर्याति स कैवल्या
श्रमे वसेत्॥ यस्मिन्क्रोधः शापं याति विफलः सम्यगुत्थितः। आकाशमिव यथाक्षिप्तः स कैव

॥३॥

न्याश्रमवासतः॥ अंगिराः॥ उत्पन्ने संकटे घोरे चोरव्याघ्रादिगोचरे। भयभीतस्य संन्यास
मंगिरा मुनिरब्रवीत्। विरक्तः संन्यसेद्विद्वाननिष्ठापि द्विजोत्तमः। प्रकर्तुमप्यशक्तोपि जु
ह्वाति यजति क्रियाः। अंधः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः। सर्वेषामेव वैराग्यं सं
न्यासेनु विधीयते॥ पतत्येवाविरक्तोयः संन्यासं कर्तुमिच्छति। पुनर्द्दारक्रियाभावात्म्
तभार्यः परिव्रजेत्॥ पाराशरः॥ पारिव्राज्यं तु विरागस्य कर्तव्यं विधुरादिभिः। विधिनातत्र
कुर्वीत संन्यासमिह बुद्धिमान्॥ बृहस्पतिः॥ संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया।
प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः॥ अत्रिः॥ न तावन्मुच्यते दुःखाज्जन्ममृत्योश्च
बंधनात्। यावन्न धारयेद्विप्रो विष्णवं लिंगमादरात्॥ विष्णुः॥ मुखजानामयं धर्मो वै
ष्णवं लिंगधारणं। बाहुजातोरुजातानां नायं धर्मो विधीयते॥ व्यासः॥ परमात्मनियोग

क्तो विरक्तो परमात्मनि। सर्वैषणाविनिर्मुक्तः स भिक्षां भोक्तुमर्हति॥ यस्मिन् क्षान्तिः स
मः शौचं सत्यं संतोष आर्जवं। अकिंचनमदंभं च स केवल्याश्रमे वसेत्॥ यदा न कुरुते भा
वं सर्वभूतेषु पापकं। कर्मणा मनसा वाचा तदा भवति भिक्षुकः। पूजितो वंदितश्चै
व सुप्रसन्नो भवेद्यथा॥ तथा चेत्ताड्यमानस्तु तदा भवति भिक्षुकः॥ क्रतुः॥ अहमे
वाक्षरं ब्रह्म वासुदेवाख्यमव्ययं। इति भावो ध्रुवो यस्य तदा भवति भिक्षुकः॥ संव
र्तः॥ भावितैः करणैश्चायं बहुसंसारयोनिषु। आसादयति शुद्धात्मा मोक्षं वै च
तुर्थाश्रमे॥ सुमंतुः॥ आपत्काले तु संन्यासः कर्तव्य इति शिष्यते॥ जरयाभिपरी
तेन शत्रुभिर्व्यथितेन च। आतुराणां च संन्यासे न विधिर्नैव च क्रिया। प्रेषमात्रं
समुच्चार्य संन्यासं तत्र कारयेत्॥ संन्यस्तोऽहमिति ब्रूयात् सवनेषु त्रिषु क्रमात्।३

न्वारोसुत्रिलोकात्माशुभाशुभविशुद्धये। यत्किंचिद्बंधकं कर्म कृतमज्ञानतो मया। प्रमा
दालस्यदोषाद्यत्तत्सर्वं संन्यजाम्यहं। एवं संचिंन्य भूतेभ्यो दद्यादभयदक्षिणां। पद्भ्यां क
राभ्यां विहरन्नाहं वाक्कायमानसैः। करिष्ये प्राणिनां हिंसां प्राणिनः संतु निर्भयाः॥ इ
त्यातुराणां संन्यासे संकल्पसावित्रीप्रवेशनपाणिहोमप्रैषोच्चारणाभयदानानि विहि
तानि॥ गीतासु॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते॥ योगारूढस्य तस्यैव शमः का
रणमुच्यते॥ व्यासः॥ प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं। तस्मात् ज्ञानं पुरस्कृत्य सन्य त्र
सेदिह बुद्धिमान्॥ मनुः॥ दशलक्षणकं धर्ममनुतिष्ठन्समाहितः। वेदांतान् विधिवच्छ्रु
त्वा संन्यासेदनृणो द्विजः॥ जाबालः॥ संन्यासं निश्चयं कृत्वा पुनर्न च करोति यः। स कुर्यात्कृ
च्छ्रमश्रांतं षण्मासान् प्रत्यनंतरं। संन्यासं पातयेद्यस्तु पतितं न्यासयेत्तु यः। संन्यासविघ्नक

5 र्त्तौ चक्रीनिता न पतिता न विदुः॥ दक्षः॥ तस्माद्यक्ककषायेण कर्त्तव्यं दंडधारणं। इतरस्तु न
शक्नोति विषयैरपहीयते॥ अनधिकारी॥ आरूढपतितापत्यं कुनखी श्यावदंतकः॥
क्षयी व्यंगता गविकल्लो न तु संन्यासमर्हति। संप्रत्यवसितानां च महापातकिनां तथा। व्रात्या
नामभिशस्तानां संन्यासं नैव कारयेत्॥ व्रतयज्ञतपोदानहोमस्वाध्यायवर्जितं। सत्य
शौचाश्रमभ्रष्टं संन्यासं नैव कारयेत्॥ बृहस्पतिः॥ अतितान्नस्मारद्भोगान्तथानागता
नपि। प्राप्तांश्च नाभिनंदेद्यः स कैवल्याश्रमे वसेत्। अध्यात्मनेतपः शौचं यस्य वित्तं
चतुष्टयं। मरणं चाद्वितीयस्य स कैवल्याश्रमे वसेत्॥ अंतस्थानींद्रियाण्यंतर्बहिष्ठानि
विषयान्बहिः। शक्नोति यः सदा कर्त्तुं स कैवल्याश्रमे वसेत्॥ व्यासः॥ यान्यतान्यानिज
न्मानि तेषु नूनं कृतं भवेत्। यत्कृत्यं पुरुषेणेह नान्यथा व्रह्मणि स्थितिः॥ तामासाद्य नुमु

कृस्य दृष्टार्थस्यातिपाक्षितः। त्रिष्वाश्रमेषु कावर्थो भवेत्परमभीप्सतः। इत्यादिना विदुषो
ब्रह्मणि स्थितस्य पारिव्राज्यं दर्शितं। बह्वृचपरिशिष्टे॥ यथोक्तचारिणं सिद्धं गुरुस्तत्कं परि
गृह्य तु। यतिवेषादिरनुज्ञातो मोक्षाश्रममुपाश्रयेदिति॥ अथ संन्यासविधिः॥ तत्र बोधायनः
॥ अनाश्रमी चतुर॥ कृच्छ्रानात्मशुध्यर्थं विदध्यादाश्रमी तप्तकृच्छ्रमेकमिति। कृच्छ्रानिति
प्राजापत्यकृच्छ्रान्॥ तथा च बह्वृचपरिशिष्टे॥ मुमुक्षुरात्मशुद्धये एकं तप्तकृच्छ्रं कृत्वाना
श्रमी चतुरः प्राजापत्यानिति। अनेन कृच्छ्राचरणेनात्मशुद्धिद्वारा संन्यासयोग्यता भवति॥
॥ तथा च स्मृत्यर्थसारे॥ कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी। आश्रमी च तप्तकृच्छ्रं ततना
सो योऽपतां व्रजेदिति। प्राजापत्यलक्षणं मनुनोक्तं॥ त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचि
तं। त्र्यहं परं तु नाश्नीयात्प्राजापत्यो यमुच्यते इति॥ याज्ञवल्क्यः॥ एककभक्तेन नक्तेन तथैवा

याचितनच॥ उपवासेनाचेवायेपादकृच्छ्रः प्रकीर्त्तितः। यथाकथंचित्त्रिगुणः प्राजापत्या
पमुच्यते॥ वसिष्ठः॥ अहःप्रातरहर्नक्तमहरेकमयाचितं। अहःपराकं तत्रैवमेवंचतुर
ह्नोपरो इति॥ पराकउपवासः॥ एकभक्तं नक्तमयाचितं उपवास इति त्रिरावृत्त्या द्वाद
शादिनसाध्यः प्राजापत्यः अत्र च ग्राससंख्यानियमः पराशरेण दर्शितः। सायं तु द्वादशग्रा
साः प्रातः पंचदशः स्मृताः। चतुर्विंशतिरयाच्याः परं निरसनं स्मृतमिति॥ आपस्तंबेन
न्वन्यथोक्तं॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः। चतुर्विंशतिः स्मृताः॥
चतुर्विंशतिरयाच्याः परं निरसनास्त्रयः॥ कुक्कुटांडप्रमाणं स्तु यथावास्यविशेन्मुख
मिति॥ अनयोश्च कल्पयोः शक्त्यपेक्षो विकल्पः॥ तप्तकृच्छ्रमाह॥ याज्ञवल्क्यः॥ तप्तक्षी
रघृतांबूनामेकैकं प्रत्यहं पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः। मनुनानु

द्वादशरात्रनिर्वर्त्योभिहितः। तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहं पिबेदुष्णा
न् सकृत्स्नायी समाहित इति क्षीरादिपरिमाणं पराशरेणोक्तं द्रष्टव्यं॥ अपां पिबेत्तु त्रिपलं द्वि
पलं तु पयः पिबेत्॥ पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुतमिति॥ त्रिरात्रं चोष्णमारुतमि
ति त्रिरात्रस्य पूरणमुष्णोदकवाष्पं पिबेदित्यर्थः। कृच्छ्रादिषु च स्नानं साधारणमितिकर्तव्यता
॥ मनुनोक्ता॥ महाव्याहृतिभिर्होमः कर्तव्यः स्वयमन्वहं। अहिंसा सत्यमक्रोधमार्जवं च समा
चरेत्॥ त्रिरह्नस्त्रिर्निशायां तु सवासा जलमाविशेत्। स्त्रीशूद्रपतितांश्चैव नाभिभाषेत क
र्हिचित्। स्थानासनाभ्यां विहरन्नक्रोधश्च शयीत वा। ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्च
कः। सावित्रीं च जपेन्नित्यं पवित्राणि च शक्तितः। सर्वेष्वेव व्रतेष्वेवं प्रायश्चित्तार्थमादृत इति
॥ प्राजापत्यक्रियाशक्तो धेनुं दद्याद्द्विजोत्तमः। धेनोरभावे दातव्यं मूल्यं तुल्यं न संशय इति

संपूर्णदानाशक्तावथानुकल्पमाह ॥ गवामभावे निष्क्रयस्तत्तदर्द्धं पादमेव चेति । प्रत्याम्नायांतरम
7 प्याह अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते ॥ पराशरः
॥ कृच्छ्रायुतं च गायत्र्या उपवासस्तथैव च । धेनुप्रदानं विप्राय सममेतच्चतुष्टयमिति ॥ तथा षड्त्रिंश
न्मते ॥ कृच्छ्रायुतं च गायत्र्या द्वादश ब्रह्मभोजनं । तिलहोमसहस्रं च सममेतच्चतुष्टयमिति ॥
तथा ॥ धेनुर्निष्कस्तदर्द्धार्द्धं प्राणायामशतद्वयं । तिलहोमसहस्रं च वेदाध्ययनमेव च । विप्रा द्वा
दश वा भोज्याः पावकेष्टिस्तथैव चेति । तत्र कृच्छ्रं तु प्राजापत्यं द्वयं प्रत्याम्नायकल्प्यं । मुख्यक
ल्पे समर्थेन चानुकल्पो न स्वीकर्तव्यः ॥ तथा च मनुः ॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्त्ते
त । न सांपरायिकं तस्य दुर्मतेर्विद्यते फलमिति ॥ कात्यायनः ॥ कुर्यात्कृच्छ्राणि चत्वारि संन्यासे
ष्वनाश्रमी । आश्रमी कृच्छ्रमेकं तु कृच्छ्रं वा संन्यासमर्हति । उक्तपुरश्चरणमादौ कृत्वा शुद्धे ॥७॥

नकायेनाष्टौ श्राद्धानि निर्वपेदिति ॥ अत्रिः ॥ देवमार्षं तता दिव्यं मानुष्यं भौतिकं ततः । पितॄणा
दिव्यमातॄणामात्मनो वृद्धितत्परं ॥ शौनकः ॥ देवं चैवार्षकं चैव दिव्यमानुष्यमेव वा । भूतश्रा
द्धं पितृश्राद्धं मातॄणामात्मनस्तथा । एकैकस्मिन् दिने कुर्यादाह्निकं श्राद्धमर्थवत् । नांदी
मुखविधानेन विधिरेषां प्रकीर्त्तित इति । स एवादेवादि श्राद्धेषु देवता आह वसवो वा
ष्टौ सप्त तास्सप्त रुद्रा द्वा एकादश चापि च तथैव द्वादशादित्या दिवश्राद्धे तु देवताः । मरीचिरत्र्यंगि
रसो पुलस्त्यः पुलहः क्रतुः । प्रचेताश्च वसिष्ठश्च आर्षे यभृगुनारदौ ॥ दिव्ये हिरण्यगर्भश्च
विराजपतिरेव च सनकश्च सनंदश्च तृतीयश्च सनातनः ॥ कपिलश्चासुरिश्चैव वोढुः पंच
शिखस्तथा । एते मानुष्यके श्राद्धे मनुष्याः सम देवताः । पृथिव्यापस्तथा तेजो वायुराका
शमेव च ॥ एतानि पंचभूतानि भूतश्राद्धे तु देवताः । पितृश्राद्धे कव्यवाडनलः सोमार्यमा तथा

॥अग्निष्वात्ता बर्हिषदः सोमपाश्चैव देवताः॥गौरी पद्मा शची मेधा सावित्री विजया ज-
या देवसेना स्वधा स्वाहा मातृश्राद्धेषु देवताः॥आत्मश्राद्धे देवतानु परमात्मा प्रकीर्त्तित
इति॥अत्रिः॥कर्त्ता निरग्निश्चेत् । लौकिकाग्नौ तदा कुर्यात् श्राद्धार्थं पचनादिकं । पूर्वे-
द्युस्तदहर्वापि श्राद्धे विप्रान्निमंत्रयेत् । स्नात्वानुसंस्कृतं पाकं हविष्यं स्वादुभोजनं ।
हृदि यज्ञेश्वरं ध्यायेद्देवं नारायणं प्रभुं । आरंभे सर्वकर्माणि स्नानादीनि विधानतः
तर्पयेदंभसा स्नात्वा मंत्रपूर्वं द्विजोत्तमः । देवान्ऋषीन्मनुष्यांश्च भूतानि च यथाक्रमं । तर्पयि-
त्वांभसा सर्वान् पुनः श्राद्धेन तर्पयेत् । पार्वणं च तथा वृद्धश्राद्धं कुर्याद्यथाविधि । दत्वा-
नांदीमुखेभ्यश्च पिंडानक्षतसंयुतान् श्राद्धदेवान्नमस्कृत्य यथोक्तं श्रुतिशासनात् ।
तत्राष्टानुक्रमाद्द्वावावसा । वायप्रजापतिः हिरण्यगर्भो थ विराडात्मा देवे समस्पतु ।

आर्षे मरीचिप्रमुखा दिव्ये च विनतात्मजः । स्कंदप्रजो चेतास्त्वात्मा मानुषे सनकादयः । कव्य
वाहमुखाः पित्र्ये मातृके दिव्यमातरः । युग्माः सुदैवपूर्वेषु ब्राह्मणो देववद्विधिः ।। एकैको
मंत्रवासिंडादेय स्मृत्यामिथापरः । सर्वमंत्रेषु कर्त्तव्यं नांदीमुखविशेषणं । उक्त्वैवं ततो
विद्वान् हृष्टपुष्टेन चेतसा । प्रदक्षिणं ततः कृत्वा नमस्कृत्य द्विजोत्तमान् । इदं तव्यमिति ता
न्ब्रूयात् प्रणम्य शिरसा नतः । सन्यार्थं मया श्राद्धं कृतमेतद् द्विजोत्तमाः । अनुज्ञां प्राप्य यु
ष्माकं सिद्धिं यास्यामि शाश्वतीं ॥ दत्तात्रेयः ॥ दिव्यार्षमानुषं भूतं पितृमातृ स्वयंभूवं । श्राद्धं परा
त्मनः कृत्वा वृद्धो चापि चतुष्टयं । ततः पादस्य पुण्याहवाचनपूर्वकं वपनं कुर्यात् ॥ तथा च
शौनकः ॥ पूर्वेद्युः नांदीमुखं कृत्वा ब्राह्मणान् भोजयित्वा पुण्याहं वाचयित्वा केशश्मश्म
श्रुलोमनखानि वापयित्वा यथाविधि स्नात्वा होमादि द्रव्यव्यतिरिक्तं द्रव्यजातं पुत्रादिभ्यो

दत्त्वारेडादी न्संनिधाय देवायतने ग्रामे वा पुलिने वारण्ये वा स्थित्वा ब्रह्मणे नमः। इन्द्राय नमः।
सूर्याय नमः। आत्मने नमः। अन्तरात्मने नमः। परमात्मने नमः। इति ब्रह्मांजलिं कृत्वा मान
सं पूजयित्वाग्नये उपस्थाय दर्भांजलिं कृत्वा वेदादीन् जपित्वा सक्तुमुष्टिं प्राश्याप आच
म्य। ॐ भूः सावित्रीं प्रविशामि॥ तत्सवितुर्वरेण्यं। ॐ भुवः सावित्रीं प्रविशामि। भर्गो देवस्य
धीमहि। स्वः सावित्रीं प्रविशामि। धियो यो नः प्रचोदयात्। ॐ भूर्भुवः स्वः सावित्रीं प्रविशा
मि। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ इति जपित्वा किंचनाप
रयपुरस्तादादित्यस्यास्तमयादाज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा समिद्धेऽग्नौ
॥ ॐ भूः स्वाहेति पूर्णाहुतिं हुत्वा सायमग्निकार्यं कृत्वाग्नेरुत्तरदेशे दर्भेषु पात्राणि सादयि
त्वाग्नेर्दक्षिणदेशे दर्भान्संस्तीर्य कृष्णाजिनं चान्तर्धाय तत्र स्थित्वा रात्रौ जागरणं कुर्वीत

॥ अत्र विशेषमाह ॥ बौधायनः ॥ ब्राह्मणानेतानावेश्य पुण्याहं स्वस्तिऋद्धिरिति वाचयित्वेति अं
ते समीपे आवेश्य उपवेश्य ततो वपनं कुर्यात् ॥ कात्यायनः ॥ आपो हि ष्ठा इति द्वाभ्यां समश्रुरोमन
खानि च । गोदानिकविधानेन सर्वमंत्रान्नियोजयेत् ॥ समाप्तके शान्तिरनार्थे स्थापयेत् ।
तथा च संप्रदायविदः । शेषस्य कर्मणः सिद्धौ कृशान् समाप्य वा द्विजं । संरक्ष्य वापयेत्स
र्वांक शांश्मश्रुनखानि चेति ॥ गोभिलः ॥ ततः समाचरेत् स्नानं हिमरूप्यकुशांभसा । कु
र्वानुवपनं विद्वान् भवेन्मुण्डोऽथवा शिखी ॥ स्नानमष्टे व्रतिः कृत्वा तर्प्पायद्देवताः पितॄन् । कु
र्वीत छंदांसि वेदांश्च मनुष्यांश्च यथाविधीति । ततआचम्य देवतायतनादौ उपविश्य दक्षि
णजानु निपात्य नेवामहस्तेन कृत्वा तत्र द्वेप विज्ञेनिधायतदुपरि उत्तानेन दक्षिणहस्तेनापि
दध्यादिति ब्रह्मांजलिः । तं ब्रह्मांजलिं कुर्यात् । जपेच्च ब्रह्मणेनम इत्यादिमंत्रान् । ततआ

10

चम्यवेदादीन् जपेत्। अपउपस्थस्य दर्भाञ्जलिं कृत्वा वेदादीन् जपित्वेति। शौनकवच
नात् ततः सक्तुमुष्टिं प्रणवेन प्राश्याचम्य मंत्रैर्नाभिमभिमंत्रयेत्॥ तदुक्तं बह्वृचपरिशिष्टे त्रि
॥ अथ सक्तून् प्राश्याचम्य नाभिमभिमंत्रयेत्॥ आत्मने स्वाहा॥ अंतरात्मने स्वाहा। प्रजा
पतये स्वाहेति॥ ततः पयो दधि घृतानि त्रिवृत्तानि त्रिवृदसीति मंत्रेण प्रथमं प्राश्नीया
त् प्रवृदसीति द्वितीयं विवृदसीति तृतीयं ततः आपः पुनंतु पृथिवीमित्युदकं प्राश्नीया
त्॥ ततउपवासं कल्पयेत्॥ तदुक्तं बौधायनेन ग्रामांतरे ग्रामसीमांते ऽग्न्यागारे वाज्य
पयादधिसंयुतं त्रिः प्राश्योपवसेत्। त्रिवृदसीति त्रिभिर्मंत्रैः सकृदापः आपः पुनंत्वि
तीति। पयआज्यालाभे ऽपः प्राश्नीयात्॥ तदुक्तं बह्वृचपरिशिष्टे॥ अथ पयो दधि सर्पि
षि त्रिवृत्प्राश्यापाचामेदपस्तदलाभ इति। ततः सावित्रीप्रवेशः। तत्प्रकारमाह बह्वृ ॥१०॥

च परिशिष्टे बौद्धायनो ॥ ॐ भूः सावित्रीं प्रविशामि । तत्सवितुर्वरेण्यं । ॐ भुवः सावित्रीं प्रविशा
मि । भर्गो देवस्य धीमहि । ॐ स्वः सावित्रीं प्रविशामि । धियो यो नः प्रचोदयात् । ॐ भूर्भुवः स्वः
सावित्रीं प्रविशामि । सर्वां गायत्रीं जपेत् । ततः किंचनाप्य प्राश्य ततोस्तमयात्पूर्वं आहिताग्निश्चे
दाहवनीये एकाग्निश्चेदौपासनाग्नौ ब्रह्मचारी चेल्लौकिकाग्नौ विधुरश्चेत्पूर्वोक्तेन एष्टो
दिविविधानेनात्वा दितेग्नौ स्रुवेण स्रुचि आज्यं चतुर्गृहीत्वा स्रुचा ॐ स्वाहेति जुहुयात्
॥ एतद्ब्रह्मान्वाधानं ॥ तत्र बौद्धायनः ॥ पुरादित्यस्यास्तमयाद्गार्हपत्यमुपसमाधायान्वाहार्यपच
नमाहृत्य ज्वलंतमाहवनीयमुद्धृत्य गार्हपत्ये आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा
समिद्धेष्वाहवनीये पूर्णाहुतिं जुहोत्योंस्वाहेत्येतद्ब्रह्मान्वाधानमिति विज्ञायत इति ॥ तथा
कात्यायनः ॥ उपासने ह्यावसथ्ये चैष्टोदिविजमेव वा । लौकाग्निमितरं चापि श्रद्धवान्

स यदा भवेत्॥ इत्युपक्रम्य॥ तस्मिन् होमं महायज्ञान् कुर्यात्पक्षादिकर्म चासंन्यासात्प्रभृत
॥ था कुर्यात्पाकयज्ञादिकानपीत्युक्तत्वात्। ततः संध्यावंदनपूर्वकमस्तमित आदित्ये स्वः
स्वाहेत्यग्नौ होमं कुर्यात्॥ तत्र बोधायनः॥ अथ सायं हुतेग्निहोत्रे उत्तरेण गार्हपत्यं तृणानि
संस्तीर्य द्वंद्वं पात्राण्यासादयित्वा यश्चादीनि कंथा वा प्या दक्षिणेनाहवनीयं ब्रह्मायत
ने दर्भानास्तीर्य कृष्णाजिनं चांतर्धायेतां रात्रिं जागर्तीति। दत्तात्रेयः॥ होमं दद्यात्तथा
सायं कुर्यात् कृष्णाजिनं ततः॥ ब्रह्मस्थाने समास्तीर्य ब्रह्मभावेन संस्थितः॥ ब्रह्मरात्रं तत
तो दत्वा विह्मो संन्यासमानसः। तमभ्यर्च्य दूषीकत्रांज्ञपन्ने कादंरं परमिति। य एवं विद्वा
न् ब्रह्मरात्रिमुपोष्य ब्राह्मणोग्नीन् समारोप्य वा प्रमीयते सर्वपाप्मानं तरति तरति ब्रह्म
हत्यामिति॥ छ॥ ततो ब्राह्म्ये मुहूर्ते त्वथमाह शौनकः॥ ब्राह्मे मुहूर्ते उत्थाय यथाविधि

॥११॥

स्नात्वा प्रातरग्निकार्यं कृत्वा व्याहृतीर्जपित्वा तरत्समंदी धावतीति सूक्तमप्सु जपेत्। इति।
ततआहिताग्निश्चेत्प्राजापत्यामिष्टिं कुर्यात्। एकाग्निश्चेदाग्नेयीः। तथा च जाबालश्रुतिः॥
तद्धैके प्राजापत्यामेवेष्टिं कुर्वंतित दु तथा न कुर्यात् आग्नेयीमेव कुर्यादिति। अत्र प्राजापत्ये
ष्टिराहिताग्निस्तद्वाक्यशेषे मीनिति बहुवचनश्रवणात्। आग्नेयी तु एकाग्नेः तद्वाक्यश
षेग्निमाजिघ्रदित्येकवचनश्रवणात्॥ मनुः॥ प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षि
णां। आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्॥ दत्तात्रेयः॥ ब्रह्मरात्रं ततो दद्यात्त्वो
पौर्णमास्यां द्विजोत्तमः॥ प्रातरुत्थाय स्वकल्येन कृत्वा स्नानादिकां क्रियां। प्राजापत्यां प्रतिपदि कु
र्वेष्टिं तु यथाविधि। ततो विप्राय दद्यात्तु सर्ववेदसदक्षिणां। अथवा आहिताग्निर्वैश्वान
रीयेष्टिं कुर्यात्॥ तथा च श्रुतिः॥ आग्नेयीमेव कुर्यात् अग्नये वैश्वानराय द्वादशकपालं पु

रोडाशं निर्वपति। प्राजापत्यं चरुं। ति स्रवं नवकपालं वेति। अत्र विशेषो बाह्वृचायनेनोक्तः॥
12 द्वयजनोल्लिखन प्रभृति मुखांतं कृत्वा पक्वान्नं जुहोति॥ विश्वानराय प्रतिवेदयामह इति पुरो
नुवाक्यामनूच्य विश्वानर पवमान पवित्रेणेति॥ अथान्याहुती जुहोति॥ वैश्वानरो नऊतय
इत्यष्टाभिरनुच्छंदसमग्नये स्वाहेति च। अथैनमुपतिष्ठते॥ सहस्रशीर्षा पुरुष इत्येनेना
नुवाकेन स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानात्॥ अथाग्निं दर्भस्तंबेषु कृत संस्थं नि
दधाति सर्वो वै रुद्र विश्वं भूतमिति द्वाभ्यामनुमन्त्र्याग्निं आयुर्दा अग्ने हविषा जुषाण इति
अथ पश्चादुपादाय प्रक्षाल्य प्राश्नाति सहस्रशीर्षा पुरुष इत्यनुवाकेन प्राश्याप आचम्या
त्मानं प्रत्यवेक्ष्य प्रदक्षिण्यामिति ब्रह्मेच्येतेनानुवाकेनाथाग्निं द्रव्यमग्नौ प्रक्षिप्यात्मन्यग्नीन्स
मारोपयेत्॥ या ते अग्ने यज्ञिया तनूरिति। तत्रैव विशेषमाह॥ शौनकः॥ प्राजापत्य येष्टु

पुनराहवनीयमुधच्य प्राणापानौ समौ कृत्वा सर्वं निदधाति ॥ यच्चपूर्वं यच्चप्रजापतौ तन्मनसि
जुहोमि विमुक्तो हं देवकिल्बिषात्स्वाहा ॥ अयं ते योनिर्ऋत्विय इत्यात्मन्यग्नीन् समारोपयति
।प्राणेन गार्हपत्यं ।अपानेन दक्षिणाग्निं व्यानेनाहवनीयमुदानेनावसथ्यं समानेन सभ्यं पुन
राहवनीयं गत्वाग्रः संभूत इत्यादित्यामुपस्थाय नरनारायणो न गृहाग्निः क्रमेदिति ।पा
त्रविशेषाणां प्रतिपत्तिमाह दत्तात्रेयः ॥ प्रत्नमयान्यश्ममयानि चाप्सु जुहुयात्कुर्वेति ज
सा निदध्यादिति ॥ यमः ॥ ततश्चाहवनीयाख्यकृत्वा पात्राणि मंत्रतः ॥ आसो स्वर्गो यत्लोका
य स्वाहेत्येवं निधापयेत ।अयं ते योनिरित्येवं समारोप्यात्मनो मुखात ।ततो विश्वानरं ध्यायन्
स्वर्गो त्वं विश्वतोमुखं ।अथ गार्हपत्ये ऽग्नौ जुहुयाद्दराणिं बुधः ॥ अयमग्निर्गृहपतिर्मंत्र
णानेन भावितः ॥ अयं ते योनिरित्येवं समारोप्यात्मनो हृदि ।ततो विश्वानरं ध्यायं यदूसं

13

त्वं विश्वतोमुखं।जुहुयाद्दक्षिणेऽग्नौ चमुशलोलूखले ततः॥अयमग्निः पुरीष्य इति मंत्रेणाने
नयन्नतः॥अयं ते योनिरित्येवं मनस्याग्नेरोप्य वदवित्।धूमयेद्वैश्वानरं देवमंतरिक्षात्स्वयमव
यं॥गवा थगा।हे पर्यं तु सूक्तं वि पौरुषं जपेत्॥वेद्यामध्ये ततः स्थित्वाकोस्येति तु जपेद्द्विज इ
ति।एकाग्निरनग्नी तु त्रेतो न कोक्तेन विधिना चरुं।श्रपयित्वा होमादि कुर्यात्तां॥सउच्यते॥ब्रा
ह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातरग्निकार्यं कृत्वा व्याहृतीर्जपित्वा तरत्सं मंदीसूक्तमप्सु
जपित्वा स्वगृह्योक्तेन विधिना चरुं श्रपयित्वा अग्निमुपसमाधाय॥प्राणाय स्वाहा॥अपाना
य स्वाहा॥व्यानाय स्वाहा॥उदानाय स्वाहा।समानाय स्वाहेत्याज्यहोमं कृत्वा अथ पुरुषसूक्तेन प्र
त्यृचमाज्यहोमं चरुहोमं च कृत्वा पुरुषसूक्तं जपित्वा प्रणीतापात्रं सेमरुज्य सोविष्टंकृतं कृत्वा
आचार्यायाज्यपात्रं हिरण्यं धेनुं च दत्वाचार्यपुरतो वस्थितः सऽसंमासि चेतु मरुतः समिंद्रः संव

म हस्पतिः संमार्ष्टग्निः सिंचित्वा पुरुषा च बलेन चायुष्मंतं करोतु मामिति जपित्वा ॥ याते अग्ने य॥
ज्ञियातनूस्तयेह्यारोहात्मनात्मानं अच्छावसूनिकृण्वन्नस्मे नर्या पुरूणि यज्ञो भूत्वा यज्ञमा
सीद स्वां योनिं जातवेदो भुवः। आजायमानः सक्षय इत्यृचा त्रिरात्मन्यग्नीन्समारोपयेदिति। अन
ग्नेस्तु समारोप एव नास्ति तत्र वह्नेश्च परिशिष्टं ॥ अथात्मन्यग्नीन्समारोपयेदेकाग्निरेकाग्नि
मनग्निर्नैकं च नेति ॥ अनग्निनः कपिलप्रोक्तेन विधिना वा संन्यासः कर्तव्यः ॥ तमपि संक्षे
पतो दर्शयिष्यामः। नांदीमुख ब्राह्मण भोजन पुण्याह केशश्मश्रुलोमनख वपनस्नान
सर्वदान दंडादि संनिधान त्रिवत्प्राशन सावित्री प्रवेशन संध्याराधनानि कृत्वोपाष्य
स्नात्वा संध्याराधनं कृत्वा देवर्षिपितृतर्पणं च कृत्वाज्यः स्वाहा ॥ पुत्रैषणायाश्च वित्ते
षणायाश्च लोकैषणायाश्च व्युत्थितोहं स्वाहेत्यप्स्वेवापः पाणिना कृत्वा यथाविधि प्रे

पुत्रं दृष्ट्वातं ब्रह्मेत्यादि वाक्यत्रयं जपेत्। तथा च शौनकः २

षमुक्त्वाऽभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यभयदक्षिणां दत्वा यथाधिकारं यथाविधि दंडादि
गृहीत्वा स्वधर्मनिष्ठो भवेदिति॥ साग्निस्तु उक्तेन विधिनाऽग्निसमारोपं विधाय यजमाना
ऽयं गच्छेत्। ततः पुत्रं दृष्ट्वा जपति त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति॥ स पुत्रः प्रत्याहाहं ब्रह्माहं
यज्ञोऽहं लोक इतीति॥ तथाह्निकपरिशिष्टे॥ अथ पुत्रान् सुहृदो बंधून् प्रत्याह न मे कश्चिन्नाहं
कस्यचिदितीति। ततः आश्रमात् संन्यासाश्रमं गच्छामीति संकल्पयेत्॥ ततः अश्वेवादं
का हुतिद्वयमाह कपिलः॥ अद्य स्वाहा पुत्रैषणा याश्च वित्तैषणा याश्च लोकैषणा या
श्च व्युत्थितोऽहं स्वाहेत्यश्वेवापः पाणिना हुत्वेति। ततो यज्ञोपवीतं हस्ते गृहीत्वा द्रष्टिमाव
दांत विज्ञानतिमंत्रेण प्सु जुहोति। तथा बौधायनः अथ यज्ञोपवीतं विसृज्याद्भिः संसृज्य
प्सु जुहोति। वदांततति। आरुण्युपनिषदि च। उपवीतं भूमौ वाप्सु वा विसृजेत् इति॥ तथा

ततः शिखार्थं रक्षितान् केशान् उत्पाट्य भूः स्वाहेति कमावप्सु वा निक्षिपेत् २

चकठश्रुतिः॥सशिखान्केशान्निष्कृत्यविसृज्ययज्ञोपवीतंभूःस्वाहेति॥तथाथर्वणश्रुतिरपि
त्रे १ ॥सशिखंवपनंकृत्वाबहिःसूत्रंत्यजेद्बुधः॥ततःप्रैषोक्तिप्रकारमाहारुणिश्रुतिर्ब्रह्मसूत्रम
हामवतिविद्वान्शिखिविसूत्रंत्यजेद्विद्वान्यएवंवेद॥संन्यस्तंमयासंन्यस्तंमयेतित्रिरु
क्त्वाऽभयंसर्वभूतेभ्योमत्तःसर्वंप्रवर्तते।सखामागोपायौजः।सखायो॥सीन्द्रस्यवज्रोसि
यानेनमंत्रेणकृत्वोर्द्ध्वं।वैणवंदंडं।कौपीनंपरिगृहेदिति॥बह्वृचपरिशिष्टकारः।प्रैष
स्वस्तिश्चन्नूर्द्ध्वबाहुर्ब्रूयात्।ॐभूःसंन्यस्तंमया।ॐभुवःसंन्यस्तंमया।ॐस्वःसंन्यस्तंमया।
ॐभूर्भुवःस्वःसंन्यस्तंमयेतित्रिरूपांशुत्रिर्मध्यमंत्रिरुच्चैरितिप्रकारांतरमाह॥शौन
कः॥ॐभूर्भुवःस्वःसंन्यस्तंमया।संन्यस्तंमयासंन्यस्तंमयेतिमंदमध्यमोत्तमस्वरेणोक्त्वा
ऽभयंसर्वभूतेभ्योमत्त इतिप्रैषमुक्त्वोदकपूर्णांजलिनिनयनंकृत्वायथाधिकारंयथावि

15

त्रिदंडादिग्रहीत्वास्वधर्मेणनिष्ठोभवेदिति॥बोद्धायनसूत्रंयथाह॥ॐभूर्भुवःस्वःसंन्यस्तंमया
रसंन्यस्तंमयेतित्रिरूपांशूक्त्वात्रिरुक्त्वास्त्रिसयाहिदेवाइतिहिविज्ञायते।अभयंसर्वभू
तेभ्योमत्तइत्यपांपूर्णमंजलिंनिनयतीति॥ततोविष्णुप्रार्थनाप्रकारमाह॥यमः॥दत्वा
तोयांजलिंविप्रोभक्त्यासंप्रार्थयेद्धरिं।सर्वदेवात्मकेतोयेतोयाकृतिमहेहरे।देवासर्वे
षणांचभक्त्यायुष्मच्छरणमागतः॥त्राहिमांसर्वलोकेशगतिरन्यानविद्यते।संन्यस्तंमेज
गन्नाथपाहिमांमधुसूदन।त्राहिमांसर्वसर्वेशवासुदेवसनातन।संन्यस्तंमेजगाद्धा
निपुंडरीकाक्षमोक्षद।अहंसर्वाभयंदत्वाभूतानांपरमेश्वर॥युष्मच्छरणमापन्नस्त्राहि
मांपुरुषोत्तमेति॥ततोदिगंबरोभूत्वाकिंचिदुदङ्मुखोगच्छेत्।ततोविविदिषश्चेत्कुर्वन्नु
ज्ञयापरावृत्त्यागुरुसमीपेतिष्ठेत्तथाचसंप्रदायविदः।ततोदिगंबरोभूत्वागच्छेत्किंचि ॥१५॥

दुदङ्मुखः। जिज्ञासुश्चेत्पराचक्ष्णः तिष्ठन्तमनुशासनादिति। ततो दारकं कौपीनं बहिर्वासः कं
थां दंडं च क्रमेण। किंकं पूर्णवेनिवादद्यात्तथा बद्धं च परिशिष्टे अन्यत्सर्वं प्रणवेनेवेति। ततः इंद्र
स्यवज्रोसि वार्त्रघ्नः शर्म मे यच्छ यत्पापं तं निवारय इत्यनेन मंत्रेण दंडं संप्रार्थयेत्। मंत्रलिंगाच्च प्र
र्थनायां विनियोगः। ततः सखा मा गोपायेति दक्षिणहस्ते दंडं धारयेत्॥ तत्र बौधायनः॥ अथ दं
डमादत्ते सखा मां गोपायेति मंत्रायणी श्रुतिरपि॥ इंद्रस्य वज्रोसीति चीविणवान्दंडान्दक्षि
णपाणौ धारयेदेकं वा यद्येकं तदा सशिखं वपनं कृत्वा विसृज्य यज्ञोपवीतं चतुर्षु वर्णेष्वेकागार
भिक्षमश्नीयात्॥ माधूकरीं वेति। काममप्येकं वैणवं दंडं धारयेदित्यारुणीश्रुतिः। दंडलक्षण
माहात्रिः। धारयेद्वैणवं दंडं न स्थूलं न कृशं तथा तस्य चाग्रे च मूले च ग्रंथिं त्यक्त्वा तु धारये
त्॥ द्विचत्वारि षडष्टौ वा ह्यंगुलानि समाहितः। न न्यूनं नातिरिक्तं च द्विगुणं मूलतो ग्रके

॥ भविष्यत्पुराणे ॥ दंडं तु वैणवं सौम्यं सत्वचं समपर्वकं । पुण्यस्थानसमुत्पन्नं नानाकल्माषशो
भितं । अदग्धमहतं कीटैः पर्वग्रंथिविराजितं । स्वयंभूतं तु मेदिन्यां शाखावर्जमृजुं शुभं । ना
16 सादघ्नं शिरस्तुल्यं भ्रुवोर्वा बिभृयाद्यतिः । विष्णुः ॥ एकदंडी मुंडा इति ॥ जं भवेद्वापि त्रि
दंडी वाथवा भवेदिति । कात्यायनः ॥ एकदंडधरा मुंडा इति ॥ जमदग्निः ॥ दंडात्मनोस्तु संयोगः
सर्वदैव विधीयते ॥ न दंडेन विना गच्छेदिषुक्षेपत्रयं बुधः ॥ जलांतरादिषु क्षिप्तेन कश्चिद्दोष
भाग्भवेत् । शिष्यादिप्रविनीतेष्विनीत एव सन्नात्मनो । हस्तपादादिवच्छिन्न इति त्रि
ष्टाक्रुवंति हि । संन्यासिनाम भ्यजनं सर्वेषामाश्रमादनाश्रमाद्वाऽऽश्रमं गच्छामीति संक
ल्प्य प्रैषोच्चारणमभयदानानीति । नांदीमुखादि ईडाग्रहणं तत्तु क्रियाकलापात्स्वे
वांगभूतोत एवातुरस्य संकल्प्य प्रैषोक्ताभयदानमात्रात्फलं श्रूयते । यद्यातुरः स्याद्वा

चामनसावासंन्यसेदेषपंथाब्रह्मणाहानुचित्तस्तेनेतिसंन्यासीब्रह्मविदवप्तेविषभग
वन्नितिविदेहइत्यादिना॥स्मर्यतेचासंन्यस्तमितियोब्रूयात्प्राणैःकंठगतैरपिान
तत्क्रतुसहस्रेणफलंप्राप्नोतिमानवइत्यादिनासोपिजीविष्यतिचेत्।तथाधिकारंय
थाविधिदंडादिग्रहीत्वास्वयंधर्मनिष्ठोभवेत्इतित्रिदंड्यपिस्वपरिग्रहंपरित्यज्यपर
महंसोभवेत्॥तथाचस्मृतिः॥त्रिदंडंकुंडिकांचैवसूत्रंचाथकपालिकां।जंतूनांवारणं
वस्त्रंसर्वंभिक्षुःपरित्यजेत्॥बौद्धायनः॥तस्ययागविधिरएषगत्वाशिखोमुंडःकाष
यवासाःवाङ्मनःकर्मदंडीभूतानामद्रोहीयज्ञोपवीतंवेदंत्रिदंडंकमंडलुंपात्रंपरित्य
ज्यविसृज्यसर्वकर्माणिसर्वसहःसर्वसंगनिवृत्तःप्रसन्नमनाःसुखासीनोविश्वरूप
मात्मानंचिंतयेदिति।अथयाज्यनिरूपणंवृहदारण्यकेएतंवैतमात्मानंविदित्वाब्रा

17 ह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायेति ॥ आरुण्युपनिषदि ॥ आरु
णिः प्रजापतेर्लोकं जगाम तं गत्वोवाच केन भगवन् कर्माण्यशेषतो विसृजामीति ॥ तं होवाच प्रजा
पतिस्तव पुत्रान् भ्रातॄन् बंधुमदीन् शिखां यज्ञोपवीतं यागं सूत्रं स्वाध्यायं च । भूर्लोकं भुवर्लो
कं स्वर्लोकं महर्लोकं जनलोकं तपोलोकं सत्यलोकं च अतलतलातलवितलसुतलरसात
लतलातलमहातलब्रह्मांडं च विसृजेत् ॥ दंडमाच्छादनं कौपीनं परिग्रहेत् ॥ शे
षं विसृजेत् ॥ शेषं विसृजेत इति । काठके । यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिरिति । प
रमहंसोपनिषदि ॥ असौ स्वपुत्रमित्रकलत्रबंधुमदीन् शिखां यज्ञोपवीतं यागं सूत्रं स्वा
ध्यायं च सर्वकर्माणि संन्यस्यायं ब्रह्मांडं हित्वा कौपीनं दंडमाच्छादनं च स्वशरीरोपभो
गार्थाय च लोकस्योपकारार्थाय च परिग्रहेत् ॥ इति । व्यासः ॥ यज्ञधर्ममधर्मं च उभे सत्यानृ

तेयजा। ऽन्येसंन्यासं तेयज्ञायेनयजमानतया ना। या: काश्चिद्दीवतारा क्यास्त्यक्तुं तिति द्वता क्रिया
।ता: सर्वा: संपरित्यज्यानिम्नेषादिष्ववस्थित:॥ अत्रि॥ यत्रा बंधितं यैंञ्जे द्विप्रो धनधान्यादिकं
चयत्॥ अत्यागात्सर्वविन्नानां संन्यासीनि:फलो भवेदिति। बाष्कलेय:। कुटुंबं पुत्रदारां
श्चवेदांगानि च सर्वश:। यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनि:॥ सुमंत:॥ एषयज
न्यहं सर्वं काममभोगादिकं सुखं। शोकं तापं विषादं चगंधमाल्यानुलेपनं। भूषणं वर्त्त
नं गेयं दानमादानमेव चेत्यादि॥ अथ श्रुतिस्मृतिभ्यां प्रव्रज्यमानं संन्यासफलं प्रदर्श्य
ते। बृहदारण्यके॥ एतमेव प्रव्राजिनो लोकमिच्छंत: प्रव्रजंति प्रकृतमात्मानमेव लोक
मिच्छंत: प्रव्रजेयुरित्यर्थ:॥ छांदोग्ये॥ ब्रह्मसंस्थो मृतत्वमेति इति। त्याग एव हि सर्वेषां मो
क्षसाधनमुत्तमं। त्यजतैव हित तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदमिति। भाल्लवीयश्रुति:। नक

कुलानांपुरतोबभ्रुवतथापराणांत्रिंशतंसमग्रं।एतेभवंतिसुकृतस्यलोकेयेषांकुले २

र्मणानप्रजयानधनेन॥त्यागेनैकेनामृतत्वमानशुरिति।तैत्तिरीयके॥अथपरिव्राड्विवर्ण
18 वासाऽमुंडोऽपरिग्रहःशुचिरद्रोहीभैक्षाणोब्रह्मभूयायकल्पतइतिजाबालश्रुतिः।शतं
कुलेसंन्यसतीहविप्रः॥संन्यासात्ब्रह्मणःस्थानंविराग्यात्प्रकृतौलयः॥ज्ञानात्कैव
ल्यमाप्नोतितिस्रस्तागतयःस्मृताः॥याज्ञवल्क्यः॥प्रकार्येकारिणांदानंवर्गानद्याश्वशु
द्धिकृत्।शोध्यस्यमृद्यातोयंचसंन्यासोयद्विजन्मनां॥विष्णुः॥एकरात्रोषितस्यापियते
र्यागतिरुच्यतेनसाशक्यागृहस्थेनप्राप्तुंक्रतुशतैरपि।संन्यस्तमितियोब्रूयात्प्राणैः॥
कंठगतैरपि।नतक्रतुशतेनापिप्राप्तुंशक्नोतिमानवः।संन्यस्तंद्विजंदृष्ट्वास्थानाच्चल
तिभास्करः।एषमेमंडलंभित्वापरंब्रह्माधिगच्छति॥दक्षः॥त्रिंशत्परान्त्रिंशदपरान्त्रिं
स ८ शच्चपरतःपरान्।द्धेःसंन्यसनादेवनरकात्तारयेत्पितॄन्॥जाबालः।चतुर्वेदसुयेवि

प्रः सोमयाजी त्रशतक्रतुः ॥ तस्मादपि यतिः श्रेष्ठस्तिलपर्वतमंतरं ॥ कपिलः ॥ संन्यस्तमि
ति यो ब्रूयात्प्राणैः कंठगतैरपि स्मात्सयांल्लभते लोकान्पुनर्जन्म न विद्यते ॥ अंगिराः ॥
॥ षष्टिं कुलान्यतीतानि षष्टिमागामिकानि च। कुलान्युद्धरते प्राज्ञः संन्यस्तमिति यो व
देत् ॥ ये च संतानजा दोषा ये पि स्फः कर्मसंभवाः। संन्यासस्तान्दहेद्दोषान्तुषाग्नि
रिव कांचनं। सूर्यखद्योतयोर्यद्वन्मेरुसर्षपयोरिव। अंतरं हि महद्दृष्टं तथा भिक्षुगृह
स्थयोः ॥ मनुः ॥ यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ॥ तस्य तेजोमया लोका भवंति
ब्रह्मवेदिनः ॥ यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयं। तस्य देहाद्विमुक्तस्य भयं
नास्ति कुतश्चन ॥ ब्रह्मवेदिनः सगुणब्रह्मविद इत्यर्थः। तेजोमयलोकसंबंधमात्रके
र्त्वादेर्बाधितत्वात् भयाशंकाभावाच्च। नहि परब्रह्मविदस्तेजोमयलोकसंबंधो भयाशं

कावास्यात॥ब्राह्मे वसन् ब्रह्माप्नोति॥नबिभेति कुतश्चनेत्यादिश्रुतेः।गृहस्थो ब्रह्मचा
19 रीचवा नप्रस्थोथ भिक्षुकः।यइच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत्॥यमः॥ज्ञाने
नमुच्यते भिक्षुः तपसा स्वर्गमाप्नुयात्॥नरके विषयासंगाच्चयोमार्गोस्तपस्विनां॥व्यासः
॥कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते॥तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः॥य
स्य संन्यसनादेव स्थानाच्चलति भास्करः॥कुलकोटिशतैः सार्द्धं प्राप्नोति परमं पदं।षष्टिं
कुलान्यतीतानि षष्टिमागामिकानि च।नरकादुद्धरत्येव संन्यस्तोहमिति ब्रुवन्।दिव्य
तेजोमयः श्रीमान् सूर्यचंद्राग्निमंडलं।भित्वा प्रयाति संन्यासी स्वधर्मपरिपालना
त्॥छ॥उक्तेन विधिनो संन्यासं विधाय आत्मज्ञानाय गुरुसमीपं गच्छेत्॥उक्तं चाथर्व
णोपनिषदि मुंडके॥परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः॥

कृतेन ॥ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् ॥ समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति ॥ ततो विन-
यादिगुणयुक्तो गुरुमुपगम्य दक्षिणं जानुं भूमिं नीत्वा पादग्रहणं कृत्वायाब्राह्मणं विदधर्म-
तिपूर्वं यो विवेदं श्रुप्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्र-
पद्य इति ॥ मंत्रेण गुरुं भगवन्नुध्येषपृच्छाय अधीहि भगवो ब्रह्मेति ब्रूयात् ॥ तथा च प-
रिशिष्टं । अथ गुरुमुपगम्य दक्षिणं जान्वाच्य पादावुपसंगृह्याह । अधीहि भगवो
ब्रह्मेतीति । तादृक्साधनचतुष्टयसंपन्नायाधिकारिणे गुरुर्ब्रह्मोपदिशेत् ॥ तथा च
मुंडके । तस्मै स विद्वानुपसंपन्नाय सम्यक्प्रशांतचित्ताय शमान्विताय । येनाक्षरं
पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां तदेतत्सत्यमिति । ततो गुरुरद्वैतसच्चिदानं-
ददेवरूपमात्मानमनुसंधाय जलपूर्णशंखं पुष्पादिभिरभ्यर्च्य द्वादशप्रणवैरभि

मंच्यातनोदकेनप्रणवेनाशिष्यस्यशिरोभिषिंचेत्।ततःशन्नोमित्रइतिशांतिंपठित्वा
२० शिष्यस्यशिरसिहस्तंदत्वापुरुषसूक्तंजपेत्॥तथाचबह्वृचपरिशिष्टे॥अथास्यशिर
सिपुरुषसूक्तेनपाणिमुपदधातिममव्रतेहृदयंतेदधामिममचित्तमनुचित्तंतेअ
स्तुममवाचमेकव्रतोजुषस्वबृहस्पतिस्त्वानियुनक्तुमह्यमिति॥हृदयदेशइतिदीक्षा
यांप्रमाणं॥भिक्षुर्भिक्षुधर्मोपसंगृह्यभिक्षुगुणसंपन्नमाचार्यमुपसंगम्यतस्मैनिवे
दीक्षांपरिगृह्णातीतिगालववचनं॥ततउदङ्मुखायनित्यशुद्धबुद्धमुक्तसत्यपरमानं
दाद्वयब्रह्मप्रतिपादकंप्रणवंदक्षिणेकर्णेप्राङ्मुखःसमनुपदिशेत्॥प्रणवस्यचार्थ
ने२ माचार्यवचनाद्बोधयेदाचार्यवचनंचानुपंचीकृतपंचमहाभूतानीत्यादि।ततअ
यमात्माब्रह्मतत्त्वमसिप्रज्ञानंब्रह्मेत्यादीनिशिष्यशाखावाक्यापादरापूर्वकमुप

दिशात्॥ तेषामर्थं च बोधयेत्॥ तातानामदद्यात् तथा च बहूच परिशिष्टं। अथास्मै नामद
द्याद्विक्ष्मवं मासनामाथवायद्वो चेतेति॥ तथा संप्रदायविदः॥ तत्तत्पदार्थयोरैक्यं यत्पदं प्रतिपा
दयेत्॥ तन्नामप्रयतये कुर्याद्वाक्यनाम्नातदिष्यत इति। पूर्वाचार्याणामपि नामकर्तव्यं॥ तथा
च तएवायतीनांख्यातयसासामाचार्यैः पूर्वमादिनां। नामकुर्यान्नशिष्यस्य बुद्धिपूर्वकं
दाचनेति॥ ततो गुरुः शिष्यायोपनिषदान्यरमहंसधर्मानुपदिशेत्॥ छ॥ ननु परमहं
सानां यक्तसर्वकर्मणां कथं धर्मेष्वधिकारः उच्यते॥ यज्ञादिसर्वकर्मणां परित्यागेपि
विविदिषूणां स्वाश्रमोचितब्रह्मचर्यापरिग्रहश्रवणप्रणवाभ्याससंध्यासध्यानमौन
त्रिषवणस्नानगुरुशुश्रूषादीनि कर्माणि श्रुतिस्मृतिषु कर्तव्यतया प्रतीयंते। तत्रा
रुणीश्रुतिः॥ ब्रह्मचर्यमहिंसां चापरिग्रहं च सत्यं च यत्नेन हेरक्षतो हेरक्षत इति॥ त्रि

२।

संध्यमादौ स्नानमाचरेत् ॥ संधिं समाधावाचरेत्सर्वेषु वेदेष्वारण्यकमावर्त्तयेदुपनिषदमावर्त्त
येत् ॥ अथ ध्रुवदर्शनमाचार इत् इति ॥ काठकब्रह्मणं ॥ स्वस्ति सर्वजीवेभ्य इत्युङ्कारी दा
मुपेयात्काषायवासाः कक्षोपस्थरोमलघुमुण्डोदरपात्राकस्मादित्यध्यात्ममस्य ध्या
यतरूर्द्ध्वगावाद्दु विमुक्तमार्गो भवेदनिकेतश्चार् द्विदाशी न दद्यात् ॥ स्नाविकं ध्मरये
दिश्यादिति ॥ बृहदारण्यके । तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा
त्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो
निदिध्यासितव्यः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं
च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति ॥ अयमर्थः ॥ यस्मात्पूर्वे ब्रा
ह्मणा एतमात्मानमसाधनफलस्वभावं विदित्वा सर्वस्मात्साधनफलस्वरूपादेषणा

लक्षणाद्व्युच्छाय भिक्षाचर्यं चरंतिस्म। दृष्टादृष्टार्थकर्म तत्साधनं च हित्वा तस्माद्यद्वे
पि ब्राह्मणविद्वान्ब्राह्मणः पांडित्यं पंडितभावमेतदात्मविज्ञानं पांडित्यं। निर्विद्य निःशेषं कृ
त्वा आत्मज्ञानं निरवशेषं कृत्वेत्यर्थः॥ आचार्यत आगमतश्च॥ वेदांतानां तात्पर्यावधा
रणं श्रवणं एषणाभ्यो व्युच्छाय कुर्यादित्यर्थः॥ एषणातिरस्कृत्य न ह्यात्मविषय
स्य पांडित्यस्योद्भव इति तस्मादेषणाभ्यो व्युच्छाय ज्ञानबलभावेन बाल्येन तिष्ठासेत्
स्थातुमिच्छेत्॥ साधनफलाश्रयणं हि बलमितरेषामनात्मविदां तद्बलं हित्वा वि
द्वानसाधनफलस्वरूपात्मविज्ञानमेव बलं तद्भावमेव केवलमाश्रयेत्॥ तदाश्रयणे मा
न हि करणान्येषणाविषये एवं कृत्वा स्थापयितुं नोत्सहंते ज्ञानबलहीनं हि मूढं दृष्टादृष्टवि
षयायामेषणायामवेनं करणानि योजयंति। बलं नामात्मविद्ययाऽशेषविषयदृष्टि

तिरस्करणं ॥ अतस्तद्भावे न बाल्ये न तिष्ठासेत् ॥ तथात्म नाविंदति वीर्यमिति श्रुत्यंतरात्
॥ नायमात्मा बलहीनेन लभ्य इति च। बाल्यं च पाण्डित्यं च निर्विद्य निःशेषं कृत्वा ॥ अथ बं
22 मननान्मुनिर्योगी भवति ॥ एतावद्धि ब्राह्मणेन कर्त्तव्यं यदुत सर्वानात्मप्रत्यय
तिरस्कारः ॥ एतत्कृत्वा कृतकृत्यो योगी भवति। अमौनं चात्मानात्मप्रत्ययतिरस्का
रो। पाण्डित्यं बाल्यं संतकौ निःशेषं कृत्वा मौनं नामानात्मप्रत्ययतिरस्कारणस्य पर्यव ॥
सानं फलं ॥ तच्च निर्विद्याथ ब्राह्मणः कृतकृत्यो भवतीति ॥ तथा च स्मृतिः ॥ जन्मना जा
यते शूद्रः संस्कारेण द्विजोत्तमः ॥ वेदाभ्यासी भवेद्विप्रो ब्रह्म जानाति ब्राह्मणः ॥ आ
थर्वणोपनिषदि। तमेवैकं विजानाथ आत्मानमन्या वाचो [illegible] विमुंचत तथा मृतस्यै
ष [illegible] सेतुरिति। काठकश्रुतिः। यो वा एवं क्रमेण संन्यसति यो वा व्युत्तिष्ठति किं तस्य

यज्ञोपवीतं कावास्य शिखा कथं कस्योपस्पर्शनमिति तान्होवाच ॥ इदमेवास्य तद्यज्ञोपवी
तं यदात्मध्यानं विद्या शिखा नीरैः सर्वत्रावस्थितैः कार्यं निर्वर्तयन्नोदपात्रे जलतीरनिके
तन इति ॥ आपस्तंबः । सर्वतः परिमन्नमेके सत्यानृते सुखदुःखवेदानिमं च लोकं परित्यज्या
त्मानमन्विच्छेत् । बुद्धः क्षेमप्रापणमिति ॥ भिक्षाशी सर्ववर्णेषु अभिशस्तपतितवर्जं अय
ज्ञोपवीती शौचनिष्ठः क्षमी तुल्यनिंदास्तुतिः ॥ समा भूतेषु मौनी गूढधर्माश्रितो नित्यं ध्यान
नयोगपरः स्थितधीरात्मरतिरात्मतृप्त आत्मद्र आत्मनिष्ठ आत्मप्रतिष्ठ आत्मनाव्रह्मनय
त्यात्मब्रह्मब्रह्मवित्स आप्नोतीति विज्ञायते ॥ एवं ब्रह्मनिष्ठः परिव्राट् ब्रह्माप्नोतीति ॥ याज्ञवल्क्य
॥ सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः । संयतेंद्रियता विद्या धर्मः सर्व उदाहृतः ॥
सत्यं यथार्थप्रियवचनं । अस्तेयं परद्रव्यानपहारः ॥ अक्रोधो अपकारिण्यपि क्रोधस्यानु

23 त्पादनं॥ ह्रीर्लज्जा॥ शौचमाहारादि।शुद्धिः। धीर्हिताहितविवेकः॥ धृतिरिष्टवियोगानिष्ट
प्राप्तौ प्रचलितचित्तस्य यथापूर्वमवस्थानं। दमो मदत्यागः॥ संयतेंद्रियता अप्रतिषिद्धेष्व
पि विषयेष्वनतिप्रसंगः। विद्या आत्मज्ञानं एतैः सत्यादिभिरनुष्ठितैः सर्वो धर्मोनुष्ठि
तो भवतीति॥ प्रचि.॥ कौपिनाच्छादनं वासः कंथां शीतनिवारिणीं। पादुके चापि गृ
ह्णीयात्कुर्यान्नान्यस्य संग्रहं॥ यदि वा कुरु[illegible]ते रागादधिकस्य परिग्रहं। नरकं रौरवं ग
त्वा तिर्यक्योनिषु जायते॥ कौपीनयुगलं कंथा दंड एकः परिग्रहः। ततः परं महं सस्य न य
धिकं तु विधीयते॥ विशीर्णान्यमलान्येव चेलानि ग्रथितानि तु॥ कृत्वा कंथां ब[illegible]र्वा
सो धारयेद्धातुरंजितं। काषायं ब्राह्मणस्योक्तं नान्यवर्णस्य कस्यचित्॥ मोक्षाश्रमे सदा प्रो
क्तं धातुरक्तं च योगिनां॥ देवलः॥ आददीत प्रवृत्तेभ्यः साधुभ्यो धर्मसाधनं॥ नाददीत नि

वस्त्रेभ्यः प्रमादेनापि कंचन ॥ रथ्यायां बहुवस्त्राणि भिक्षां सर्वत्र लभ्यते । भूमिशय्या सुविस्ती
र्णा यतयः केन दुःखिताः । यतिधर्मसमुच्चये ॥ क्षौमं शाणं मयं वापि वासः कौन्तत कौशिकं
। आजिनं चापि धर्मज्ञः साधुभ्यस्तान पीडयत् ॥ उपानहं गृहीतव्यं कार्पासमयमव्कृत । कुशं का
शोद्भवं वापि यद्वान्यस्स्याद्याचितं ॥ सचेलः स्यादचेलो वा कंथा प्रावरणोपि वा ॥ एकवस्त्रेण वा
विद्वान व्रतं भिक्षुश्चारद्यथानायर्थे सुखदुःखाभ्यां शरीरमुपतापयेत ॥ स्तूयमानो न हृष्ये
त निंदितो न शपेत्परं । भिक्षादी न दद्यात्तु विकं धर्मयेदिति ब्राह्मणं ॥ वृद्धयाज्ञवल्क्यः ॥ दधि
दुग्धे गुणार्वाक्य तक्रे च दंतधावने । हविर्ब्राह्मणकाम्ये बुपुष्प मूलफलाशने ॥ नियमातिक्र
मो नास्ति ब्राह्मणानामनुज्ञया ॥ अध्यस्तमपुस्तकं विप्रं दत्तं गृह्णीत भिक्षुकः । नतावद्र्व्या
मादायल्लेखयेद्वा षट्दर्शनात् ॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ॥ हविर्ब्राह्मण

काम्याच गुरोर्वचनात्पोषधं ॥ अत्रिः ॥ स्नानं त्रिषवणं पात्रनियमास्फस्थिरं दण्डिनो । न तत्परमहंसा
२५ नां युक्तानामात्मदर्शिनां । स्नानं योगासनं योगस्तितितिक्षकोतश्रीलता ॥ ति: एष हवंसमव
चसम्प्रेताश्चैकदण्डिन: । आनृशंस्यं क्षमा सत्यं अहिंसा दम आर्जवं । प्रीति: प्रसादो माधुर्यम
क्रोधश्च यमा दश ॥ विष्णु: ॥ कोपीनाच्छादनार्थं तु वासोद्वयपरिग्रहं । कुर्यात्परमहंसस्तु
दण्डमेकं तथैव च ॥ पितामह: ॥ ग्रासाच्छादनादन्यत्र गृह्णीयात्कथंचन । यावदाहारायत्तावत्
प्रतिगृह्णीत नान्यथा । मदमा[illegible] । मदमापस्तथाच्छादनं पत्रं पुष्पं फलानि च ॥ असंव्य
तानि गृह्णीयात्र[illegible] वस्त्रानीह कार्यवान् ॥ दशव्रतान्यनुष्ठानाद्यति: कल्याणमश्नु
ते ॥ तेषामेवाननुष्ठानान्नर्कं समसमश्नुते । दशव्रतानि सर्वेषां यतीनां विहितानि च ॥ अ
हिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा: । अक्रोधो गुरुशुश्रूषदु: चशौचदुर्भुक्तिव ॥२५॥

ङ्गितं। वाङ्मनंकं यच्चेष्टासुप्रमादस्यच वर्जनं॥ मनुः॥ यथोक्तान्यपिकर्माणिपरिहाय द्विजो
त्तमः। आत्मज्ञानेशमेचस्यात् वेदाभ्यासेचयत्नवान्। वेदाभ्यासः प्रणवाभ्यासः। एकएव
म३ चरन्नित्यंसिद्ध्यर्थमसहायकः। सिद्धिमेकस्यसंपश्यन्नजहातिनहीयते॥ नाभिनंदे
तमरणंनाभिनंदेतजीवितं। कालमेवप्रतीक्षेतनिदेशंभृतकोयथा। कपालं
वृक्षमूलानिकुचेलमसहायता। समताचैवसर्वस्मिन्नेतन्मुक्तस्यलक्षणं॥ अ
त्रिः॥ परःपरमहंसस्तुतुर्याख्यः॥ श्रुतिशासनात्॥ शांतोदांतः सत्त्वसमः प्रणवाभ्यास
तत्परः॥ श्रवणादिरतः शुद्धो निदिध्यासनतत्परः॥ ब्रह्मभावेनसंपूर्यब्रह्माण्डमखिलं
स्थितः। आत्मन्येवात्मरतिः समलोष्टाश्मकांचनः॥ तत्त्वंपदैक्यबोधाच्चविमुक्तरू
पः स्वयंसदा। अथ एषनिष्ठस्याजितेंद्रियस्यसर्वेंद्रियप्रीतिनिवर्तकस्य। अध्यात्मवि

तागत मानसस्य ध्रुवा ह्य नाव त्रिरूपे द्व कस्यानि वसेत्यरमोहं सोयत्र क्कापि कथंचन ॥ नि
25 र्द्वंद्वो नियमस्थ स्वस्थः सर्वत्र समदर्शनः ॥ तुरीयः परमो हंसः साक्षान्नारायणो यतिः ॥ प्र
पंचमखिलं यस्तु ज्ञानाग्नौ जुहुयाद्यतिः । आत्मन्यग्नीन् समारोप्य सोग्निहोत्री तथेत
रः ॥ पराशरः ॥ तत्र परमहंसा नाम एकदंडधराः मुंडा अममा अपरिग्रहाः ॥ अयज्ञोपवी
प तिनः ज्ञानशिखा ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः ब्रह्मनिष्ठा आत्मरता आत्मन्दमा
आत्मानं सर्वेषां रूपं तदिति ब्रह्मचर्यमहिंसां च सत्यमस्तेयमार्जवं । वेदांतश्रवणं
ध्यानं निदिध्यासः कार्याणि नियमाः एकाकी निस्पृहस्तिष्ठेन्न केनापि सहालये । दयान्ना
रायणो ह्येव प्रतिवाक्यं सदा यतिः ॥ बृहस्पतिः ॥ आद्ये तिकं ब्रह्मचर्यमाश्रमत्रयवासिनो
स्वदारनियमा सम्यक् ब्रह्मचारी गृहाश्रमी ॥ मेधातिथिः ॥ स्मरणं कीर्तनं केलिः प्रे

क्षणं गुह्यभाषणं ॥ संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥ एतान्मैथुनमष्टांगं प्रवदंति
मनीषिणः ।विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं ॥ शंखः ॥ इष्टानिष्टेषु भोगेषु व्यसना
भ्युदयेषु च ॥ उपशांतां वदेद्वाचमपि बाणोर्हतो नरः सत्यां वाचमहिंस्रां च वदेदन
पवादिनीं। अतिवादांस्तितिक्षेत नान्यं शंसामपि शुनां। न चेमं देहमाश्रित्य वैरं कुर्वी
त केन चित् ॥ क्रुध्यंतं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ॥ जाबालः। भूतानां प्रियकारी स्या
न्नपरद्रोहकर्मधीः। न एव वशीकृता येन तेन देवा वशीकृताः ॥ मेधातिथिः ॥ भिक्षाटनं ज
पो ध्यानं स्नानं शौचं सुरार्चनं। कर्तव्यानि षडेतानि यतीनां नृपदंडवत् ॥ ध्यानं शौचं
तथा भिक्षा नित्यमेकांतशीलता। भिक्षोश्चत्वारि कर्माणि पंचमं नोपपद्यते विष्णुः ॥
आचार्येण समुद्दिष्टं लिंगं चैव समाश्रयेत् ॥ शौचमाश्रयसंबंधि न्यासिधर्मांश्चरे

26

दायेत्॥ अत्रिः। अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ। भावशुद्धिर्हरौ भक्तिः संतो
षः शौचमार्जवं। आहारशुद्धिर्वैराग्यमप्रमादो दयानृणां। अस्नेहो गुरुशुश्रूषा श्रद्धा
क्षांतिर्दमः शमः॥ श्रीस्तपो ज्ञानविज्ञानं योगाल्लब्धाशनं धृतिः॥ अदीनत्वमनुद्धर्षोऽ
ल्पधीः॥ समदर्शनं। मिष्टाटनं जपो ध्यानं त्यागः कर्मफलस्य च॥ एष स्वधर्मो विख्यातो य
तीनां मुक्तिमिच्छतां। अभ्युत्थानं प्रियालापं गुरुवत्प्रतिपूजनं। यतिनां वृत्तवृद्धानां स्वीय
धर्मानुवर्तिनां। कर्तव्यमन्यथा योगी स्वधर्मात्प्रच्युतो भवेत्॥ स्वधर्मस्थानयतीन्वृ
द्धानादवांश्चपूर्णा प्रद्यतिः॥ नान्यमाश्रमिणं किंचित्प्रशस्तमपि तं नमेत्॥ अपि शा
स्त्रसमायुक्तं सदाचारसमन्वितं। साधुवृत्तं गृहस्थाद्यं न नमस्येत्कश्चिद्यतिः॥ जात्या
लः॥ अविद्धः पंडकः पंगुरंधश्च बधिर एव च॥ मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न सं

112

शाय॥दृष्टमिष्टंमदनेनापियोऽश्नन्नपिनसज्जते।हितंसत्यंमितंवक्तितमजिह्वंप्रचक्षते॥
॥सद्योजातांयथानारींतथाषोडशवार्षिकीं।शतवर्षांचयोदृष्ट्वानिर्विकारःसषंड
कः॥भिक्षार्थमटनंयस्यविण्मूत्रकरणायच।योजनान्नपरंयातिसर्वथापंगुरेवसः।तिष्ठतो
व्रजतोवापियस्यचक्षुर्नदूरगं।चतुर्युगंभुवंमुक्त्वापरिव्राट्सोंधउच्यते॥हितंप्रियंमनो
रामंवचःशोकापहंचयत्॥श्रुत्वाचयोनशृणुतेबधिरःसंप्रकीर्त्तितः।॥सान्निध्येविषया
णांचसमर्थोविकलेंद्रियः॥सुप्तवद्वर्त्ततेनित्यंसभिक्षुर्मुग्धःसमुच्यते।ननिंदांनस्तु
तिंकुर्यान्नकंचिन्मर्मणिस्पृशेत्।नातिवादीभवेत्तत्रसर्वत्रैवसमोभवेत्॥नसंभाषेत्स्त्रि
यंकांचित्पूर्वदृष्टांनचस्मरेत्॥कथांचवर्जयेत्तासांनपश्येल्लिखितामपि॥स्त्रीणामवाच्य
देशस्यक्लिष्टनाडीव्रणस्यच।अभेदेपिमनोभेदाज्जनःप्रायेणवंच्यते॥विष्णुपुराणे

२७

॥ स्थूलशरीरमशोषणं श्लेष्मादीनां महाव्ययः॥ एककोतिशा मासोरध्यकमनीपादयोगुणाः॥
मांसास्थिकायविण्मूत्रस्नायुमज्जास्थिसंहितौ॥ देहे चेत्प्रीतिमान्मूढो भविता नरके
पि सः॥ अग्नेः सीतेनातायस्य तस्य भक्तस्य चक्षुधा क्रियते सुखकर्तृ चेतद्विलोकस्य म
चेतरे॥ दुःखलोपशमं तद्वतशीताद्युपशमं सुखं॥ मन्यते बालबुद्धिर्वा तद्दुःखमेव
हितत्पुनः॥ करोति हे दियसुताया वन्मात्रं परिग्रहं। तावन्मात्रं स एवास्य दुःखं चेत
सियच्छति॥ महाभारते गीतासु॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं। आचार्योपा
सनं शौचं स्थैर्यमात्मविनिग्रहः॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च॥ जन्ममृत्युज
रा व्याधिदुःखदोषानुदर्शनं॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु॥ नित्यं च समचि
न त्तत्वमिष्टानिष्टोपपत्तिषु। मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवि

॥२९॥

मरतिर्जनसंसदि ।अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं ॥ एतत् ज्ञानमिति प्रोक्तमज्ञानं य
दतोन्यथा ॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ॥ नैःकर्म्यसिद्धिं परमां संन्यासेनाः
धिगच्छति ।बुध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च । शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ
व्युदस्य च ।विविक्तसेवी लघ्वाशी जितवाक्कायमानसः ॥ ध्यानयोगपरो नित्यं वैराग्यं समुपा
श्रितः ॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं ॥ विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ब्र
ह्मभूतः प्रशांतात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥ भक्त्या मा
मभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ॥ अद्वेष्टा स
र्वभूतानां मैत्रः करुण एव च ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ संतुष्टः सततं
योगी जितात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ यस्मान्नोद्विजते

२८

लोकाल्लोकान्नोद्विजते चयः॥ हर्षामर्षभयोद्वेगैर्मुक्तोयः सचमेप्रियः। अनपेक्षः शुचिर्दक्ष
उदासीनोगतव्यथः॥ सर्वारंभपरित्यागीयोमद्भक्तः समेप्रियः। योनहृष्यतिनद्वेष्टिनशो
चतिनकांक्षति॥ शुभाशुभपरित्यागीभक्तिमान्यः समेप्रियः॥ समः शत्रौचमित्रेचँथामा त
नापमानयोः। शीतोष्णसुखदुःखेषुसमः संगविवर्जितः। तुल्यनिंदास्तुतिर्मौनीसंतुष्टोये
नकेनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मेप्रियोनरः। येतुधर्म्यामृतमिदंयथोक्तंप
र्युपासते। श्रद्दधानामत्परमाभक्तास्तेतीवमेप्रियाः। अमृतंचैवमृत्युश्चद्वयंदेहेप्रति
ष्ठितं। मत्येणासाद्यतेमृत्युः सत्येनासाद्यतेमृतं। नयज्ञफलदानादिनियमास्तारयंतिहि
।यथासत्यंपरेलोकेपुरुषंपुरुषर्षभ। अश्वमेधसहस्रंचसत्यंचतुलयाधृतं॥ अश्वमे
धसहस्राद्धिसत्यमेवविशिष्यते॥ असत्यमपिवक्तव्यंजीवब्राह्मणहितायवै। सत्यादपिहितंसत्यं ॥२८

नसंशयंमत्वमुच्यात।आयुस्तेजोबलंवीर्यंप्रज्ञाश्रीश्चमहद्यशः।पुण्यंचमत्प्रियत्वंचलभ्य
तेब्रह्मचर्यया॥बहिर्म्मप्रतियःकश्चिच्चक्रादेहस्थमीश्वरं।स्वगृहेपापसंयक्तामिदा
मटतिदुर्मीति॥व्यासः॥यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखं।तृष्णाक्षयसुखस्यैत
तेनार्हतःषोडशींकलां।नसुखंदेवराजस्यनसुखंचक्रवर्त्तिनः।यादृशंवीतरागस्य
मुनेरेकांतवासिनः।गर्भेव्याधिश्मशानेचपुराणेजायतेमतिः।साचेवचेत्सदातिष्ठे
त्कोनमुच्येतबंधनात्॥व्यासः॥प्राणायथात्मनोभीष्टाभूतानामपितेतथा।आत्मोप
म्येनसर्वत्रदयांकुर्वन्तिमानवाः।अपकारिणिचेत्कोपःकोपःकथंनते।धर्मार्थका कोपे
ममोक्षाणांप्रसह्यपरिपंथिनि।शोकोनाशयतिप्रज्ञांशोकोनाशयतिश्रुतं॥धृतिंवि
नाशयेच्छोकोनास्तिशोकसमोरिपुः॥रागांधाहिजनःसर्वोनपश्यतिहिताहितं।

29 रागं तस्मान्न कुर्वीत यदीच्छेदात्मनो हितं ॥ क्षमा तीर्थं तपस्तीर्थं तीर्थमिंद्रियनिग्रहं ॥ सर्व
भूतदया तीर्थं ध्यानं तीर्थमनुत्तमं ॥ एतानि पंच तीर्थानि सत्यं षष्ठानि सर्वदा ॥ देहि ति
ष्ठति सर्वस्य तेषु स्नानं समाचरेत् ॥ न तथा पुष्करे स्नाना न गयायां कुरुजांगले ॥ मुच्यते पुरुष
:पापाद्यथा स्नानक्षमादिषु ॥ निगृहीतेंद्रियग्रामा यत्र यत्र वसेन्नरः ॥ तत्र तत्र कुरुक्षे
त्रं नैमिषं पुष्कराणि च ॥ इदं तीर्थमिदं नेति ये नरा भेददर्शिनः ॥ तेषां विधीयते तीर्थ
गमनं तत्फलानि च ॥ सर्वं ब्रह्मेति यो वेत्ति न तीर्थं तस्य किंचन ॥ जाग्रत्स्वप्नसुषुप्तेषु ब्र
ह्मण्येव स वर्त्तते ॥ स्नानं मनोमलत्यागो दानं चाभयदक्षिणा ॥ ज्ञानं तत्वार्थसंबोधो ध्या
नं निर्विषयं मनः ॥ मनसश्चेंद्रियाणां चाप्यैकाग्र्यं परमं तपः ॥ तज्ज्यायः सर्वधर्मेभ्यः स ध
र्म्मः पर उच्यते ॥ भगवद्गीतासु ॥ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ॥ मनसे

विंद्रियग्रामं विनियम्य समंततः॥ शनैरुपरमेद्बुध्या धृतिगृहीतया। आत्मसंस्थं मनः
कृत्वा न किंचिदपि चिंतयेत्। यतो यतो निश्चरति मनश्चंचलमस्थिरं। ततस्ततो निय
म्यैतदात्मन्येव वशं नयेत्। वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि। एकीकृत्य वि
मुच्येत योगोयं मुख्य उच्यते॥ वेदव्यासः॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं तपः परं। क्षमा
दया च संतोषो व्रतान्यस्य विशेषतः॥ वायुपुराणे॥ आहारशुद्धिर्विनयः शौचमप्रति
कर्म च। सम्यग्दर्शनमित्येवं पंचैवोपव्रतानि च॥ यतिधर्मसमुच्चये॥ सर्वयज्ञेषु यद्दा
नं सर्वतीर्थेषु यत्फलं। सर्वदानफलं वापि नैतत्तुल्यमहिंसया। सत्यं ब्रूयात्प्रियं ब्रूया
न्न ब्रूयात्सत्यमप्रियं। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः। सत्यमपि वक्तव्यं गो
ब्राह्मणहिताय च। असत्यादपि हितसत्येन सत्यं सत्यमुच्यते। परमापद्गतेनापि न कार्यं

30 स्तेय अल्पेक:। स्तेयाद् अधिक: कश्चिन्नास्य धर्म इति स्मृति:॥ वायुपुराणे॥ द्वेषमूलं भ
यं यस्मात् द्वेषाभावे भयं कुत:। द्वेषश्च रागमूल: स्यात् ब्रह्मचर्येण नाशयेत्। ब्रह्मच
र्या ब्राह्मणस्य ब्राह्मणत्वं विधीयते। एवमाहु: परालोके ब्रह्मचर्यं विदो जना:। ब्रह्म
चर्ये स्थितं धैर्यं ब्रह्मचर्ये स्थितं तप:। ये स्थिता ब्रह्मचर्येण ब्राह्मणास्ते दिवि स्थिता
॥ व्यास:॥ गुरुमूला: क्रिया: सर्वा भुक्तिमुक्तिफलप्रदा:। तस्मात्सेव्यो गुरुर्नित्यं मु
क्त्यर्थं सुसमाहितै:। न कुर्यान्नियमारंभमनिवेद्य स्वकं गुरु। छायाभूतोपरिच्या
गी नियमेन वसेद्गुरौ। श्रद्धया परया युक्त: सदाद्वारदृशा सेव्ययो:। दंडप्रणामान्कु
र्वीत तद्देवता गुरुसंनिधौ। नातिक्रमेत मर्यादां गुरूणां या प्रकीर्त्तिता॥ गुरुशुश्रूषणं
नाम धर्मो ज्येष्ठ: प्रकीर्त्तित:। गुरोर्नैवाप्रियं कुर्यात्ताडितेपतितेपिवा। नाभासयेच्च ॥३०॥

तद्वाक्यं नावमानं समाचरेत्॥ आचार्यस्य प्रियं कुर्यात्प्राणैरपि धनैरपि। कर्मणा मनसा
वाचा सयातिपरमां गतिं॥ मनुः॥ गुरोर्यत्र परीवादो निंदा वापि प्रवर्त्तते॥ कर्णौ तत्र पिधा
तव्यौ गंतव्यं वा ततोन्यतः। गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत्॥ नारदः॥ न चैका
लोक्ति न हिंसा गुरुकर्मसु। सर्वत्रैवानुकूलः स्यादेतावानधर्मसंग्रहः॥ नारदाहार
दस्यनामपरोक्षमपि केवलं। नैव चास्यानुकुर्वीत गतिभाषणचेष्टितं। आपस्तंबः
॥ देवमिव आचार्यमुपासीत तिमद्बाधकत्वा ब्रह्मचारिधर्मो यतिभिरपि कर्त्तव्याः।
ब्रह्मचारिणि ये धर्मा गुरुशुश्रूषणादयः। ते सर्वे पि यतिनां स्युः स्त्रीणां भिक्षाविव
र्जिताः॥ इति॥ बह्वृचपरिशिष्टे तिदेशात्॥ मनुः॥ आस्यतामिति चोक्तः सन्नासीताभि
मुखो गुरोः॥ हीनान्नवस्त्रवेषः स्यात् सर्वदा गुरुसंनिधौ। उत्तिष्ठेत्प्रथमं चास्य चरमं

३।

चिव संविशेत् । प्रतिश्रवणसंभाषे शयानो न समाचरेत् । नासीनो न च भुंजानो न तिष्ठं
न्न पराङ्मुखः । आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः । नासीनो नासनस्थो वा नि
र्यं स्यात्कुहत्संनिधौ ॥ तथा ॥ गुरोर्गुरौ संनिहिते गुरुवत्‌वृत्तिमाचरेत् । न चातिसृष्टो
गुरुणा स्वान् गुरूनभिवादयेत् ॥ विद्यागुरुष्वेवमेव नित्या वृत्तिः स्वयोनिषु । प्रयस्तु
गुरुवद्वृत्तिं नियममेव समाचरेत् ॥ आपस्तंबः ॥ आहूताध्यायी च स्यात् । सदा निशा
यां गुरुं संविशेत् । तस्य पादौ प्रक्षाल्य संवाह्यानुज्ञातः ॥ संविशेत् ॥ मनुः ॥ अल्पान्नाभ्य
वहारेण रहःस्थानासनेन च । ह्रियमाणानि विषयैरिंद्रियाणि निवर्तयेत् । इंद्रियाणां
निरोधेन रागद्वेषक्षयेन च ॥ अहिंसया च भूतानाममृतत्वाय कल्पते । अवेक्षेत ग
तीर्नॄणां कर्मदोषसमुद्भवाः । निरये चैव पतनं यातनाश्च यमक्षये । विप्रयोगं प्रि ॥३१॥

योश्चैव सत्प्रयोगं तथा प्रियैः। आयाचाभिभवनं व्याधिभिश्चोपपीडनं। देहादुत्क्रम
णं चास्मात्पुनर्गर्भे च संभवं। योनिकोटिसहस्रेषु सृतीश्चास्यांतरात्मनः। अधर्मप्रभ
वं चैव दुःखयोगं शरीरिणां॥ धर्मार्थप्रभवं चापि सुखमक्षयमेव च। सूक्ष्मतां चान्ववे
क्षेत योगेन परमात्मनः। देहेषु चैवोपपत्तिमुत्तमेष्वधमेषु च। भूषितोपि चरेद्ध
र्मं यत्र तत्राश्रमे रतः। समः सर्वेषु भूतेषु न लिंगं धर्मकारणं॥ आश्रमलिंगो दंडादिभि
र्भूषितो युक्तः। अपि सत्त्वाविहीनोपि जीवपरमात्मानांतरकत्वानुसंधानेन लक्षणो धर्मं
चरेत्॥ तथा च याज्ञवल्क्यः॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनं। पुनरपि किं विशि
ष्टश्चरेदित्यत आह॥ यत्रेत्यादि॥ यत्राश्रमे आत्मदर्शनविरोधिभूतकर्म तत्साधारणो
पवीतादिलिंगे नास्ति। तत्र परमहंसवृत्तौ रतस्तात्पर्येणावस्थितः सन्निति॥ व्यासः॥ लिं

गे सत्यपि खल्वस्मिन् ज्ञानाप्रवर्हि कारणं । निर्मोक्षायेह भूतानां लिंगग्राहो निरर्थकः
तस्मादलिंगो धर्मज्ञो ब्रह्मव्रतमनुव्रतः । लिंगाभावात्तु कैवल्यमिति हि ब्रह्मशासनं पि
तामह ॥ गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत् । संदिग्धः सर्वभूतानां वर्णाश्रम
विवर्जितः ॥ अंधवज्जडवच्चापि मूकवच्च महीं चरेत् । संदिग्धः सर्वभूतानां लिंगाश्र
मविवर्जितः ॥ तं दृष्ट्वा शांतमनसं स्पृ[ह]हयंति दिवौकसः । वर्णो समाणां धर्मा हि देव
स्थानेषु कारणं । लिंगाभावात्तु कैवल्यमिति ब्रह्मानुशासनं । प्राप्तो धर्मेषु निरतो ल
घ्वाहारो जितेंद्रियः । संप्राप्तो ब्रह्मणः स्थानं यः परं प्रकृते ध्रुवं । वीतरष्टस्सं निरानंदो नि
रार्श्विं निः परिग्रहं । सर्वतः सुखमभ्येति जत्वा नीवमहोदधिं ॥ नायक्त्वा सुखमाप्नो
ति नात्यक्त्वा विं[द]ते परं । नात्यक्त्वा चाभयं शेते सर्वं त्यक्त्वा सुखी भवेत् । आत्मचिंताविनो । च्य

दनशौचक्रीडनकेनच॥ सर्वभूतसमत्वेन योगः सिध्यति नान्यथा। आत्मानेदश्च सततमा
त्मन्येवसमाहितः॥ यतश्चैवसुतृप्तश्च संतुष्टो नान्यमानसः। आत्मन्येवसुतृप्तश्च योगः सिध्य
ति नान्यथा। स्वप्नेपि योहि युक्तः स्याज्जाग्रतीवविशेषतः। ईदृक्चेष्टः स्मृतश्रेष्ठो वरिष्ठो ब्रह्म
वादिनां॥ पाराशर॥ स्नानेत्रिषवणं पात्रनियमास्पुत्रिदंडिनां॥ नतत्परमहंसानां युक्ताना
मात्मदर्शिनां सदिग्धः सर्वभूतानां वर्णाश्रमविवर्जितः। तेदृष्टाशांतमनसं स्पृहयंति दि
वौकसः॥ नाध्येतव्यं नवक्तव्यं नश्रोतव्यं कदाचन एवं ज्ञानपरोयोगी ब्रह्मभूयाय कल्पते॥
शंखः॥ पर्यटनशीलः स्यादात्मज्ञानार्थं तदवाथोद्धेमिकस्थानरतिस्तदभ्यासपरोनिक
देशेमूत्रपुरीषे चेति पौराणिकाः। निबद्धमौनेन चाबद्धमौनेन चापीह शुभाशुभी॥ भिक्षाशी
सर्वकालेषु तुल्यनिंदास्तुतिः क्षमी। निस्संगवदंभोधिः स्थितधीः सर्वदात्मवान्। सप्रः सर्वे

षु भूतेषु परहंसः स उच्यते ॥ कात्यायनः ॥ तत्र परमहंसा नाम एकदंडधरा मुंडाः कंथाकौपी
नवाससः । अव्यक्तलिंगा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरंतः । शिखायज्ञोपवीतत्रिदं
डकमंडलुकपालानां च त्यागिनः शून्यागारदेवगृहवासिनो न तेषां धर्मो नाधर्मो न सत्यं
नापि चानृतं सर्वे सहाः सर्वसमाः समलोष्टाश्मकांचनाः ॥ उपपन्नमात्राहाराः चातुर्वर्ण्यं
भैक्ष्यचर्यं चरंतः । आत्मानं मोक्षयंत इति अयाचितं यथालाभं भोजनाच्छादनं भवेत्तापर
छया च दिग्वाससा स्नानं कुर्यात्परेछया ॥ अथ ब्राह्मणलक्षणमाह ॥ व्यासः ॥ अनुत्तरीयव
सनमनुपस्तीर्णशायिनं बाहूपधायिनं शांतं तं देवा ब्राह्मणं विदुः । येन केनचिदाच्छन्नो येन
केनचिदाशितः । यत्र क्वचनशायी स्यात्तं दे० । कंथाकौपीनवाससो यो [illegible] दंडधृक् ध्यानतत्परः ।
एकाकी रमते नित्यं तं दे० निराशिषमनारंभं निर्नमस्कारमस्तुतिं ॥ आक्षीणं क्षीणकर्माणं

तं दे०। यन्मनाय स्तुनिर्विण्णो मरणेन तथैव च। आधिभिर्व्याधिभिश्चैव तं०। अहं हरिवगणाद्भी
तः सन्मानान्मरणादिव। कुणपादिव यः स्त्रीभ्यः तं०। येन पूर्णमिवाकाशं भवत्येकेन सर्वदा।
शून्यं यस्य जनाकीर्णं तं दे०॥ अथाध्यध्ययनं तपः शौचं वित्तं यस्य चतुष्टयं। स्मरणं चाद्वितीयस्य
तं देवा०। न जातिं कारणं तात गुणाः कल्याणकारणं। वृत्तस्थमपि चण्डालं तं दे०। परिबोधात्
परिच्छेदात् परिपूर्णावलोकनात्। परिपूर्णफलत्वाच्च परिव्राजक उच्यते। परं वा व्रजति नि
यं परं चोत्सृजते पुनः। हित्वा चित्त परं जन्म परिव्राडक उच्यते आत्मव्यतिरेकेण द्वितीयं
यो न पश्यति॥ ब्रह्मीभूतः स एवेह दत्तोपदात्र उदाहृतः। घटाकाशो घटे भग्ने यथैवात्मपरं
बरं। एवमेवं विधो भिक्षुः प्रयाति परमं पदं। वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि
एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते। सर्वं ब्रह्मेति यो वेत्ति नतीर्थं तस्य किंचन। जाग्रत्स्व

तां

प्रसुप्तेषु ब्रह्मण्येव समवर्त्तेत ॥ सर्वमन्यत्परित्यज्य बुध्या तन्निष्ठां गतः ॥ उपविष्टो व्रजंस्तिष्ठं
35 स्तन्मयः स्यात्समाहितः ॥ यो नित्यः सर्वगः सूक्ष्मश्चित्स्वरूपो निरंजनः ॥ देहेंद्रियमना
बुद्धिव्यतिरिक्तो हि भवेत्सः ॥ देहाबंधुसुहृन्मित्रपिंडप्राणमनो धियां ॥ पूर्वं पूर्वं त्यजेत्पश्चात्पर
मानंदमाविशेत् ॥ आत्मनिष्ठः सदा युक्तस्त्यक्तसर्वपरिग्रहः ॥ चतुर्थोयं तु विज्ञेयो ध्यान
नः भिक्षुरुदाहृतः ॥ ब्रह्मनिष्ठो भवेन्नित्यं यः परिव्राडतंद्रितः ॥ स ब्रह्म परमं प्रेत्य न वेदा जायते
पुनः ॥ इंद्रियाणींद्रियार्थेभ्यः प्रत्याहृत्य मनश्चलं ॥ प्रत्यगात्मनि संस्थाप्य ध्यानं कुर्याद्यतिः स
दा ॥ तावतैव पर्याप्तं भिक्षाचारकौतशीलिनः ॥ न तस्याप्रियतः कश्चिन्नियते स न कस्यचित्
॥ कोऽहं कस्य कुतो वेति कः कथं वा भवेदिति ॥ प्रयोजकमतिर्नित्यमेवं मासाद्याश्रमी भवेत्
॥ न तादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता चारशीलं स्थितिर्दंडनिधानमार्द्द

॥३५॥

वेतत्तत्त्वतश्श्रोपरमः क्रियाभवः ॥ कूर्मपुराणे ॥ शिवगीतासु ॥ प्राणायामस्तथा ध्यानं प्रत्याहारोथ
धारणा। समाधिश्च मुनिश्रेष्ठा यमो नियम आसनं। मय्येकचित्तता योगो। गाव्रत्स्यांतरनिरो
धतः। ते साधनान्यष्टधास्तु युष्माकं कथितानि तु। अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहो
। यमाः संक्षेपतः प्रोक्ताश्चित्तशुद्धिप्रदा नृणां। कर्मणा मनसा वाचा सर्वभूतेषु सर्व
दा। अक्लेशजननी प्रोक्ता त्वहिंसा परमर्षिभिः। अहिंसायाः परो धर्मो नास्त्यहिंसा
परं सुखं। विधिना या भवेद्धिंसा सा त्वहिंसैव कीर्तिता। सत्येन सर्वमाप्नोति सत्ये सर्वं
प्रतिष्ठितं यथार्थकथनाचारः सत्यं प्रोक्तं द्विजातिभिः ॥ परद्रव्यापहरणं चौर्यादथ
बलेन वा। स्तेयं तस्यानाचरणादस्तेयं धर्मसाधनं। कर्मणा मनसा वाचा सर्वाव
स्थासु सर्वदा। सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते ॥ द्रव्याणामप्यनादानमापद्य

35 पितर्थेच्छया। अपरिग्रह इत्याहुस्तत्प्रयत्नेन पालयेत्॥ तपः स्वाध्यायसंतोषः शौचमी
श्वरपूजनं। समासान्नियमाः प्रोक्ता योगसिद्धिप्रदायकाः॥ मनुः॥ द्रव्ययज्ञाज्जपयज्ञो
विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः। कौर्म्ये वेदांतशात
रुद्रीयप्रणवानां जपं बुधः। सर्वसिद्धिकरं पुंसां स्वाध्यायं परिचक्षते। स्वाध्यायस्य त्रयो
भेदा वाचिकोपांशुमानसाः। उत्तरोत्तरविशिष्टं प्राहुर्वेदार्थवादिनः। यः शब्दबोध
जननः परेषां श्रवणं तां स्फुटं। स्वाध्यायो वाचिकः प्रोक्त उपांशोरथ लक्षणं। ओष्ठयोः
स्पंदमात्रेण परस्याशब्दबोधकः। उपांशुरेष निर्दिष्टः साहस्रो वाचिको जपः। यत्प
दाक्षरसंयोगात्त्या [illegible] स्पंदविवर्जितं। चिंतनं सर्वशब्दानां मान
संतज्जपं विदुः॥ यदृच्छालाभतो नित्यमलं पुंसो भवेदिति। यावत्स्वाभस्वयः प्राहुः संतो

षं सुखलक्षणं ॥ बाह्यमाभ्यंतरं शौचं द्विधा प्रोक्तं द्विजोत्तमाः । मृज्जलाभ्यां स्मृतं बाह्यं
मनःशुद्धिस्तथांतरं । स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः । सुनिश्चला शिवे भ
क्तिरेतदीश्वरपूजनं । इंद्रियाणां विचरतां विषयेषु स्वभावतः । निग्रहः प्रोच्यते सद्भि
:प्रत्याहारः स सत्तमाः । हृत्पुंडरीके नाभ्यां वा मूर्द्ध्नि पर्वसु मस्तके । एवमादिषु देशेषु
धारणा चित्तबंधनं ॥ तेषामास्थितमालंब्य बुद्धेर्या वृत्तिसंततिः । प्रत्ययांतरैरसंसृ
ष्टा तद्ध्यानं सूरयो विदुः । एकाकारसमाधिः स्याद्देशालंबनवर्जितः । प्रत्ययो ह्यर्थ
मात्रेण योगशासनमुत्तमं । धारणा द्वादशायामा ध्यानं द्वादशधारणा ध्यानं द्वादशा
कं यावत् समाधिरभिधीयते । आसनं स्वस्तिकं प्रोक्तं पद्ममर्द्धासनं तथा । साधनानां
च सर्वेषां एतत्साधनमुत्तमं । ऊर्वोरुपरि विप्रेंद्राः कृत्वा पादतले उभे । समासीतात्मनः

पादाभ्यां तदासनमुत्तमं। एकं पादतलमेकस्मिन् विन्यस्योरुणि सत्तमाः। आसीनोर्द्धा
सनमिदं योगसाधनमुत्तमं। उभे कृत्वा पादतले जानूर्वोरंतरेण हि। समासीनात्मनः
36 प्रोक्तमासनं स्वस्तिकं परं। नद्यास्तीरे पुण्यदेशे देवतायतनेथवा। गृहे वा शुभे देशे
विजने जंतुवर्जिते। युंजीत योगी सततमात्मानं तत्परायणः। भगवद्गीतासु॥ शुचौ
देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं। चेलाजिनकुशोत्तरं। तत्र
एकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः। उपविश्यासने युंज्याद्योगमात्मविशुद्धये
। समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोक
यन्। प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसी
त मत्परः। युंजन्नेवं सदात्मानं योगी नियतमानसः। शांतिं निर्वाणपरमां मत्संस्थ

माधिगच्छति। शिवगीतासु ॥ सर्वकर्माणि संन्यस्य भिक्षाशीनिष्परिग्रहः। प्राप्नोति मम
सायुज्यं [illegible] गुह्यमेतन्मयोदितं ॥ मनुः ॥ प्रियेषु स्वेषु सुकृतमप्रियेषु च दुःकृतं वि
सृज्य ध्यानयोगेन ब्रह्माप्येति सनातनं। भवति च ब्राह्मणं ॥ तस्य पुत्रा दायमुपयंति सुहृदः
साधुकृत्यां द्विषंतः ॥ पापकृत्यामित्यादि ॥ योगानाममुख्यो जीवस्य ब्रह्मणैक्यं कृतः। यतः।
वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि। एकीकृत्य विमुच्येत योगायं मुख्य उच्यते ॥ मनुः
॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषं। प्रत्याहारेण संसर्गान्ध्यानेनानी
श्वरान्गुणान्। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो धर्मश्चा
ष्टौ सम्यक्दर्शनसाधनत्वेन विहिताः। एवं समाधिं वर्जयित्वानेन श्लोकेनोच्यंत
। सम्यग्दर्शनत्वेनैव तावत्संनिपत उदाहरिष्यामः। अहिंसासत्यमस्तेयं ब्रह्मचर्यम

37

संग्रहः । यमास्तु वै तु कथिता नियमानपि मे शृणु ॥ संतोषशौचस्वाध्यायास्तपश्चे
श्वरभावना । नियमाः कौरवश्रेष्ठ फलसंसिद्धिहेतवः । मेध्याप्रमाणमचलं सुखदा
यि शुभं शुचि । योगसंसिद्धये भूप योगिनामशनं स्मृतं ॥ प्राणायामस्तथा वायोः प्रा
ण्यङ्गादिधारणं । कुंभरेचकपूराख्यास्तस्य भेदास्त्रयो नृप ॥ इंद्रियाणां स्वविषयान्
बुद्धेः प्रत्येकशस्तु यः । करोत्याहरणं ज्ञेयः प्रत्याहारः स पंडितैः । शुभे ह्येकत्र विषये
चेतसो यच्च धारणं ॥ निश्चलत्वात्तु सा सद्भिर्धारणेत्यभिधीयते । पौनःपुन्येन तत्रै
व विषये सैव धारणा । ध्याननाम्नी लभते राजन् समाधिमपि मे शृणु । अर्थमात्रं तु य
द्ग्राह्यं चित्तमादाय पार्थिव । अर्थस्वरूपवद्भाति समाधिः सोऽभिधीयते ॥ इत्यादि ॥ प्रा
णायामप्रत्याहारधारणाध्यानानां रागद्वेषादिविषयसंस्पर्शपापपरतंत्रत्वादि ॥३७॥

गुणहानिस्थानांतरफलं। प्रधानफलं तु सम्यग्दर्शनमेवासम्यग्दर्शनफलं च श्रुतिस्मृ
तिप्रसिद्धं तरति शोकमात्मवित् स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति। तरति शोकं
तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवतीति। भिद्यते हृदयग्रंथिः छिद्यंते
सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे। अभयं वै ब्रह्माभयं हि वै
ब्रह्म भवति। य एवं वेद नेनं कृतेतत पतः॥ यं विदित्वा न लिप्यते कर्मणा पापकेन इत्याद्याः
श्रुतयः॥ मनुः॥ सम्यग्दर्शनसंपन्नः कर्मणा न स बध्यते। दर्शनेन विहीनस्तु संसा
रं प्रतिपद्यते। बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्ना
त्मा संबध्यते तथा॥ पिप्पलादश्रुतिः॥ ज्ञानाग्निः शुभाशुभं दहतीति॥ गीतासु॥ यथैधां
सि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ का

ठकोपनिषदि॥ याका वशी सर्वभूतांतरात्मा एकं रूपं बहुधा यः करोति। तमात्मस्थं ये
नुपश्यंति धीरा स्तेषां सुखं शाश्वतं नेतरेषां। सामवेदे तलवकारोपनिषदि यद्वाच
नभ्युदितं येन वागभ्युपद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। यन्मनसा न
मनुते येनाहुर्मनो मतं॥ तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। श्रोत्रेण शृणोति येन
श्रोत्रमिदं श्रुतं। यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यंति॥ तदेव ब्रह्म त्वं विद्धि नेदं य
दिदमुपासते॥ यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतं॥ तदेव ब्रह्म त्वं विद्धि नेदं यदि
दमुपासते॥ यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमु
पासते॥ बृहदारण्यके॥ प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो
ये मनो विदुः। ते निचिक्युर्ब्रह्म पुराणमग्र्यं॥ मनसैवानुद्रष्टव्यं। नेह नानास्ति किंच

न । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवं । विरज
परआकाशादज आत्मा महान्ध्रुवः । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्याया
द्बहूञ्छब्दान्वाचो विग्लापनं हि तत् । आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिछ
न्कस्य कामाय शरीरमनुसंज्वरेत् । यदैतमनुपश्यंत्यात्मानं देवमंजसा । ईशानं भूतभव्य
स्य न ततो विजुगुप्सते । यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः । अथ मर्त्योमृतो भ
वत्यत्र ब्रह्म समश्नुते । विज्ञानमानंदं ब्रह्म रातेर्दातुः परायणं । सत्यस्य सत्यमिति महद्भू
तमनंतमपारं विज्ञानघन एवातदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म
स वा एष महानज आत्माजरोमरोमृतोभयोमृतो ब्रह्माभयं ब्रह्माभयं हि वि ब्रह्म भवति य
एवं वेद । यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्तंमेव्याचक्ष्वेत्येष त आत्मा स

वीतरः कतमो याज्ञवल्क्य सर्वांतरः यो ऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति
।अथर्वणोपनिषदि। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपा
दं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीराः। ब्रह्मैवेद
ममृतं पुरस्तात्पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण अधश्चोर्द्ध्वं प्रसृतं ब्रह्मैवेदं विश्व
मिदं वरिष्ठं। एतद्यो वेद निहितं गुहायां सो ऽविद्याग्रंथिं विकिरतीह सोम्येति तैत्ति
रीयके। ब्रह्मविदाप्नोति परं सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्यो
मन् सो ऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति काठके। नित्यो नित्यानां चेत
नश्चेतनानामेको बहूनां यो विदधाति कामान्। तमात्मस्थं येऽनुपश्यंति धीरास्तेषां
शांतिः शाश्वती नेतरेषां। अशरीरं शरीरेष्वनवस्थितं। महांतं विभुमात्मानम

त्वाधीरो न शोचति। स्वप्नांतं जागरितांतं चोभौ येनानुपश्यति। महांतं विभुमात्मानं म
त्वाधीरो न शोचति। अंगुष्ठमात्रः पुरुषोंतरात्मा सदा जनानां हृदये संनिविष्टः। तं
स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमि
ति। उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधित। अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्य
मगंधवच्च यत्। अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते॥ विष्णुपु
राणे॥ विभेदजनके ज्ञाने नाशमात्यंतिकं गते। आत्मनो ब्रह्मणो भेदमसंतं कः करिष्य
ति। अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः॥ अविद्यातरुसंभूतबीजमेतद्द्वि
धा स्थितं। पंचभूतात्मके देहे देही मोहतमा गतः। अहमेतदितीत्युच्चैः कुरुते कुमति
र्मतिं। अनेकजन्मसाहस्रीं संसारपदवीं व्रजेत्। मोहश्रमं प्रयातो सौ वासनारेणुगुं

ष्ठितः।प्रक्षाल्यतेसदासौष्मारणुज्ञानाम्बुवारिणा।तदासंसारिपोथस्ययातिसोहमम:
त्रामं॥छ॥श्रीशंकराचार्यसुरेश्वराचार्ययोर्वचनानि॥अनात्मभूतेदेहादावात्मबुद्धि
स्तुदेहिनां।साविद्यातत्कृतोबंधस्तन्नाशोमोक्षउच्यते॥एकात्म्याप्रतिपत्तिर्यास्वात्मा
नुभवसंश्रया।साविद्यासंसृतेर्बीजंतन्नाशोमुक्तिरात्मनः।तत्त्वमस्यादिवाक्योत्थं
जीवपरमात्मनोः।तादात्म्यविषयंज्ञानंतदिदंमुक्तिकारणं।कोजीवःकःपरश्चात्मा
तादात्म्यंवाकथंतयोः।तत्त्वमस्यादिवाक्यंवाकथंतत्प्रतिपादयेत्।हेतुःपदार्थबोधो
हिवाक्यार्थावगतेरिति।अंतःकरणतद्वृत्तिसाक्षीचैतन्यविग्रहः।आनंदरूपःसत्य
सन्किंनात्मानंप्रपद्यसे।सत्यानंदस्वरूपंधीसाक्षिणंज्ञानविग्रहं।चिंतयात्मतयानि
त्यंत्यक्त्वादेहादिगांधियं।रूपादिमान्यतःपिंडस्ततोनात्माघटादिवत्।वियदादिम थि

॥६०॥

हाभूतविकारत्वाद्घटकुंभवत्।एवमिंद्रियद्रष्टाहमिंद्रियाणीति निश्चिनु।मनोबु द्धिस
थाप्राणोनाहमित्यवधारय।संघातोपितथानाहमितिदृश्यविलक्षणं।द्रष्टारमनुमा
नेननिपुणंसंप्रधारय।दे हेंद्रियादयोभावाहानादिव्यापृतिक्षमाः।यस्यसंनिधिमा
त्रेणसोहमित्यवधारय।अनापन्नविकारःसन्नयस्कांतवदेवयः।बुद्ध्यादीश्चालयेत्प्र
त्यक्सोहं०।अजडात्मवदाभांतियत्सांनिध्यज्जडा अपि।देहेंद्रियमनःप्राणाःसोहं०।आ
गमन्मे मनोन्यत्रसांप्रतंचस्थिरीकृतं।एवंयोवेदधीवृत्तं सोहमित्यवधारय।स्वप्नजागरि
तेसुषुप्तिंभावाभावोधियांतथा॥यो वेत्त्यविक्रियःसाक्षात्सोहं०।घटावभासकोदीपोघ
टादन्योयथेष्यते।देहावभासकोदेहीतथाहंबोधविग्रहः।यःसाक्षिलक्षणोबोधःत्वं
पदार्थःसउच्यते।देहेंद्रियमनःप्राणाहंकृतिभ्योविलक्षणः।प्रोज्झिताशेषषड्भावविकारवि

कारणत्वं पदाभिधः। समर्थ एवं निश्चित्य तदर्थं चिंतयेत्पुनः। अतद्व्यावृत्तिरूपेणासाक्षा
द्विधिमुखेन च। निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः। अदृश्यत्वादिगुणकः पराहृ
ततमोमलः। निरस्तातिशयानंदः सत्यप्रज्ञानविग्रहः। सत्तास्वलक्षणः पूर्णः परमात्मेति व
गीयते। सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता। वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधार
य। यतज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितं। मृदाद्यनेकदृष्टांतैस्तद्ब्रह्मे०। यदानं
त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ। तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मे०। विजिज्ञास्यतया यच्च
वेदांतेषु मुमुक्षुभिः। समर्थ्यतेतियत्नेन तद्ब्रह्मेत्यवधारय। जीवात्मना प्रवेशश्च नियं
तृत्वं च तान्प्रति। श्रूयते यस्य वेदेषु तद्ब्रह्मे०। कर्मणां फलदातृत्वं यस्यैवं श्रूयते श्रुतौ। जी
वानां हेतुकर्तृत्वं तद्ब्रह्मे०। तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिंत्यतेऽधुना। तादात्म्यमत्र

॥८४॥

वाक्यार्थस्तयोरेव पदार्थयोः। प्रत्यग्बोधे यस्माभाति सोद्वयानंदलक्षणः। अद्वयानंदरूप
स्य प्रत्यक्बोधैकलक्षण॥ ३॥ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्। अब्रह्मत्वं त्वमर्थस्य त
व व्यावर्त्तेत तदैव हि। तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु॥ पूर्णानंदैकरूपेण प्रत्यक्बो
धेवतिष्ठते। तत्वमस्यादिवाक्यं च तादात्म्यप्रतिबोधने। लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रव
र्त्तते। हित्वाद्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने॥ यथा प्रवर्त्तते स्माभिस्तथा व्याख्यान
मादरात्। आलंबनतया भाति योस्मत्प्रत्ययशब्दयोः। अंतःकरणसंभिन्नबोधः स त्वंपदा
भिधः॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः। पारोक्ष्यशबलः सत्याद्यात्मकस्त
त्पदाभिधः॥ प्रत्यक्पारोक्षितैकस्य सद्वितीयत्वपूर्णता। विरुध्यते यतस्तस्माल्लक्षणा सं
प्रवर्त्तते॥ मानांतरविरोधे तु मुख्यार्थस्य परिग्रहे। मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ती

।तन्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।सोयमित्यादिवाक्यस्थपदयोरिव नोपराऽ
हं ब्रह्मे।ऽतिवाक्यार्थबोधो य,वद्दृढी भवेत्।शमादिसहितस्तावदभ्यसेछ्रवणादिकं।
श्रुत्वाचार्यप्रसादेन दृढो बोधो यदा भवेत्।निरस्ताशेषसंसारनिदानः पुरुषस्तदा
।अहमेव परं ब्रह्म वासुदेवाख्यमव्ययं इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा भ
वेत्।सर्वोपाधिविनिर्मुक्तं चैतन्यं च निरंजनं।तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी
भवेत्।ब्राह्मण्याद्यात्मके देहो नात्मन्यात्मेति भावनां।श्रुते किं करतामिति वाञ्छ
नः कायकर्मसु।दग्धप्रारब्धाधिकारश्च ब्रह्मज्ञानाग्निना मुनिः॥वर्तमानश्रुतेमू
र्द्धिं ते वस्या द्दे द किंकरः।विदेहो वीतसंदेहो नेतिनेत्यवशेषितः।देहाद्यनात्महे
तूद्दतञ्चि यो विसतेपि नाऽज्ञानमनिराकुर्वन्ज्ञानामवन सिध्यति।विपन्नेकार ॥४२॥

कज्ञाने ज्ञानं कर्म न छिकते। स कृत्स्नकृत्याम ध्नाति क्रियाकारकरूपमत्। अज्ञानमा
गमज्ञानं सो गयं नास्त्यत्तानयोः। वर्त्तमानमिदं याभ्यां शरीरं सुखदुःखदं। आरब्धं पु
ण्यपापाभ्यां भोगादेवतयोः क्षयः। सामर्थ्यात्तु येन कर्मणा शरीरं प्रारब्धं तस्य वृत्तफल
त्वादुपभोगानिवर्त्तीयत्ता। अतो यान्यप्रवृत्तफलानी अतीतानेकजन्मकृतानि ज्ञा
नोत्पत्तेः प्राक्कृतानि ज्ञानसहतावीनि च। तान्येव सर्वाणि कर्माणि ज्ञानाग्निर्भस्मसा
कुरुतेति जीवन्मुक्तिप्रतिपादकश्रुतिस्मृतिसामर्थ्यादवगम्यते॥ तथा च श्रुतिः॥
सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण
इव तद्यथाहि निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदमित्याद्या॥ मनुः। यदा
भावेन भवति सर्वभावेषु निस्पृहः॥ तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतं। अनेन

४२ विधिनासर्वांस्त्यक्त्वासंगान् शनैःशनैः।सर्वद्वंद्वविनिर्मुक्तोब्रह्मण्येवावतिष्ठति
।विद्यायाविद्ययापरिकल्पितभेदत्वात्तंव्युदस्याद्वयानंदप्रकाशब्रह्मभावेनभवत्य
वतिष्ठतेयदाभावेष्वात्मस्त्वेवपर्येतेषुनिःस्पृहोभवतीत्यर्थः॥महाभारतेश्रीगीता
43 सुभगवद्वचनानि॥प्रजहातियदाकामान्सर्वान्पार्थमनोगतान्।आत्मन्येवात्मना
तुष्टःस्थितप्रज्ञस्तदोच्यते।दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः।वीतरागभ
यक्रोधःस्थितधीर्मुनिरुच्यते।यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभं।नाभिनंदति
नद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता।योगयुक्तोविशुद्धात्माविजितात्माजितेंद्रियः।सर्वभूता
त्मभूतात्माकुर्वन्नपिनलिप्यते।नैवकिंचित्करोमीतियुक्तोमन्येततत्त्ववित्।पश्यन्
शृण्वन्स्पृशन्जिघ्रन्गच्छन्नश्नन्स्वपंछ्वसन्।प्रलपन्विसृजन्गृह्णन्नु १२

न्मिषन्निमिषन्नपि। इंद्रियाणींद्रियार्थेषु वर्त्तंत इति धारयन्॥ प्रकाशं च प्रवृत्तिं च मोह
मेव च पांडव। न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति। उदासीनवदासीनो गुणै
र्यो न विचाल्यते। गुणा वर्त्तंत इत्येवं योवतिष्ठति नेंगते। समदुःखसुखः स्वस्थः सम
लोष्टाश्मकांचनः। सर्वारंभपरित्यागी गुणातीतः स उच्यते। प्रकृत्यैव च कर्माणि
क्रियमाणानि सर्वशः। यः पश्यति तथात्मानमकर्तारं पश्यति॥ यस्त्वात्मरतिरेव
स्यादात्मतृप्तश्च मानवः। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते॥ नैव तस्य कृतेना
र्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ छांदोग्ये। आ
चार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्य इति॥ व्यासस्मृ
तं॥ भोगेन त्वितरे क्षपयित्वाथ संपद्यत इत्युदाहृतश्रुतिस्मृतिसूचे ब्रह्म

५५ साक्षात्कारवतोऽजीवन्मुक्तस्य प्रारब्धकर्मक्षोपवशाच्छारीरं द्रियादेर्विदहकैवल्य
प्राप्तिपर्यंतमवस्थानं भवतीत्यवगम्यतां ॥ ॥ ॥ इति श्रीपरमहंसपरिव्राजकवि ॥
श्वेश्वरसरस्वतीविरचिते परमहंसपरिव्राजकधर्मसंग्राहे ज्ञानांतरंग ॥ श्री ॥ छ
धर्मसंग्राहः प्रथमः ॥ ॥ ॥ ननु आस्तिचिदाश्रमोचितधर्मेष्वधिकारोयं तेस्त्वाहितदं
गभूताभ्यां शिखायज्ञोपवीताभ्यां भवितव्यमेवाम्भेवं ॥ बहिर्भूतशिखायज्ञोपवी
ताभावेऽपि साम्नगस्य ब्रह्मचारिणः शिखाभावेपि वचनात्कर्मण्यधिकारवदधि
कारोपपत्तेः। आंतरशिखायज्ञोपवीतसद्भावाच्चाधिकारोस्त्येव ॥ तथा च आथर्वणी
श्रुतिः ॥ ज्ञानशिखा ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः। ज्ञानमेव परं तेषां पवित्रं ज्ञानमु
च्यते ॥ अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा। स शिखीत्युच्यते विद्वानितरा ॥४

केशाधमरिणद्इति। आरुणीश्रुतिः॥ सवल्वहं ब्रह्मसूत्रं सूचनात्सूत्रं ब्रह्मसूत्रमहाप
वितिविद्वारक्षि विसूत्रं च य ज्ञे छिद्वाय एवं वेदेति। आत्रिः॥ ज्ञानशिखाज्ञाननि
ष्ठाज्ञानयज्ञोपवीतिनः। ज्ञानमेव परं तेषां पवित्रं कामशोधनं॥ मैत्रायणीयश्रुतिः
॥ अयज्ञोपवीती त्रिः चनिष्ठं कामम् एकं विपावदं ड मादद्दीतेति शिखाज्ञानमयीय
स्य उपवीतं च तन्मयं॥ ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः। इदं यज्ञोपवीतं तु
न्या परमं यत्परायणं। स विद्वान्यज्ञोपवीती स्यात्स यज्ञस्तं यज्विनं विदुः। इदमेवास्पततय
ज्ञोपवीतं यत्र आत्मधर्मनं विद्या साक्षिको नीतेः सर्वत्रावस्थितेः कार्यं निवर्त्तये
दिति॥ अथ॥ ब्राह्मे मुहूर्ते उत्थाय मनसा वंतमात्मचैवेन स्मृत्वा मूत्रपुरीषोत्सर्गविधिं यथाकु
र्यात्॥ तत्र बद्धं च परिशिष्टे॥ ततस्तु दिशि नैर्ऋत्यां कर्त्स सूत्रचुरदड्डरवः। अंतर्धूय यत्तृणै
१७ उतिष्ठेत्पश्चोदेवागंजवयिक्षयाक्षसाः। पदियअंतिरं सत्जानं मलत्सागाय

45

भूमिं शिरः प्रावृत्य वाससा। वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः। कुर्यान्मूत्रपु
रीषे तु शुचौ देशे समाहित इति। कल्पसूत्र इत्येतत् गृहस्थादिविषयं। अन्यत्र साधा
रणं टेरे यज्ञियिः तृणगृहतमुपलक्षणार्थं तिरस्कृत्य वरकाष्ठपत्रलोष्टतृणानि वा
। नियम्य प्रयतो वाचं संवीतांगोऽवगुंठितः। प्रमे मूत्रपुरीषे तु दिवा कुर्यात् उदङ्मुखः। रा-
त्रौ तु दक्षिणे कुर्यात् उभे संध्ये दिवा यथा। इति। प्रत्यग्न्यादित्यं प्रत्यनिलं प्रतिगां प्रतिच
द्विजान् मेहंति ये च पथिषु ते भवंति गतायुषः। न मेहनं कुर्याद्भस्मनि न गोमये न च गोगोष्ठे
नोषरे न शाड्वलोप जीर्ण्यच्छायासु त्रातहस्तं वपि ग्रह्यमूत्रं कुर्याज्जलाश्रयात्। स्नातद्वयं
पुरीषं तु तीर्थे चैव चतुर्गुणं॥ छायायामंधकारे वा रात्रावहनि वा द्विज॥ यथासुखमु
खः कुर्यात्प्राणबाधभयेषु च॥ याज्ञवल्क्यः॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जै ॥६५॥

लैः। यावल्लेपगन्धक्षयकरं शौचं कुर्यादतन्द्रितः। उद्धृताभिरिति जलान्तः शौचनिषेधः। अत्र
गन्धलेपक्षयकरमिति सर्वाश्रमिणां साधारणमिदं शौचं॥ मत्स्याद्यादिनियमस्तु अदृ
ष्टार्थः॥ भरद्वाजः॥ अपदं रूष्या च विण्मूत्रं काष्ठलोष्टतृणानि नादद्यात् वामाउत्तिष्ठेद्
दं विध्वतमेहनः॥ अत्रिः॥ शुध्यर्थं च त्रिभिः काष्ठतृणैर्वापि निघर्षयेत्। यस्मिन्देशे च
यत्तोयं या च यत्र च मृत्तिका। सेवितत्र प्रशस्ता स्यात्तया शौचं विधीयते॥ विष्णुपुराणे॥ वल्मी
कमूष[illegible]को रवातां मृदं चान्तर्जलां तथा॥ शौचावशिष्टां गेहाच्च मृदं शौचे विवर्जयेत्
॥ विष्णुः॥ अन्तःप्राण्यवपन्नां च हलोत्खातां च नाहरेत्॥ मनुः॥ आहृतामन्यशौचार्थं वा
लुकां वां शुरूपिणीं। न मार्गान्नश्मशानाच्च नादद्यात्कुत्रचित्॥ यमः॥ आहरेन्मृत्ति
कां प्राज्ञः कूलात्ससिकतान्तु या। कूलस्य हलमुपलन्दानं। शुचिदेशात्तु संग्राह्या शर्कराश्मा

दिवर्ज्जितेति शातातपवचनात्। कपिलः॥ चतुरंगुलमृत्तिकाखननपरिग्रहेन दोषइ
46 ति॥ यमः॥ कृमेमूत्रपुरीषे तु पूर्वं गृह्णीत मृत्तिकां॥ पश्चादुत्क्रान्ति यो विप्रः सचैलो जल
माविशेत्॥ तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा॥ पैठीनसिः॥ अनुदकमूत्रपुरीष
करणे सचैलस्नानमिति। उदकपात्राभावे तीर्थेऽपि शौचमुक्तमादित्यपुराणे॥ अन्निमा
त्रे जलं ग्रह्या कुर्याच्छौचमनुद्धृतैः॥ पश्चात्तु शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्॥ मनुः
॥ यावन्नापैत्यमेध्याक्तात् गंधलेपश्च तत्कृतः। तावन्मृद्वारि देयं स्यात्सर्वासु द्रव्यशुद्धिषु।
उद्धृताभ्यां मृज्जलाभ्यां गंधलेपक्षयकरं शौचं विधमयादृष्टार्थं कुर्यात्॥ शातातपः॥ ए
का लिंगे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः॥ मूत्रशौचं समाख्यातं शुक्रे तद्द्विगुणं स्मृतं॥
॥ दक्षः॥ लिंगे तु मृत्समाख्याता त्रिपर्वे पूर्यते यथा। दातव्यमुदकं तावन्मृदभावो यथा ॥५६॥

भवेत्। एका लिंगे तिस्रो वामे उभयोर्द्वे तु मृत्तिके॥ पंचापाने दशैकस्मिन्नुभयोः सप्त मृ
त्तिकाः। एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः। वानप्रस्थस्य त्रिगुणं यतीनां च च
तुर्गुणं। अर्द्धप्रसृतिमात्रा च प्रथमा मृत्तिका स्मृता। द्वितीया च तृतीया च तदर्द्धार्द्धप्र
कीर्त्तिता। वामैकस्मिन्मृदो देया अर्द्धामलकसंमिता॥ उभयोर्हस्तयोर्देया पाद
मर्द्दे ना:॥ मनुः॥ एका लिंगे गुदे तिस्रस्तथैकत्र करे दश। उभयोः सप्त दातव्या मृदः
शुद्धिमभीप्सता। एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां। त्रिगुणं तु वनस्था
नां यतीनां च चतुर्गुणं। अत्रावशिष्टशौचमुक्तं वेदितव्यं। तच्छाश्रमभेदेन द्विगु
ण्याद्यभिधानं तद्विषयमेव एतदिति सर्वनाम्ना प्रकृत स्यैव परामृ
शौतात् द्विगुणादिसंख्यापेक्षं न परिमाणापेक्षं तस्या एव प्रकृतत्वात्। पादशौचे

उसंमि १

47

चपाकिंवमतत्पक्षिवपादयोर्द्दयमिति ब्रह्मपुराणवचनात्। यत्वेन्हारीतवचनं। ति
सृभिः॥पा दोप्रक्षालनयेदिति। तल्लेपगंधकायामितिवेदितव्यं। पंचापाने दशैकस्मि
न्नित्यादिसंख्याविद्धाषपाक्षैश्च क्षौपपद्मयाविकल्पितोविज्ञेयो॥मूत्रशौचंपुरस्कृ
यवृहच्छौचंसमाचारत॥पश्चाच्चे दशौचंतुशौचवद्धिरुदाहृतं। शौचेयत्नःस
दाकार्यः शौचमूलोद्विजःस्मृतः॥शौचाचारविहीनस्य समस्ता निःफलाः क्रियाः।
न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता। दक्षः॥यद्दिवाविहितं शौचं तदर्द्धं नि
शि कीर्त्तितं। तदर्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि॥देवलः॥धर्म्मविदक्षिणं ह
स्तमधःशौचे न योजयेत्। तथैव वामहस्तेन नाभेरूर्द्धं नाचरेत्। ततो मूत्रपुरीष
स्पर्श शोकापनोदायकटिशौचं कुर्यात्॥ तत्र विज्ञः॥ नाभेरधस्ताद्बाहुषु च काय ॥४७॥

६१४४

२पी४१

किर्मलैः सुराभिर्मध्याह्ने वा विपहात्तामृत्तोयैस्तद्दंतं प्रक्षाल्याचांतः शुद्ध्येदिति । ततो
धौतं कौपीनं परिधाय द्वादश गंडूषपूर्वकमाचम्य षट्प्राणायामान्कुर्यात् । तथा च
संप्रदायविद्वद्वचनं । वसित्वा धौतकौपीनं गंडूषान्द्वादशाचरेत् ॥ आचम्य प्रयतो भू
त्वा प्राणायामान्षडाचरेत् ॥ केवले तु लघुशौचे विशेषतः षट् गंडूषान् ततः कृ
त्वा प्राणायामत्रयं चरेदिति इति ॥ ७ ॥ अथ दंतधावनविधिः ॥ वृद्धशातातपः ॥ मुखे
पर्युषिते नित्यं भवत्यप्रयतो नरः ॥ तस्मात्सर्वप्रयत्नेन भक्षयेद्दंतधावनं । अप्रयतः
अशुचिः । १ भक्षयेदिति दंतसंबंधादुपचारेण दंतान्घर्षयेदित्यर्थः । अथैतु भक्षयेच्च
र्वयेन्नतु मुख्यार्थे बाधकाभावात् । भक्षणं च दंतकाष्ठाग्रस्य प्रशिथिलावयवतापाद
नपर्यंतं न तु निगिरणं । तथा च विष्णुः ॥ कनिष्ठाग्रसमस्थौल्यं सकूर्चं द्वादशांगुलं ।

२ नाद्यात्सूर्गीपत्का - - - - - - - स्तिवंयातिः॥ पर्यं चमांसव्रवञ्चादि संयुक्तमिपिमघवत्तु॥ नाद्य

- - - - - क्वार्थेचूर्णंचपत्रमेवचाणानिध्य पानांयतीसांचलं तो कुलं ग्रस चारि णां त्रै कर्मास

प्रातर्भुक्त्वा च यतवा कुर्यात्लयेद्दंतधावनं॥ सत्वचं चूर्णितागं यथा भवति तथा भक्षयेदि | स्पामि

न्यर्थः॥ एतद्दंतधावनं प्रातः संध्यायाः प्राक्कुर्यात्॥ यनेत्रं प्रक्षाल्य शुचिर्भूत्वा समाहितः॥ | लंमदि

परिजप्य च मंत्रेण भक्षयेद्दंतधावनं॥ नारदः॥ खदिरश्च करंजश्च करवीरकदंबकौ | समं॥

सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः॥ जंबूतिंदुकचूताश्च कदंबो लोध्र

पंचका॥ बदरीतिंदुका स्वेत प्रशस्ता दंतधावने॥ काविदारः करंजश्च कुटजप्ल

क्ष मालती॥ साली कोलप्रियंगुश्च तमालः शाकएव च॥ आम्रातकारिमेदश्च

प्रशस्ताश्चेपियेद्रुमाः॥ वर्ज्यानि शाल्मली पीलु भव्याकिंशुकतिंदुकाः॥ अरिष्टो

क्तः पारिभद्रो निंबतरुः गुग्गुलुस्तित्तिडी तथेति॥ विहितानामलाभे त्वनिषिद्धं

द्धाएव ग्राह्याः न तु निषिद्धाः॥ परिमाणमुक्तं नरसिंहपुराणे॥ अष्टांगुलेन मानेन | ॥ ४८॥

तत्र प्राणामिहोच्यातात्प्राक् दशमात्रमथवा तन दंतान्विशोधयेत् ॥ विष्णुः ॥ द्वादशांगु
लकं विप्रे काष्ठमाहुर्मनीषिणः । क्षत्रविट्शूद्र जातीनां नवषड्चतुरंगुलं । कंटकिक्षी
रवृक्षोत्थं द्वादशांगुलमव्रणं । कनिष्ठिकाग्रवत्स्थूलं तु चार्ग्रसकूर्चं पर्वकं । दंतधाव
नं चाग्रेणैव कर्त्तव्यं सत्वचं दंतकाष्ठं स्यात् तदग्रेण प्रधावयेत् । इति वचनात् । परिज
प्य च मंत्रेणानेन तु कृत्वा द्वादशप्रज्ञां च मेधां च वन्वनो धेहि वनस्पाते । इत्यनेन वा प्रणवे
न वा काष्ठमभिमंत्र्य दंतधावनं कुर्यात् । प्राङ्मुखः स्थितोपविष्टस्तु भक्षयेद्वाग्यतो न
रः । प्रक्षाल्य च शुचौ देशे दंतधावनमुत्सृजेत् । प्रक्षाल्य भक्षयेत्पूर्वं प्रक्षाल्यैव च
संत्यजेत् । अमां वर्जयित्वा दंतधावनं सदा कार्यं । अमावास्यामतेप्रतः भक्षयेद्दं
तधावनं । अमावास्यां तु नाश्रीयाद्दंतकाष्ठं कथं चन ॥ नरसिंहपुराणे ॥ अलाभे दंत

५९

काष्ठस्य प्रतिषिद्धे तथा दिने। अपां द्वादश गंडूषैर्मुखशुद्धिर्भविष्यति॥ वृद्धयात्तक
ल्कयः। इष्टकालोष्टपाषाणैरितरांगुलिभिस्तथा। मुक्त्वा चानामिकांगुष्ठौ वर्जयेद्दंत
धावनं। यमः। प्रथमं कृत्वा स्नानवेलायां योभक्ते दंतधावनं निराशास्तस्य गच्छंति देव
ताः पितृभिः सह। एवं दंतधावनं विधाय द्वादशभिर्गंडूषैर्मुखं संशोधयेत्॥ दशाद्वा
दशगंडूषैरद्भिः संशोधयेत् मुखं इति वचनात्॥ छ॥ ततो भस्मस्नानं कृत्वा वासुदेवं
चिंतयेत्। उक्तं च शिवगीतासु॥ भद्रात्मा मम्मयो भस्म ग्रहीत्वा ह्यग्निहोत्रजं तेनाघृ
ल्य तु सर्वांगमग्निरित्यादिमंत्रतः। चिंतयेत्स्वात्मनी ज्ञानं परं ज्योतिःस्वरूपिणं। ए
ष पाशुपतो योगः॥ पशुपाशविमुक्तये। अग्निरिति भस्म वायुरिति भस्म जलमिति
भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि भस्म

॥४९॥

नीत्यभिमंत्र्य प्रणवेन सर्वांगेषु निक्षिपेत् ॥ अत्र आरुणी श्रुतिः ॥ त्रिसंध्यमादौ स्ना
नमाचरेत्। संध्यां समाधायात्मन्याचरेदिति ॥ व्यासः ॥ प्रातर्मध्यंदिनयोः स्नानं वा
नप्रस्थगृहस्थयोः ॥ भिक्षूणां त्रिषवणं एकं तु ब्रह्मचारिणः ॥ सर्वे वापि सकृ
कुर्युरशक्तौ चोदकं विना। अशिरस्कं भवेत्स्नानमशक्तौ कर्मिणां सदा। आर्द्रेण वा
ससा वापि पाणिना वापि मार्जनं ॥ चतस्रो घटिकाः प्रातररुणोदय उच्यते। यती
नां स्नानकालोयं गंगांभः सदृशाः स्मृताः ॥ उषस्युषसि यत्स्नानं संध्यायामुदिते र
वौ। प्राजापत्येन तत्तुल्यं सर्वपापप्रणाशनं ॥ ब्रह्मांडपुराणे ॥ पृथिव्यां यानि तीर्था
नि तेषां स्नानस्य यत्फलं। विष्णोः पादोदकं मूर्द्ध्नि धृत्वा वै प्राप्नुयात् ॥ स्कंदपु
राणे ॥ अयमेव परो धर्मस्त्विदमेव परं तपः। इदमेव परं तीर्थं विष्णुपादांबु यः पिबे

50 त्।सचैवावभृथः स्नातः सर्वगंगाजलाप्लुतः।विष्णुपादोदकं [illegible] कृत्वाशं।स्वयःस्ना
ति मानवः।यतिपादोदकं राजन् हंति पापं पुराकृतं।सप्तजन्मार्जितं सद्यः श्रद्धया शि
रसा धृतं॥ बौधायनः॥ संध्यासु स्वमात्मानं प्रज्ञया च संधत्ते यच्चिंतयते वायमभिवर्द्ध
यते तस्मात् ध्यानमेव संध्योपासनमिति।प्रातर्मध्यंदिने काले स्नानं विधिवदाच
रेत्॥ स्रो चमाचमनं चैव संध्याध्यानमतंद्रितः।पुच्छायापररात्रेतु विण्मूत्रविधि
नोत्सृजेत्।श्रोचेत्कृत्वा यथाचम्य तदा स्तोत्रादिकं जपेत्॥ शयनादुत्थितो यस्तु
कीर्त्तयेन्मधुसूदनं।कीर्त्तनात् [illegible] स्य पापानि नश्यमायांत्यशेषतः॥ छ॥ अथ दंडमु
द्रासहितं गृही वा स्नानार्थं गच्छेत्।तथा च संप्रदायविदः।नागमुद्रा च धोध्मयोर्ध्य
नुमुद्रा नुमध्यतः।तृतीये दंडभागे तु धर्मयोर्पशुमुद्रिका।तस्याउपरि संध्ययोः शंखमु ॥५०॥

त र

द्रातुविस्मवी। धेनुमुद्रायां चाविशेषडकः॥ भागद्वयं विहायोर्ध्वे चतुरंगुलमानतः। दं
डंकार्य्यासमसूत्रेणावष्टधेसंप्रदायत इति तत एवंविधं दंडं दक्षिणकरागृहीत्वावामं
शिवस्वरूकृत्वा गुरोर्दक्षिणभागे स्थित्वा गुरुमभिवंद्य तदनुज्ञां प्राप्य गच्छेत्॥ उक्तं
च॥ अभिवंद्य गुरून् ज्येष्ठान् देवादीन् परिक्रम्य च। ब्रह्मा। ब्रह्माद्धिहिर्वामपादं दंडं स्थले
८ पुरोधेत॥ ततो निर्गम्य विप्रादीन् दृष्ट्वा दक्षिणतो व्रजेत्। ततो जलाशयं गत्वा गुरू
न् ज्येष्ठान् विलोकयेत्। तेषामधः प्रदेशे तु। शुचौ देशे कमंडलुं। संस्थाप्य वामं
वह्निं चैव कृत्वा विष्णुं स्मरेज्जले। ततो दंडस्य मूलेनैथाग्रेण स्पृशेज्जलं। कुर्याज्जलस्य ब त
हिश्शा। द्वानां वंदनं क्रमात्। ततो गुरूणां [illegible]ष्ठानां यतीनां वंदनं क्रमात्। ततः सं
स्थापयेद्दंडं मूलाग्रं जलमध्यतः। अथवा शुचिविस्थानादौ स्थापयेत्प्रागुदङ्मुखांत

उमे २

६।

त्रो मृदं समानीय यथोक्तं शुचिदेशतः। प्रक्षाल्यातीरसंस्थाप्य कुर्याद्वा गात्रयेत्ततः। त
तएकेन भागेन पादशौचं समाचरेत्॥ आचम्यान्येन भागेन कटिशौचं समाचरेत्। उ
ल्लोतक्तिसृभिर्मृद्भिः कटिं प्रक्षालयेत्ततः। कौपीनं तिसृभिर्मृद्भिः पुटं प्रयेवमेवतु
। गृहस्थस्यैव यच्छौचं तत्कार्यं यतिना ततः। आचम्य विधिना पश्चात् प्राणायामत्रयं च
रेत्। ततस्तु लौयिन्समायायं दुत्वा पाकमंडलुं। वामहस्ते स्यपृष्ठेनु संस्थाप्य स्नानमृ
त्तिकां। दंडं कमंडलुं चैव स्पृष्ट्वा चान्यद्यथाविधि। वामवस्त्रे तता दंडे स्थाप्यैव यथु
ऽशुचिच्छलेद दक्षिणे स्नानप्रदं संस्थाप्य विमृजेत्रिधा। चेलुकेऽन्तर्जलमादाय तद्ध
स्मिन निधाय च। प्रणवेन द्विषड्वारमभिमंत्र्य च तेन तां। संप्रोक्ष्य प्रणवेनैव द्विषाद्भिर्ना
भिमंत्रयेत्। ततः प्रथमभागानु गृहीत्वास्वल्पिकां मृदं। करान्यालिप्य सूर्याय प्रदर्शयेत्

ल५ ॥५१॥

ल्पयेच्च करौ पुनः किंचित्कस्मादाय हस्ताभ्यां रूपालिप्य च । सूर्याय दर्शयित्वा ऊर्ध्वमुखं करद्वौ
विलेपयेत्त् । ऊ जलेनाधो मुखं करद्वौ समालिप्य जलं स्पृष्ट्वा श्रोतं । एवं वारत्रयं कुर्यात्स्कु
न्धयोः रूपलेपनं । द्वितीयां किंचिदादाय हस्तयो रूपालिप्य च । सूर्याय दर्शयित्वा ऊ
लिंपेद्बालभुजौ हृदं । जलं स्पृष्ट्वा ततश्चैवं किंचिदादाय मृत्तिकां । हृदयमालभ्य चा
नाभेरालिप्य सलिलं स्पृष्ट्वा ततः । पुनश्चैवं समादाय पृष्ठ भागमालेपयेत्ततः । आपादान्तं जु
लं स्पृष्ट्वा दक्षिणेन करेण तु । तृतीयं भागमादाय वामे नाभौ विक्षोभयेत्ततो गायत्र्यांत
न्मुखो न्यस्य सूर्यदेवादि सन्मुखः । यस्य प्रसादादित्यादि मंत्रेण त्रिर्नमेत्कुरुं ततो दक्षिण
भागे तु स्थित्वा वदेत्ततं गुरुं ज्ञानां वंदनं कृत्वा प्रष्ठानुक्रमतः पुनः ॥ ततस्तां दक्षिणे
कृ. त्वा वामहस्तेन दक्षिणं । पादं स्पृष्ट्वा विक्षोत्तोयं नोभिद घ्रं शनैः शनैः प्रवाहाभिमुखो

नद्यामन्यत्र वा रविसन्मुखः । त्रिर्निमज्य तदं स्कंधे संस्थाप्य प्रागुदङ्मुखः । आचम्याद्विशि
रायम्य प्राणान्नोस्त्राभिमंत्र्य च । सत्रिकां पूर्ववत्तां च स्कंधमादाय हस्तयोः । उपालि
प्याथ सूर्याय चक्षुषोर्वीं प्रदर्श्य च । ललाटकंठहृदये क्रमेण वविलेपयेत । एवं वा
रत्रयं कृत्वा गृहीत्वा ज्ञाषमत्रिकां । प्रणवेनापग्मालोड्य कुर्यात्स्वङ्गमज्जनं । द्विराच
म्य त्रिशिरायम्य प्राणान्पश्चाद्यथाविधि । न्यासादिकृत्वा प्रणवं जपेदष्टोत्तरं शतं । अथ
वापि यथाशक्ति ततो ब्रह्मानुचिंतयन्नाम्नां तु केशवादीनां एकैकं नाम संस्मर
न्नामंक्राद्वादशवारं तु रश्मिणा वदनबाहुषु हृदये च निषिंचेत्तु त्रिस्त्रिः संख्यादंतु
द्रुया । जलेन तिलकं कृत्वा द्विराचमनपूर्वकं । कुर्यात गावा गुरुसमीपतः । तेषां पा
दोदकं सिंचेच्छिरस्यादिषु पूर्ववत् । ततस्तु त्रिः पिबेदेवं विष्णोः पादोदकेन च । ततः

प्रक्षाल्य कौपीनं निःपीड्य परिधाय च । ऊरू प्रक्षाल्य मृत्तोयैर्हस्तौ प्रक्षाल्य पश्चादा
।एकं पादं स्थले कृत्वा द्विराचम्य यथाविधि । प्राणायामत्रयं कृत्वा द्विषड्डुलमितं त्रित
ःजलैः संप्रोक्ष्य वस्त्रादीने गवस्त्रेण मार्जयेत् । ज्येष्ठानां सन्निधौ विद्वाननुपविश्य पु
मार्जनं ना कं ठादूर्द्ध्वं यतिः कुर्यादितरत्र यथासुखं ।मुखं चाष्टगुणेनादौ प्रादक्षिण्ये
न मार्जयेत् ॥ शिरश्चतुर्गुणेनैव मा नाभे द्विगुणेन तु । एवमेकगुणेनैव पादपर्यं
तमार्जनं । कौपीनसहितं दोरमादौ बध्नीत वा यतः । कौपीनमंगवस्त्रं च स्थले चो
प्युच्य निक्षिपेत् ॥ वामवस्त्रं ततः कृत्वा विसृष्टे चांगवस्त्रके । कौपीनमज्जुल्लक्षीः
प्युपादौ प्रक्षाल्य येन्मृदा । ततश्चाचम्य विधिवत्प्राणायामान् षडाचरेत् ॥ स्ना
न कृत हिंसादि प्रत्यवायनिवृत्तये ॥ अथोर्ध्वपुण्ड्रं तर्जन्या कुर्यात्स्नानत्रये यतिः ॥ प्र

53

चि

थमं धारयेन्मूर्द्धि प्रणवस्याद्यमात्रया। द्वितीयया ललाटे तु हृदये च तृतीयया। प्राणा
यामत्रयं कृत्वा संख्यादिन्यासपूर्वकं॥ प्रणवार्थानुसंधानतःपंचीकरणपूर्वकं। संध्यां तु वि २
धिवत्कुर्यात्क्रमात्संसमाहितः॥ अष्टोत्तरशतं वापि सहस्रं चाष्टसंयुतं प्रणवं तु
जपेत्पश्चात्प्राणायामत्रयं चरेत॥ ततो न्यासं विधायाप्सु पद्ममष्टदलं लिखित् संचिं
त्य सगुणं विष्णुं तत्र पंचोपचारतः। संपूज्य तर्पयेत्तत्र तारेणाष्टोत्तरं शतं। ततो दक्षि
णहस्तस्थितायं द्वादशवारतः॥ अभिमंत्र्य शिरः प्रोक्ष्य तथान्यदभिमंत्रितं। जलं पि
बेदथाचम्य द्वादशं प्रक्षालयेन्मृदा। कर्मयोग्यं च संस्थाथ कौपीनं क्षालयेन्मृदा॥
अंगवस्त्रं च घटिकांतयोः कृत्वा यथाविधि। वामहस्तस्य पृष्ठे तु संस्थाप्याचमनं चरे
त्। आर्द्रमुद्रां ततो बध्वा दंडमूले तु तर्पयेत्। ततो दंडस्य मूले तु प्रणवेनैव तर्पयेत्।

॥५३॥

।द्विषट्कं वा तथा गेहे तु तर्प्पयित्वा समुत्थितः। अन्ये तु त्रिस्त्रिताररणादेवर्षीन्दंडाग्रेऽपि
:पितॄंस्ततः। ततउत्थाय देहस्य प्रक्षालाग्राम्यास्पृष्टौ कुलं।जलादिगुरुवृद्धानां वंदने च
यथाक्रमं। कृत्वाभिषेकं देवस्य कृत्वा यायान्मठं प्रति। देवं संस्थाप्य विधिवत्तगुर्वा
नमभिवंदयेत्॥श्राषणायां गावस्त्रादि प्रसार्य च शुचिस्थले प्रागग्रमुदगग्रं वा दंडं न
मस्कारयेत्॥ध॥ततः पादौ प्रक्षाल्य द्विराचम्य शुचौ देशे विष्णुपूजा प्रणवजपश्र
वणादि कुर्यान्। तथा च संप्रदायविदः।गुरूपदिष्टमार्गेणाभ्यासध्यानादि वाचरन्॥
स्वयं पतित तुलसी पत्राद्यैः स्वार्हतेर्यतिः।गंधपुष्पाद्युपचारान् कृत्वा सुस्थित
आसने जपमालां गृहीत्वा तु प्रणवार्थमनुस्मरन्।जपेत् द्वादशसाहस्रं प्रणव
स्य प्रयत्नतः।सहस्रं श्रवणार्थं तु योगाभ्यासी शतं जपेत्। निर्विकल्पसमाधिसुन

54

जपेत्किंचिद्दद्व्यात्॥ नारदवचनं॥ भिक्षाटनं जपो ध्यानं स्नानं शौचं सुरार्चनं। कर्त
व्यानि षडेतानि यतीनां नृपदंडवत्॥ सुरार्चनमित्यनेन विष्णोः शिवस्य वार्चनमुक्त
तं। तयोरेव ज्ञानमोक्षप्रदत्वात् तथा च शौनकः॥ ज्ञानं महेश्वरादिच्छेन्मोक्षमि
च्छेज्जनार्दनात्। प्रणम्य दंडवद्भूमौ नमस्कारेण योऽर्चयेत्। स यां गतिमवाप्नोति न
सा क्रतुशतैरपि॥ कात्यायनः॥ त्रिकालमेककालं वा पूजयेत्पुरुषोत्तमं॥ व्यासः
॥ अन्यैरानीतकुसुमैरर्च्चयेज्जगदीश्वरं। शूद्रानीतैः क्रयक्रीतैर्नार्च्चयेद्विक्रिमा
न्यतिः। पक्कं च तुलसीपत्रं पुष्पं पर्युषितं च यत्। आनीयते तस्य यत्नेन पूजयेत्पुरुषोत्त
मं। भावपुष्पैर्यजेद्योगी बाह्यैर्वा श्रद्धया शिवं। तदर्थं पुष्पहिंसायां न भवेद्धिंसक
ः क्वचित्। विष्णोः पादोदकं जुष्टं निवेद्यस्य च भक्षणं। निर्माल्यं शिरसा धार्यं महापा

॥५४॥

तकनाश्नानं।यदिवाग्यमलोपः स्पाज्जपादिषु कथंचन।व्याहरेद्वैष्णवंमंत्रंस्म
रेद्वाविष्णुमव्ययं।कृष्णालयसमीपस्थानूकृष्णासेवार्थमागतान्।चंडालान्पति
तान्वाप्याथवान्स्पृष्ट्वानस्नानमाचरेत् पाद्य यः पूजयेद्धरिं चक्रेशालग्रामसमुद्भ
वे।राजसूयसहस्रेणतेनेष्टं प्रतिवासरं।महाकाष्ठस्थितोवह्नि र्मथितस्तेनेप्रकाश
ते।यथातथाहरिर्व्यापीशालग्रामप्रकाशते।विनातीर्थैर्विनादानैर्विनायज्ञै
र्विनामतिं।मुक्तिंयातिनरोवश्यंशालग्रामशिलार्चनात्।शालग्रामसमीपेतु
क्रोशमात्रंसमंततः।कीकटेपिमृतोयातिवैकुंठभुवनेनरः कपिलः प्रातस्ना
नेवस्त्रकृष्णाकापिलंस्नानमाचरेत्। तत्राश्वसामर्थ्ययुक्तेमंत्रस्नानंविधायताः
नामेरधःप्रविश्यपांसुकटिंप्रदाल्यमृज्जलैः।जलार्द्रकर्पटेनोगात्रंशोधनंकापि

थवा

55 त्वंस्मृतं।सायंप्रातरसामर्थ्येसायमेवाथपुनः।परिवर्त्यचाक्रोपीनेमंत्रस्नानंविधी
यात॥परत्रारः॥प्रस्नुरोगीशिरस्तेरोगीकंठतोकपालिकः।कंठस्नानंप्रकुर्वीतशिर गी २
रःस्नानफलंलभेत॥कालदोषादिसामर्थ्यान्निनक्षाक्रातियदाह्यसौ।ऋषिभिस्तु
तदाज्ञावामंत्रैर्दिष्टंतुमार्जनं।आग्नेयंभस्मनास्नानमवगाह्यंचवारुणं॥आपो
हिष्ठेतिब्राह्मंचवायव्यंरजसागवां।यत्तुसातपवर्षेहितस्नानंदिव्यमुच्यते।स्ना
नान्येतानिचापस्तुव्याधितस्योदकंविना।स्नानमथशक्तःस्नायीतनित्यमुष्णेनवा
रिणा।तिलाभ्यंगोनदुष्येतव्रतीनांवातरागिणां॥अत्रिः॥स्ना[illegible]नंत्रिषव
णंपात्रनियमाःस्युस्त्रिदंडिनां।नतत्परमहंसानांयुक्तानामात्मदर्शिनां॥मेधाति
थिः॥स्नानंत्रिषवणंप्रोक्तंबहूदकवनस्थयोः॥हंसेतुसकृदेवस्यात्परमहंसेनवि

।।५५।

द्युते ॥ अथ आचमनविधिः ॥ तत्र दक्षः ॥ प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदंबु वीक्षितं ।
संमृज्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं । संहतांगुलिभिः पूर्वमास्यमेवमुपस्पृशे
त् । अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं । अंगुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः
। कनिष्ठांगुष्ठयोर्नाभिं हृदयं तु तलेन वा । सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृ
शेत् । शंखः प्रक्षाल्य पादौ हस्तौ च संस्थाप्य चरणौ भुवि संनिबद्धकच्छशिखः ॥
स्मृत्वाचिवेष्टदेवतां । दक्षिणं तु करं कृत्वा गोकर्णाकृतिवत्पुनः । मुखमज्जनमात्रास्तु
संगृह्य त्रिः पिबेदपः । ब्रह्मतीर्थेन दैवेन पित्र्येणैव कदाचन । पीत्वा तु हस्तौ प्रक्षाल्य
पादावोष्ठावलोमकौ । वारिणांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं । तिसृभिर्मध्यमा
भिर्वा सर्वाभिर्वारिणा स्पृशेत् । अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं । अंगुष्ठानामि

56 कामयांतु चक्षुश्रोत्रे पुनः। कनिष्ठांगुष्ठयोर्नाभिं हृदयं तु तलेन वै। सर्वाभिश्च शि
रः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥ अपः स्पृशेत्तु सर्वत्र मध्यमे मध्ये द्विजातयः॥ अशक्त
स्त्रिचतुर्वापि पीत्वा प्रक्षालयेत्करं॥ मुखं प्रमृज्यऽपि विधिवत् नाभिं चैव तु संस्पृशेत्॥
यतिश्च ब्रह्मचारी च नाचामेच्चर्म[?] वारिणा। वानप्रस्थो गृहस्थश्चादेवे पित्र्ये च
कर्मणि। याज्ञवल्क्यः॥ अंतर्जानु शुचौ देशे उपविष्ट उदङ्मुखः। प्राग्वा ब्राह्मेण ती
र्थेन द्विजो नित्यमुपस्पृशेत्। शुचौ अशुचिद्रव्यासंस्पृष्टे देशेऽनुपानच्छत्रशा
यनासनादिनिषेधः। उपविष्टोऽनःस्थितः॥ ऽयानः प्रह्वो गच्छन्वा उदङ्मुखः
प्राङ्मुखो वेति दि[illegible]गंतरनिवृत्तिः॥ शुचौ देशाद्युचेतस्मात्पादप्रक्षालनप्राप्तिः
ब्राह्मेन तीर्थेन वक्ष्यमाणेन द्विजो न शूद्रादिः नित्यं सर्वकालमाश्रमांतरगतोपि उ ॥६॥

पस्पृशेदाचामेत्। कथमंतर्ज्जानुनी मध्ये हस्तौ कृत्वा दक्षिणेन हस्तेनेति कनिष्ठादे
शिन्यंगुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्। कनि
ष्ठायास्तर्जन्योश्च अंगुष्ठस्य च मूलानि करस्याग्रं प्रजापतिपितृदेवतीर्थानि यथा
नि ४ वेदितव्यानि त्रिः प्राश्नीयाद्योद्भिरुष्मज्ञा स्वाद्य द्भिः समुपस्पृशेत्॥ अद्भिस्सुप्रकृति
स्थाभिर्हीनाभिः फेनबुद्बुदैः। वास्त्रयमपः पीत्वा मुखमंगुष्ठमूलेन द्विरुन्मृज्य पश्चात्खा
निछिद्राणि ऊर्द्ध्वकायगतानि घ्राणादीनि अद्भिरुपस्पृशेत्॥ अद्भिर्द्रव्यांतरासंसृ
ष्टाभिः पुनरद्भिरिति ग्रहणं प्रतिछिद्रमुदकस्पर्शनार्थं पुनस्तास्वेव विशिनष्टि प्र
स कृतिस्थाभिर्गंधरूपरसस्पर्शांतरमप्राप्ताभिः फेनबुद्बुदरहिताभिः अनुष्णाद्वा दुष्टधर्म
रागतानो शूद्राद्यावर्जितानां च निषेधः। हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः।

57

शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः ॥ यमः ॥ अपः परनखस्पृष्टा यथा
चामति विद्विजः । सुरां पिबति विरक्तां यमस्य वचनं यथा । ऽहृद्या वामहस्तेन यः
पिबेद्द्वा स्मृणो जलं । सुरापानेन तत्तुल्यं मनुः स्वायंभुवो ब्रवीत् । करकालाबुका
ष्ठेन ताम्रचर्मपुटेन च । स्वहस्ताचमनं कार्यं स्निहृते पांश्च वर्जयेत् ॥ अलाबुदा
रुपात्रोच्छ नालिकेरैः कपिच्छाकैः । तृणकाष्ठजलाद्यैरन्यांतरितमन्मयैः ।
वामनोहृद्यवाचामेदन्यादानुरसं भवे ॥ भविष्यत्पुराणे ॥ सोपानकोजलस्थो
वा मुक्तकेशो पिवाद्विजः । उसीबीचापि नाचामेद्वस्त्रेणाच्छाद्य वा शिरः । नवाछन्न
ज्ञायानश्चन चलन्नपरानस्पृशन् । नहसन्नैव संजल्पन्नात्मानं नैव वीक्षयेन् । केशा
नीचीमधः कायं स्पृशन्नधरणीमपि । यदि स्पृशति चित्तानि भूयः प्रक्षालयेत्करं ॥ गोभिलः ॥

॥ ७॥

जानुभ्यामूर्द्ध्वमाचम्य जलेतिष्ठन्नदुष्यति ॥ पैठीनसिः ॥ अंतरुदक आचांतोंत
रेव शुद्धो भवति बहिरुदक आचांतो बहिरेव शुद्धः स्यात्तस्मादंतरेकं बहिरेकं
पादं कृत्वाचामन्सर्वत्र शुद्धो भवति ॥ बौद्धायनः ॥ पादप्रक्षालनेन शिष्टेन नाचामे
द्यद्याचामेद्भूमौ श्रावयित्वाचामेत् भूमौ श्रावणं वर्ज्योदकमात्रोपलक्षणं ॥
यमः ॥ तावन्नाप्रस्पृशेद्विप्रो यावद्वामेन संस्पृशेत् । वामे हि द्वादशादित्या वरुणश्च
द..शेश्वरः ॥ शौचशेषं पादशेषं पीतशेषं तथैव च । आमद्यतुल्यं तु तत्तोयं पर्युद
करणं विना ॥ आचमन..निमित्तानि ॥ मनुः ॥ ॥ सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्यो
क्त्वानृतं वचः । पीत्वापोध्येष्यमाणश्च आचामेत्प्रयतोपि सन् ॥ ब्रह्मपुराणे ॥ अ

५८
58

थवर्लस्यसंलापेसुप्तेवादंतधावने।आचम्यप्रयतोभूत्वा ततःशुद्धोभवेन्नर
:।अधवर्लेश्चांडालादिः॥यमः॥उत्तीर्योदकआचामेदवतीर्यतथैवच॥हारीतः॥
स्त्रीशूद्रोच्छिष्टाभिभाषणे आचामेत॥मूत्रपुरीषोत्सर्गदर्शनेदेवताभिगंतुका
मआचामेत।अथद्विराचमननिमित्तानि॥याज्ञवल्क्यः॥स्नात्वापीत्वाक्षुतेसुप्ते
भुक्त्वारथ्योपसर्प्पणे॥आचांतःपुनराचामेद्वासोपिपरिधायच॥यमः॥सकर्द
मेनुवर्षासुप्रविश्यग्रामसंकटं।जंघयोर्मृत्तिकास्तिस्रः पद्भ्यांचाद्विगुणाःस्म
ताः।एवंविधरथ्याप्रसर्पणे एवंविधप्रक्षालनानंतरमाचमनं।उदकाभावेआच
मनानुकल्पः॥बृहस्पतिः॥पितृमंत्रोच्चारणेद्रआत्मालंभे धमेक्षणे।अधमेवा
युसमुत्सर्गे आक्रंदे क्रोधसंभवे।मार्जारमूषिकास्पर्शेप्रहासेनृतभाषणे।नि ॥५८॥

मित्रेषु च सर्वेषु दक्षिणं श्रवणं स्पृशेत्। आर्द्रं तृणं गोमयं वा भूमिं वा संस्पृशेद्द्विजः
क्षुते निष्ठीवने चैव दंतोच्छिष्टे तथानृते। पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत्
॥ मार्कंडेयपुराणे ॥ कुर्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनं। कुर्वीतालंभनं वापि द
क्षिणं श्रवणस्य च। यथा विभवतो ह्येतत्पूर्वाभावे ततः परमिति ॥ आचमनापवा
दः ॥ याज्ञवल्क्यः ॥ स्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः ॥ मनुः ॥ दंतवद्दंतलग्ने
षु जिह्वास्पर्शे शुचिर्न तु। परिच्युतेषु च स्थानान्निगिरन्नेव तच्छुचिः ॥ शातातप ॥ दं
तलग्ने फले मूले अभुक्तप्राणाहुतीषु च। स्नेहे सोमे च दुर्दंडेन त्वोच्छिष्टो भवेद्द्विजः
॥ स्पृशंति बिंदवः पादौ य आचामयतः करात्। न तेनोच्छिष्टभावः स्यात्तुल्यास्ते भू
मिगाः सह ॥ छ ॥ अथ प्राणायामः ॥ शौनकपरिशिष्टे ॥ अथ प्राणायामान्व्याख्यास्या

५८ मोघावंयोरचकेमात्रास्तु द्विगुणाः पूरके विधातः कुंभके चातुर्गुण्यं ॥ अष्टमात्रो
रेचकः ॥ षोडशमात्रः पूरको द्वात्रिंशन्मात्रः कुंभक इति शिशुप्राणायामः । द्वा
5 पत्र दशमात्रो चकः । चतुर्विंशतिमात्रः पूरकः । अष्टचत्वारिंशन्मात्रः कुंभक इ
ति ॥ मध्यमः ॥ षोडशमात्रो रेचकः द्वात्रिंशन्मात्रः पूरकः । चतुःषष्टिमात्रः कुंभ
क इत्याद्यतिप्राणायामः ॥ अन्तरकालो मात्रा प्रायश्चित्ते चैतत्सर्वेषु द्रुतेषु ।
। रेचकं दक्षिणेन स्यात्पूरकं वामनासिके अंगुष्ठांगुलिभिश्चैवं प्राणायामं समा
चरेत् । प्राणायामिकनिष्ठस्य न किंचिदपि दुर्लभं ॥ मार्कण्डेयपुराणे ॥ लघुर्द्वाद
शमात्रस्तु द्विगुणः स तु मध्यमः । त्रिगुणाभिश्च मात्राभिरुत्तरीयउदाहृतः । श
त्यापेक्षयालघ्वादिव्यवस्था विवस्वतः । द्वादशावर्त्तनेयत्तु प्रणम्मनोहृदि ॥५९॥

वस्य

।प्राणायामोयतः प्रोक्तः प्राणानायम्यचोम्यिति ॥ कूर्मपुराणे ॥ प्राणस्तु देहजो वायुरा
यामस्तन्निरोधनं।मात्राद्वादशको मंदश्चतुर्विंशतिमात्रकः।मध्यमः प्राणसंरो
धः षड्त्रिंशन्मात्रिकोत्तमः।सगर्भमाहुः सजपमगर्भं विजपं बुधाः।रेचकः पूर
कश्चैव प्राणायामोथ कुंभकः।रेचकोजस्रनिःश्वासात्पूरकः सन्निरोधतः।सा
म्येन संस्थितिर्या सा कुंभकः ४ परिगीयते ॥ वसिष्ठः ॥ प्रणवेन चकुर्याद्वप्राणाया
मान्यतिर्मुहुः।सर्वेषामेव पापानां संघातस्समुपस्थितः।अभ्यसेद्दशसाहस्रं
प्रणवः।शोधनं हितत।रेचकं वाममार्गेण पूरकं दक्षिणे तथा।कुंभकं तु तयो
र्हृनिमध्ये संहृदि तिष्ठति।निरोधाज्जायते वायुर्वायोरग्निर्जायतातातोभ्यामापोभि हि २
जायंते ततोंतः शुध्यते त्रिभिः।चतुर्विंशतिमात्रस्त्रिषट्त्रिंशत्स्त्वद्वादशाप्यथवा प्र

णावस्थस्मरेत्स स्यात्प्राणायामीयतो निलः। भिन्नलक्षप्राणायामविधानं तु यथा
६१ या धिकारं द्रष्टव्यं परमहंसस्य तु प्राणायामः प्रणवयुक्त एव स्यान्नान्यः॥ कुतः॥ प्रण
वाभ्यासविक्षेपमानेदात्मस्थितिप्रियंवायतिं परमहंसाराध्यं यस्त्वं नार्चितुमर्हे
60 ति। तस्यादोषः स्यादितिशेषः॥ विदोव्यक्तस्तस्य मूलं प्रणवोपयस्यसोस्तिस
ः। वक्षमूलीयतिः स स्यात्यक्तवेदोपरिग्रहः॥ इत्यादिस्मृतेः॥ न चैतदूर्ध्वं समंत्र
वदाचरेत्यादिश्रुतिवचनविरुद्धमेतत्स्मृतिवचनेन। न विरुद्धं सर्वेषु वेदेष्वोंएव र
कप्रावन्तेत्यादित्यादिवेदवचने परमहंसस्यापि ज्ञाराणावन्तैर्विहितत्वादारण्य
भूतत्वात्प्राणवस्य परमहंसस्य प्रणवावन्तैर्वेदैर्न विहितत्वात्॥ मनुः॥ आत्मज्ञा
नक्रामेवस्याद्वेदाभ्यासे च यत्नवान्। वेदाभ्यासः प्रणवाभ्यासः। अतऊर्ध्वं समंत्र

ऽवद्याच्चादितिश्रुतिवचनंतुप्रणवव्यतिरिक्तप्रतिषेधार्थमित्यविरोधः।दह्यंतेध्मा
यमानानांधातूनांहियथामलाः।तथेंद्रियाणांदह्यंतेदोषाःप्राणस्यनिग्रहात्॥
प्राणायामैर्दहेद्दोषान्धारणाभिश्चकिल्बिषान्।प्रत्याहारेणसंसर्गान्ध्यानेनानी
श्वरान्गुणान्॥ ८॥ अथजपविधिः॥ योगयाज्ञवल्क्यः॥ उपांशुजपयोगस्तुतस्मा
च्छतगुणोभवेत्।सहस्रोमानसः प्रोक्तोयस्मात्ध्यानसमोहिसः।तस्माद्वाचिका
त्।नचंक्रमन्नचहसन्नपार्श्वमवलोकयन्।नापाश्रितोनजल्पंश्चनप्रावृतशिरो
स्तथा॥कूर्मपुराणे॥जपकालेनभाषेतनान्यानिप्रेक्षयेद्बुधः।नकंपयेच्छिरो
ग्रीवांदंतान्नैवप्रकाशयेत्॥व्यासः॥अंगुल्यग्रेषुयज्जप्तंयज्जप्तंमेरुलंघने।
असं-ख्यातंचयज्जप्तंतज्जप्तंनिःफलंभवेत्॥अनामिकायामध्येचमध्यम

छ्राधः क्रमेणानुतर्जन्याविजयां तु चाक्षसप्रान्ताकारास्थिता। मध्यमादिद्वयं
६१ वर्ज्यं जपकाले विपश्चिता। एतन्मेरुं विजानीयाद्दूषितं ब्रह्मणा स्वयं॥ शिव
पुराणे॥ अंगुल्या जपसंख्यानमेकमेकमुदाहृतं। रेखयाष्टगुणं विद्यात्पुत्र
जीविद्दशाधिकं। शतं स्यात् शंखमणिभिः प्रवालैस्तु सहस्रकं। स्फाटिके
र्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते। पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्य
ते। कुशग्रंथ्या च रुद्राक्षैरनंतगुणितं भवेत्॥ वाराहपुराणे॥ अक्षमालायाः परि
माणमुक्तं। उत्तमा तु शतं पूर्णं पंचाशद्भिस्तु मध्यमा। कनीसी पंचविंशाख्या परिमाणं नीय
विधीयते। बौद्धायनः॥ वृद्धमुलिको वेदसंन्यासी विदो वदन्नः प्रणवस्तस्य मूलं
प्रणवात्मको वेदः प्रणवं ध्यायेत् प्रणवो ब्रह्मभूयाय कल्पत इति होवाच प्र ॥६१॥

ज्ञापतिरिति ॥ वैवस्वतः ॥ पादमाक्रम्य पादेन जपं निवर्त्तु कारयेन्नुझिरः प्रावच्चाव
द्भिणाधमनंतं निवप्रशास्यति । धर्मपथे दत्तर श्रेष्ठ्यो वर्णो दुर्लभे पदात्मेदं शब्दार्थचिं
तनाभ्यासास्सउक्तो मानसो जपः ॥ पाद्मे ॥ परहंसव्रतिनस्तु प्रणवाभ्यासशीलि
नः यद्यनुत्पन्नविज्ञानो विरक्तः संयतेंद्रियः । यावज्जीवं जपेन्मंत्रं प्रणवं ब्रह्मलो
वपुः । हृस्वोद हतिपापानि दीर्घो मोक्षप्रदायकः । प्लुतस्तु सर्वसिद्धिः स्यात्प्रणवस्त्रि
विधः स्मृतः ॥ अकार ऋग्वेदः उ यजुर्वेदो मकारः सामसंज्ञिकः ॥ ॥ काठके ॥ सर्वे वे
दा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति । यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते प
दं संग्रहेण ब्रवीम्योमित्येतत् ॥ एतदालंबनं श्रेष्ठमेतदालंबनं परं । एतदाल
बनं ज्ञात्वा ब्रह्मलोके महीयते । यस्तु द्वादशसाहस्रं नित्यं प्रणवमभ्यसेत्तस्य

६२
62

द्वादशाभिर्मासैः परं ब्रह्म प्रकाशते ॥ अथ श्रवणविधिः ॥ तत्रैव यमितिकर्त्तव्यता
॥ कूर्मपुराणे ॥ आचम्य संयतो नित्यमधीयीत ह्युदङ्मुखः। उपसंगृह्य तत्पादौ वी
क्षमाणो गुरोर्मुखं ॥ मनुः ॥ हस्तौ सुसंयतौ कार्यौ जानुभ्यामुपरिस्थितौ। सं
हत्य हस्तावध्येयं स हि ब्रह्मांजलिः स्मृतः। ब्रह्मणः प्रणवं कुर्यादंते च वेदविद्वि
जः। इति चकारादादावपि प्रणवं कुर्यादित्यर्थः। स्रवत्यनाकृतं पूर्वं पुरस्ताच्च वि
शीर्यतः। इति वचनात् प्रणवमुच्चार्य सुमुखश्चैकदंतश्चेत्यादिना विघ्नराजं स्म
त्वा शन्नो मित्र इत्यादि शांतिं पठित्वा वेदांतग्रंथस्य संध्यास्थलेपठेत्। तथा चोक्तं
संप्रदायविद्भिः ॥ तथोपदिष्टं गुरुणा सह शांतिं पठेत् ततः ॥ संध्यापत्रं समादाय गुरु
वक्त्रं विलोकयन्नाक्षिप्ता तानामिति प्रोक्तिस्त्वयमध्यामिति ब्रुवनापदस्वार ॥६२॥

णसंध्यास्तोत्रं वा कवचमेकं पठेत्ततः। गुरुणा तस्य संदिष्टपतात्पर्यं वर्णितं ततः सतिं त
ता द्वादशादंडप्रणामान् कुर्यात्। तथा चाहुः॥ वेदांतशास्त्रसारं प्रेप्रणामा द्वाद
श स्मृताः। गुरोर्यथावदंते तु षट् प्रणामाः प्रकीर्तिताः। ततो यथाशक्ति पठित्वा
त पुनः प्रणवं कृत्वा तामेवशांतिं पठित्वा नमस्कारान् विधाय विरमेत्॥ किं ती
र्थैः किं प्रदानैर्वा किं यज्ञैः किमुपोषितैः। अहन्यहनि तां दवं तन्मयत्वेन सृष्ट एव
तां आत्मव्यतिरेकेण द्वितीयं यदि पश्यति। ततः शास्त्राण्यधीयते श्रूयंते ग्रं
थविस्तराः। श्रवणान्मनननाच्चैव निदिध्यासनतस्तथा। आराध्य सर्वदा ब्रह्मपु
रुषेण हितैषिणा॥ यथा खनन् खनित्रेण नरो वार्यधिगच्छति। तथा गुरुगतां
विद्यां शुश्रूषुरधिगच्छति। गुरुपूजा च सततं वृद्धानां पर्युपासनं। श्रवणं चैव शा

६३
63

स्त्रालोकृत्य रहस्यश्रेय उच्यते। आध्यात्मिकीं कथां मुक्त्वा नित्यचर्यां सुरस्तुतिं अनु
गृह्णन् पवित्रप्रश्नं वा यो जल्पो न्य उच्यते। ब्रह्मचर्यं समानि चाप्यहिंसा सत्यमार्जवं वै
दांतश्रवणं धर्मनैमित्तिकाः कार्याणि नित्यशः॥ गत एवं पदार्थविवेकाय संन्यासः स
र्वकर्मणां॥ श्रुत्याभिधीयते यस्मात् त्यागी पतितो भवेत्। भ्रांतिरन्योन्यमतिभि
र्मधुरस्वभावै ... रकत्वनिश्चितमनोभिरपेतमोहैः साद्धं वनेषु परमात्मपदस्व
रूपं शास्त्रेषु सम्यगनिशं विमृशंति धन्याः। नादत्ता मच कालोस्ति न हिंसा
गुरुकर्मणि। सर्वत्रैवानुकूलः स्यादेष धर्मस्य संग्रहः॥ ॥ व्यासः॥ यस्य देवे प
रा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः॥ याज्ञ
वल्क्यः॥ इज्याचार एव कमहं पदादि स्याद्वा मदाना। योगशास्त्रं च पत्योः तं ज्ञेयं ॥६३॥

योगमभीप्सता। चित्तवृत्तेर्विषयांतरतिरस्कारेणात्मस्थैर्यं योगः। तत्प्राप्त्यर्थमप्य
यद्बृहदारण्यकाख्यप्रादिग्यामतं तच्च ज्ञातव्यं॥ ॥तथा यन्मयोक्तं॥ योगशास्त्रं तदपि
ज्ञातव्यं। अनन्यविषयं कृत्वा मनोबुद्धिःस्मृतींद्रियं। ध्येय आत्मा स्थितो योऽसौ हृ
दये दीपवत्प्रभुः॥ संवर्त्तः॥ योगाभ्यासपरो नित्यमात्मविद्यापरायणः। सत्याश्रमे
र्विविज्ञास्य० समस्तैरेव भवेत्। दृष्टव्यस्तु ध्यातव्यः। श्रोतव्यश्च द्विजातिभिः। द्र
ष्टव्यो परोक्षीकर्त्तव्य आत्मा तत्रोपायं दर्शयति। श्रोतव्य इति। प्रथमतो वेदांत
श्रवणेन निर्णेतव्यस्तदनंतरं मंतव्यो युक्तिभिर्विचारयितव्यस्ततोऽसौ ध्याने
नापरोक्षीभवति। अप्रमनने दोषमाह॥ तद्विरीयश्रुतिः॥ तत्रैव मन्ये विदुषोऽम
त्वानस्येति॥ स्कांदे॥ विसम्वं चरितं पुण्यमायुरारोग्यपुष्टिदां पठतः श्रण्वतो वा

६४

64

पि सर्वपापं व्यपोहति ॥ गीतासु ॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यं
ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ व्याससूत्रं ॥ आवृत्तिरसकृदुपदेशात् । श्रवणादि
क्रियातावत्कर्तव्या दृढप्रयत्नतः । यावद्दृढोकृविज्ञानमाविर्भवति भास्वरं । इति
सुरेश्वरवचनेभ्यो वेदान्तश्रवणमनननिदिध्यासनानां ब्रह्मसाक्षात्कारोदयप
र्यन्तमावृत्तिः कार्या । काठकवचनाच्च । उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत श्रव
णायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः । आश्चर्यो वक्ता कु
शलोऽस्य लब्धा । आश्चर्यो ज्ञाता कुशलानुशिष्ट इति । अधिकारिणा क्रियमा
णानि श्रवणादीन्यसति प्रतिबन्धे इहजन्मन्येव ब्रह्मसाक्षात्कारं जनयन्ति सति
तु प्रतिबन्धके तत्क्षये जन्मान्तरे जनयन्ति ॥ तथा च व्याससूत्रे ॥ ऐहिकमप्रस्तुतप्र ॥६॥

तिबंधेत दर्शनात् इति। प्रतिबंधकं च कामकर्मणीति तथा च व्यासः कामएवमनुष्या
णांपिधमनेब्रह्मबोधने। तस्मात्कामं प्रयत्नेन धीमाञ्ज्ञानमाप्नोति मोक्षदं। ज्ञानमुत्प
द्यते पुंसां क्षयात्पापस्य कर्मणः। यथा दर्शतलप्रख्ये पश्यत्यात्मानमात्मनी
ति॥ ६॥ ततो मध्याह्ने पूर्वोक्तेन विधिना स्नानध्यानादि विधाय भिक्षाचर्यं च
रेत्॥ दत्तात्रेयः॥ याचितायाचिताभ्यां च भिक्षाभ्यां कल्पयेत्स्थितिं॥ माधूकरं
याचितं स्यात्प्राक्प्रणीतमयाचितं प्राक्प्रणीतमित्ययाचितादेदपक्वफलक्ष
णां माधूकरमथो कांमन्नं परहंसः समाचरेत्॥ उशनाः॥ माधूकरमसंकॢप्तं प्रा
क्प्रणीतमयाचितं तात्कालिकं चोपपन्नं भैक्ष्यं पंचविधं स्मृतं। मनःसंकल्प
रहितान्गृहान्त्रीन्पंचसप्त वा। मधुवदाहरणं यत्तन्माधूकरमिति स्मृतं॥ य

६५ 45 यतो ह्यापनात्प्राक्त प्रार्थितं भक्तिसंयुतैः । तत्प्राकृप्रणीतमित्याह भगवानुद्दा
नामुनिः ॥ भिक्षाटनसमुद्योगात्प्राक् केनापि निमंत्रितं । अयाचितं तु तद्भैक्ष्यं भोक्त
व्यं मनुरब्रवीत् । उपस्थाने नयत्प्रोक्तं भिक्षार्थं ब्राह्मणेन हि । तात्कालिकमिति ख्या
तं । तदन्नं व्यं मुमुक्षुणा । सिद्धमन्नं भक्तजनैरानीतं यन्मठं प्रति । उपपन्नं यदित्या
हुर्मुनयो मोक्षकांक्षिणः ॥ भिक्षा पंचविधा ह्येताः सोमपानसमाः स्मृताः ॥ तासा
मेकतमया वापि वर्तयन् सिद्धिमाप्नुयात् ॥ सकृद्भुंजीत संन्यासी न द्विवारं क
दाचन ॥ दिवा भुंजीत यदि न स्यात् रात्रौ भुंजीत नैव भाक्ष्य ॥ संप्रार्थितमुपस्थानादसं कु:।
क्लृप्तमयाचितं । तस्मादेकांतमध्यघात मिश्रान्माधूकरादरं । अयाचितं यथाला
भं भोजनाच्छादनं भवेत् । निमंत्रितो थवाश्रीयात् स्वगुणं न प्रकाशयेत् ॥ पराव्र ॥६५॥
समुच्चये वृद्धश्रौतस्मृते नृप... [illegible] ...तपेद्य स्कन्द गते
यथा नां बुभि; समुच्चये स्मृते: ॥

रः॥ यतीनामातुराणां तु वस्त्रं नोदीर्घोऽभिजितां। एकान्नेन न दोषोऽस्ति एकस्यैव
नैदिने॥ ऋतुः॥ सुजीर्णोऽतिवृद्धो योगी दशांताविकलेंद्रियः। पुत्रमित्रगुरु
भ्रातृपत्नीभ्यो भैक्षमाहरेत॥ एतत्सर्वं यतिविषयं॥ मनुः॥ जीवितात्ययमापन्नो
योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवांभसा॥ नापो मूत्रपुरीषा
भ्यां नाग्निर्दहनकर्मणा। न वायुस्पर्शदोषेण नान्नदोषेण मस्करी॥ परमहंसस्य तु
विशेषमाह॥ पितामहः। अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया। जोषयीत स
दा भोज्यं ग्रासमागतमस्पृहः॥ सौवर्णलाहरोप्येषु ताम्रादारुमयेषु चात्माश्र
न भिक्षुर्न दुष्येत दुष्यते तु परिग्रहात्॥ माधूकरमथैकान्नं परहंसः समाचरेत॥
वृहदारण्यके॥ अथ भिक्षाचर्यं चरंतीति॥ मैत्रायणी श्रुतिः॥ चीर्णविपावानू

६६

दंडानुदक्षितोपात्रौधारयेदेकं वायद्व कंतदासशिखंवपनंकृत्वाविसृज्ययज्ञो
पवीतंचत्रिषुवर्णेषुब्रैक्षाकागारंभैक्षमश्नीयान्माधुकरींवृत्तिं॥ काठकब्राह्मणं च
तुर्षुवर्णेषुभि[illegible]क्षाचर्यंचरेत्।पाणिपात्रेणाशनंकुर्यादोषधवत्प्राश्नी
यात्प्राणसंधारणार्थंयथामेदोवृद्धिर्नजायतेयादिः॥ मैत्रायणीयश्रुतिः॥
अथातःपरिव्राडेकशाटीपरिहितोमुंडोपाउदरपात्रारत्यनिष्ठोभिक्षा
र्थीग्रामंप्रविशेत्।सुसायंप्रदक्षिणोनावि। चिकित्सासार्ववर्णिकंभिक्षाच
रणमभिशस्तपतितवर्जमिति॥ आरुणीश्रुतिः॥ यतयोभिक्षार्थंग्रामंप्रविशं
तिपाणिपात्रमुदरपात्रंवा।ॐहिऊएतदुपनिषदंविन्यसेद्विद्वान्यएवंवेदसौ
षधवदशनमाचरेत्॥ इतिगोतमः॥ हविःप्राश्यपयथाचमन्यनिराहारोभवेज्जी

॥६६॥

।प्राश्नपाच समपतश्चाभिक्षुर्निराहारो गृहे गृहे॥ पात्रमस्य भवेत्पाणिः तेन नित्यं गृहान्न
टेत्। उदरपात्रविषाय यतिधर्मसमुच्चये विशेषः॥ आपन्न नु यदाहारं गोवन्मृगयते
मुनिः॥ अथास्य लोकः सर्वोऽयं सोऽमृतत्वाय कल्पते॥ मुंडकोपनिषदि॥ पाणिपात्र
मुदरपात्रं वा गेहे गेहे विशेत् कवलमात्र गोनापरं गच्छेद्यात्॥ पादपद्मे मुंजनू ग
च्छन्। कुलाकुलेषु सर्वत्र शीति॥ शौनकः॥ पाणिपात्रं चरन्योगी नासकृद्भैक्षमा
चरेत्॥ तिष्ठन्भुंज्याच्चरन्भुंज्यान्मध्ये नाचमनं तथा॥ शौनकगौतमप्रवचनाभ्या
माचमने विकल्पः॥ पराशरः॥ ग्रामैकरात्रवासिनः॥ नगरतीर्थावसथेषु पंचरा
त्रवासिनः। उदराद्दिपात्रिणः अपमिश्रास्त पतितवर्ज्जं चातुर्वर्ण्ये संचरंतः आत्मन्ये
नावतिष्ठंत इति॥ बौद्धायनः॥ ऋजिदंष्य वा सर्ववर्णेष्वेकान्नं वाद्विजातिषु॥ ननु
देवप्रजानथाधोदृंभोजनं च तथैव च यतिर्मन्यायपात्रेण सर्वकर्माणि कारयेत्॥ ततः शौ
चं न लः पनेसंध्योपासनमेव च [illegible] तपात्रं वीनशोध ३

६५

67

दरपात्रिणः परमहंसस्यनाह्यपात्राभावात्कथं भिक्षं माधूकरं ॥ उच्यते ॥ आपदि पा
त्रं गृह्णीयात् ॥ पाणिना शकलेन वेत्यादि वचनात् परमहंसस्यापि यतेः कदाचित्
दशप्रादुर्भावप्राप्तिः स्यात् तत्र रिक्तहस्तो गृहमागत यतौ किमर्थमागतो यमिति न
विदंति प्राकृताजनास्तत उपवासः स्यादेवं दिने दिने तस्मिन् प्रदशाइतीयमा
पत्स्यात् तस्यामापदि प्राप्तायाः शुचिशुचिदशाछिवेपवादि शाकलमादायशीले
पर्णपुटं वा कृत्वा तेनाग्रे क्षमादायाश्नीयात् । भिक्षं माधूकरीमश्नन्नपि परमहंसो
न निवेद्यं विसर्जयेत्कुतः । ग्रासाच्छादनादन्यन्न गृह्णीयात्कथं च नापि तु दृढम
सपू शौचं वातदद्धं भानुरेव चातस्वद्धं भोयीप्रोक्ता तद्दृढं पुत्रं मोटेयोः ॥ मासं पूर्ण सप्रस
वेनु मानुरपरवैतद्दशाहाधिकं ॥ यावदाहारये तावत्प्रतिगृह्णीतनान्यथेत्या

५२

दिवचनात्॥माधूकरं भिक्षांचरन्नसंकल्पितेषु गृहेषु चरेत्तदिदमुक्तं समागा॥ ग
णसंकल्पितानि चापद्धे भिक्षां विधूमे सन्नमुशले एकशाटीपरिहितो भिक्षेनैवेति
॥याज्ञवल्क्यः॥ यतिपात्राणिमृद्वेणु दार्वलाबुमयानि च॥ सलिले शुद्धिरेतेषां गो
वालेश्चावघर्षणं॥ मृदादि प्रकृतिकनि यतीनां पात्राणि भवेयुः॥ तेषां सलिलं
गोवालावघर्षणं च शुद्धिसाधनं॥ इयं च शुद्धिर्भिक्षाचरणादिप्रयोगाभूतानां
मेध्यमध्यूपहतविषयातदुपघाते द्रव्यशुद्धिप्रकरणोक्ता द्रष्टव्या॥ अत एव मनुना
गृहस्थः पाकभेदेन पात्रभेदे न मस्करी॥ नारिपुरुषभेदेन रौरवं नरकं व्रजेत्
॥ अतिजसानि पात्राणि तस्य स्युर्निर्व्रणानि च तेषामद्भिः स्मृतं शौचं चमसा
नामिवाध्वरे इति॥ चमसदृष्टांतोपादानेन प्रायोगिकी शुद्धिर्दर्शिता॥ पात्रांतरा

68

भावे भोजनमपि तच्चैव कार्यं। तद्विद्वे गृही द्विको। ततेन पात्रेणायेन वानूक्ष्मीमा
त्रया भुंजीत तद्दिवल्कं स्मरणात्। मत्स्यात्रं तु भिक्षांश्चिधमयथाऽप्यमेवातथास्त्रि
ष्टाचारदर्शनात्। कालो स्वपात्रभोजननिषेधस्य चाद्यापरादिषु गोष्ठेवपात्रभोजी
भवेद्युतिः। कालोनिवतुभुंजीत स्वपात्रे योगवित्तमः॥ इति ब्रह्मवचनेन कएवः॥
॥ताम्रे पात्रे च पाषाणमिति॥ अत्रि॥ मत्स्य वेत्ता नु भुंजं पात्रं विलवेतं तत्त्वो पलोताम्रे
पात्रे तथा ह्यो मंकात्रं पर्णे पुटं तथा। कृतानि यति पात्राणि ब्रह्मणा विश्वयोनिना॥
करे कर्पटके चैव कांस्यायसे ताम्रभाजने। भुंजंतभिक्षुर्न लिप्यते लिप्यंत गृहमेधि
नः। एव माहूय पर्णानि कृत्वा पर्णमयी पुटी। भिक्षार्थं पर्यटन् भिक्षुः स्त्रिजानसनक
दाचन॥ विष्णुः संस्कृत्य प्रणवेनाथ भिक्षापात्रं यथाविधि। भास्कराभिमुखो भूत्वा ॥५८॥

दिवसस्याष्टमे भागे मंदीभूते दिवाकरे ।। नक्तं चैव विजानीयात् न नक्तं निशि भो
जनं ।। नक्षत्रदर्शनात्क्ति नक्तं गृहस्थस्य विधीयते । यतेर्दिनाष्टमे भागे रात्रौ तस्य निषेधः १८
संस्मरन्मनसा हरिं । सव्येनादाय पात्रं तु दंडं वै दक्षिणेन तु । कपर्वः ।। नमस्कृत्य त
था दित्यं समाक्रांतमुपानहौ ।। सर्वदोपानहौ भिक्षुर्न त्यजेत्तु कदाचन ।। उदपा
त्रं च भिक्षाचर्यां वर्तनं उपानहौ । विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने । का
ले पराह्णे भूयिष्ठे भिक्षाटनमथाचरेत् ।। आदित्यपुराणे ।। मध्याह्ने भैक्षं चरे
न्नित्यं स्नायाच्चैवायतः शुचिः । एकवासा विशुद्धात्मा मंदगामी युगांतदृक् । यथा
लब्धं तदश्नीयात्पूजासत्कारवर्जितः ।। अत्रिः ।। अनिंद्यं विप्रजेहं नित्यं गेहं तु व
र्जयेत् ।। अनावृत्ते विशेद्द्वारि गेहे नैवावृते व्रजेत् ।। न वीक्षेद्द्वाररंध्रेण भिक्षा
लिप्सुः क्वचिद्यतिः । न कुर्याद्भिक्षुः क्वचित् घोषं न द्वारं ताडयेत् क्वचित् अत्रिः ।।
निवसव्यापसव्येन भिक्षाकाले व्रजेद्गृहान् । अनिंद्यातिक्रमे योगी प्राणाया

मत्रातंचरेत्॥मेधातिथिः॥अदुष्टापतितंसाधुयतिर्यैःपरिवर्जयेत्॥सतस्य
69 सुकृतंदत्वादुःकृतंप्रतिपद्यते।तथैवचगृहस्थस्यनिराशाभिस्तुकोगतः।
हुतंदत्तंतपोधीतंसर्वमादायगच्छति।असंस्कृतानुयाकन्याउदक्याश्चादिता
नुया।तयादत्तंनगृह्णीयात्।एवंजेनायसेनवा।पृथक्कृतानुयाभिक्षाघ्राता
मार्जारमूखकैः।वानापहताशुष्कान्नाभिक्षाचोपहताभवेत्॥शौनकः॥
पीडयित्वापिचात्मानमत्यान्नेसंप्रयच्छति।साभिक्षाहिंसिताह्रेयाताद
र्शीवर्जयेद्यतिः।पंचाहंसप्तरात्रंवा।यत्रभिक्षानलभ्यते।तत्रहंवर्जयेद्विद्वा
न्सुश्वंडालगृहवत्सदा॥अत्रिः॥हितंमितंसदाश्नीयाद्यस्तुखिन्नैवजीर्यते।
धातुःप्रकुप्यतितायनत्तदन्नंवर्जयेद्यतिः।यानुपर्युषिताभिक्षानाविद्येकल्पि ॥६९॥

तानुयात्ताम्रभोज्यां विजानीयाद्दाता च नरकं व्रजेत् ॥ [illegible] ॥ विप्र
स्याय सेनानुपात्रेण यदन्नमुपदीयते । भोक्ता विष्ठासमं भुंक्ते दाता च नरकं व्र
जेत् ॥ छ ॥ अथ भिक्षाप्रशंसा ॥ विष्णुः ॥ न भिक्षा याभवेद्दानं न च भिक्षा प्रतिग्र
हः । सोमपानसमा भिक्षा तस्माद्दहरेह श्रवेत् ॥ शातातपः ॥ भिक्षा माधूकरी
नाम सर्वपापप्रणाशनी । अवधूता च पूता च सोमपानं दिने दिने । भिक्षाहारो
नित्याहारो भिक्षा नैव प्रतिग्रहः ॥ भिक्षान्नभोजनेनैव सोमपानं दिने दिने । त
स्मात् कांचनवर्णेन गवां मूत्रं पावकयोः । पिबेद्द्वादश वर्षाणि नतु भैक्षसमं भवेत्
॥ श्रोत्रियान्नं च भैक्षं च हुतशेषं च यद्धविः । आनखाच्छोधयेत्पापं तुषाग्निरिव कां
चनं । गंगायाः सलिलं पुण्यं शालग्रामशिला तथा । भिक्षान्नं पंचगव्यं च प

70

विज्ञातिषु गेयुगो ॥ कएवः ॥ अह्निंदुं यः कुर्याग्रेणमासि मासि समश्नुते ॥ निरपेक्ष
सुभिक्षात्री सनुतस्माद्विद्वि ष्यात ॥ मेधातिथिः ॥ आकार्प्य एवं नुबद्धं त्नेमेन्यात
यत्र मान्याः ॥ निरीक्षेत चनुद्विग्ना त्तद्धं हं यन्नतो व्रजेत् ॥ प्रचेताः ॥ गोदोहमव
णकं वा सतु पेषणमेव वा । एककालं प्रतीक्ष्येत दर्शनेन विनायतिः । हूलमेकं
नातिष्ठेद्गृहिणां दर्शनाद्यतिः । संभूमं चनचे ह्रेत भिक्षादानार्थमुत्तमं ॥ नकु
र्वीत न कंपेत न हूं ब्रोन्निव कुस्सयेत । अतिक्रम्य गृहं लोभान्न पुनस्तत्गृहं वि
शेत ॥ यावतोदरपूर्तिः स्यात्तावद्भैक्षं समाचरेत ॥ सिद्धमप्यधिकं भिक्षुः साद
दानाद्रडाययधः ॥ क्रतुः ॥ पंचसप्तगृहालां च भिक्षामिच्छेत्क्रियावतां । गोदो
हमात्रमाकांक्षीनिः क्रांतो न पुनर्विशेत ॥ वसिष्ठः ॥ ब्राह्मणकुले वा यल्ल

॥७०॥

भैक्ष्तत्तद्वर्जितं मधुमांसवर्जं सायंप्रातर्न चरेद्व्यादिति। सायंप्रातरिति तु
अशक्तभिक्षुविषयं। एककालं चरेद्भैक्ष्यमित्यादि बहुवचनविरोधात्
बह्वन्नं पच्यते यत्र मन्यते यत्र मानवाः। अनुद्विग्नाः प्रयच्छंति तं देशं यतिर्
व्रजेत्॥ ७॥ भिक्षाटने प्रकुर्वाणो ह्यमेध्यश्वादि वा स्पृशेत्। भिक्षां
गृहीत्वा स्नात्वा च प्राणायामान् षडाचरेत्। अमेध्यनिचयं त्वेव स्पृष्ट्वा
दवलकं प्रीताः सपात्रो विधिवत्॥ स्नात्वा विष्णुं ध्यात्वा वि[illegible] शुध्यति॥ उ
दक्यारावचांडालचोरनग्नकपालिभिः। स्पृष्ट्वा भिक्षोत्सृजेद्भिक्षुः सचेलोऽव
लन्माविशेत्॥ पादत्राणस्थितो पादावस्पृश्यं स्पृशते यदि। पादत्राणपरित्यागा
आचांतः शुचितामियात्॥ विना दंडोदपात्रं तु न गच्छेद्यतिसत्तमः। भिक्षा

अप्रमत्तश्चरेद्भैक्षं सायाह्ने नाभिलक्षितः॥ रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः॥

कालेदंडमेकेनोदपात्रं कदाचन॥ याज्ञवल्क्यः॥ अप्रमत्तो वाक्चक्षुरादिचा
पलरहितः। नक्तात्परश्चोपवास उपवासादयाचितं। अयाचितात्परं भैक्षं
तस्माद्भैक्षेण वर्तयेत्॥ अत्रिः॥ निवसच्चापसव्येन भिक्षाकाले व्रजेद्गृहान्
अनंतरं क्रमाद्भिक्षां प्रशस्तां न तु कीर्तयेत्॥ संभवे बहुगेहानां न तु तेष्वेव
नियमः। भिक्षाटनमुपक्रम्य कचिद्भिक्षामनाप्तेऽसमुक्ता। नातिक्रामेद्गृहं
मोहाद्यत्र बाधो न विद्यते। गृहातिक्रमणं कुर्याद्यश्चैलोभादिनायतिः। प्राणा
यामशतं कुर्यात् प्रायश्चित्तं तथा यतिः। नक्तभोजी भवेद्भिक्षुर्मोक्षधर्मानुशा
सनात्॥ भक्षार्थमन्नं दिवादाय रात्रौ तोयाचादिकं यतिः॥ भक्षार्थमन्नं सदा भिक्षु
रात्रौ चापि नाहरेत्कचित्। निशायाः प्रथमे यामे जपहोमार्चनं स्मृतौ॥ स्वा ॥९॥

धस्य यो भोजनं प्रोक्तं वर्जयित्वा महानिशां । पश्चिमे तु तथा यामे ब्रह्माभ्यासो वि
धीयते ॥ जपस्नानादिकं होमो वर्जयित्वा तु भोजनं । देवो ध्याने साधुगृहे महा
लयसरित्सु च । गात्रागत्क्षेत्रदुष्टेत तटाके विमले ह्रदे ॥ जमदग्निः ॥ अश्व
न्माधूकलीमिदां निवेद्ये तु विसर्जिते ॥ परमाकं । नग्रक्लीयां किंचिदन्नमु
पस्थितं । सर्वमाधूकरं रूपे निवेद्ये भगवति समर्पिते सतीत्यर्थे ॥ व्यासः ॥
श्रद्धधस्तनस्यभोक्तव्यं चोरस्यापि विशेषतः । न त्वेवं बहुयाज्यस्य यश्चोपनय
ते बहून् ॥ अत्रिः ॥ उद्यतामाहृतां भिक्षां पुरस्तादप्रचोदितां । भोज्यां प्रजापति
र्मेने अपि दुष्कृतकारिणः ॥ दत्तात्रेयः ॥ कृते तद्दशीयजेद्धृ मंत्रेतायां द्वापरे कुलं
कर्त्तारं तु कलौ दुष्टं त्यक्तामिदं चरेद्धृतिः ॥ भिक्षादन्यन्न याचेत न चैवोपवि

२ ग्रामान्यनूपास्त्वगोन्नं तत्स्त्रोवकण्णा भवेत् ॥ परेण पूर्वबाधो वा प्रापस्त्वाद्दूत्वमनामिह २

७२

रेतश्च कथंचित्। ऽद्यतां नावमन्येत न चैतां श्रावयेत्पुनः। भिक्षाटने स्त्रियः काश्चि
द्भिक्षां त्रियास्तां गृहे गृहे। तासां विलोकनं कार्यं यथा मातुः स्वसुस्तथा॥ आत्मसं
मितमाहारमाहारं दात्मवान्यतिः। अयं तद्दुधितस्यापि समाधिर्नैव जायते॥ का
यायनः॥ आहारस्य तु द्वौ भागौ तृतीयमुदकस्य तु। वायोः संचरणार्थाय चतु
र्थमवशेषयेत्॥ यमः॥ आहारस्य चतुर्भागं अर्द्धं वाथाहरेद्यतिः। युवा विचा
रुजः शक्तः प्रसंगं तच्च वर्जयेत्॥ अन्नसंगाद्बलं दर्पो विषयासक्तिरेव च। का
मक्रोधस्तथा लोभः पतनं नरके तथा। अष्टौ ग्रासा मुनेः प्रोक्ताः षोडशारण्य
वासिनः। द्वात्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणः। न च ग्रासप्रमाणं व्याघ्र
आह॥ चतुरंगुलमुत्सेधं चतुरंगुलमायतं। एतद्ग्रासप्रमाणं तु व्याघ्रेणपरिभा ॥७२॥

षितं। भंक्त्वा भंक्त्वोपभुंजीत नियमार्थं यतिः सदा। भिक्षादुपावृत्तो भिक्षुः पश्चात्कि
नचिदाहृतं। फलंमूलं पयस्तक्रं दधि पुष्पं घृतं तथा। शाकादि व्यंजनं पेयं ग
ह्णन्भिक्षुर्नदुष्यति॥ जाबालः॥ एकपात्रं तु भिक्षूणां निर्दिष्टं फलमुत्तमं। नैव
द्वैषो द्विपात्रेण अशक्तौ व्याधिपीडिते॥ आश्वलायनः॥ सवासस्पर्शआलाप
सहयानाशनासनैः। याजनाध्ययनाद्योनात्पापं संक्रमते नृणां। १ आसनाद्याना
च्छयनाशंभाषासह भोजनात्। विचरंतीहपापानि तैलबिंदुरिवांभसा॥ उपावृत्त
स्त्तू। तोभिक्षां कृत्वा तीर्थमकर्द्दमं। प्रक्षाल्यं तर्हितदेशे भैक्षपात्रं निधाय तु।
मन्त्रोयेणाष्टथक्यादोहस्तौ प्रक्षालयेदथ। आचम्याथ त्रिरायम्य प्राणांस्तु पुनरा
चमेत्॥ अपोशानविधिं कृत्वा पंचप्राणाहुतीः परं। केशकीटादिभिर्व्याप्तं पिंडमु

स्पृश्यदूरतः। हस्तं प्रक्षाल्य मस्माथद्भिः प्राश्नीयात्ततः परं केशादिमुखसंलग्नं द्वि
23 ग्रासग्रासं तु तत्त्यजेत्। अपांद्वादशगंडूषैः क्षाल्यास्यं भोजनं ततः। वामेनांगेन
संसक्तं निधायैव कमंडलुं॥ विष्णुः॥ सर्वेषामेव भिक्षूणां तत्पात्रं सर्वमेव तां। अ
तैजसानि पात्राणि भुज्यर्थं लक्ष्म सर्वान् मनुः॥ मनुः॥ एककालं चरेद्भिक्षं न प्रसज्येत
विस्तरे। भिक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति॥ बौधायनः॥ पादौ प्रक्षाल्याच
म्य त्रीन् प्राणायामान् धारयित्वाभिदशमो प्रतिवारिणा। संप्रोक्ष्य दक्षिणेन हस्तेन
भुंजीयादिति। एष ह्यष प्रणवे नाभिमंत्र्याग्र्यर्थः यमः॥ प्रोक्षितं प्रणवेनैव हुतमध्यम
त्मिकादिषु शरीरं ब्रणवत्पश्येत् अन्नं तु ब्रण[illegible]लेपवत् यतिधर्मसमुच्चये गंगाते
यामिषिक्तो तु भिक्षांयो श्नाति योगवित्। तत्र क्रतुशतेरिष्टफलं प्राप्नोति मानवः।

॥५३॥

सांतपनसहस्रंतुचांद्रायणशतानिच।अश्वमेधसहस्रकंचैवतद्विष्णोःशेषमुत्त
मं।विष्णोर्निवेद्यंसंशुद्धंमुनिभिर्भोज्यमुच्यते।अन्यदेवस्यनैवेद्यंभुक्त्वाचांद्राय
णंचरेत्।गंगातोयंचभैक्ष्यंचविष्णवान्नंविशेषतः।आनखाग्राच्चयेत्तापंमंत्रपू
तंहविर्यथा॥छांदोग्यश्रुतिः॥आहारशुद्धौसत्वशुद्धिःसत्वशुद्धौध्रुवास्मृतिः।स्मृ
तिलंभेसर्वग्रंथीनांविप्रमोक्षइतिहारीतः॥गुरवेनिवेदितमनुज्ञातमश्नतसम्मि
तंप्राकुर्यदश्नन्।ब्रह्मचारीब्रह्मसिद्धिमवाप्नोतिमोक्षसिद्धिंतुभिक्षुकः॥विष्णुः
भैक्ष्यंयवागूंतक्रंवापयोयावकमेववा।फलमूलविपक्वंवाकणपिण्याकसक्तवः।
॥इत्येतविशुभाहारायोगिनःसिद्धिकारकाः।त्वङ्मूलपत्रपुष्पाणिग्राम्यारण्य
फलानिच[illegible]।कणयावकपिण्याकशाकतक्रपयोदधि॥भिक्षांसर्वसमोप

76 सु

तां हिंसावर्ज्जं समाचरेत् । उन्नानवदनं कृत्वा ब्रह्मभावेन भावितः ॥ पंचप्राणाहुतीर्दद्या
त्मां त्रिं श्रुतिचोदितेः ॥ ॐकारपूर्वाः स्वाहांता मंत्रास्तैस्तस्समाचरेत् । नैवाहुतीः
स्पृशेद्राद्याग्नीदं तोष्ठाभ्यां कदाचन । नास्वादयेद्रसं तत्र जिह्वया धर्मवित्क्वचि
त् । अनेन विधिना कृत्वा पंचप्राणाहुतीः पृथक् । शेषमोषधवत्प्राश्य । स्थित्यर्थं श्रु
तिशासनात् ॥ भ्रष्टोऽप्रष्टेन कुर्वीत रागद्वेषोच चेतसा । मिताहारो भवेन्नित्यं भि
क्षुर्मोक्षपरायणः । कामक्रोधादयो दोषा न भवंति मिताशिनः ॥ भुक्त्वा जानु तथा कृत्वा बा
हू पादौ तथा भुवि । भाजनं च समादाय भिक्षुः सव्यकरेण तु ॥ दक्षिणेन करेणैव
क्षिपेत्येनांतरात्मना । ध्यायन् स भोजनं कुर्याद्यावन्नावमर्थो भवेत् ॥ न स्पृशेत् स
व्यहस्तेन भुंजानोऽन्नं कदाचन ॥ न पादौ न शिरो व्यस्तेन पदा भाजनं स्पृशेत् तापात्र

॥७७॥

मधिकृत्य यो विधिरुक्तः तस्यापवादमाह ॥ अन्नपात्रे हविर्भुक्तो हव्यकव्येष्वनुज्ञया
।राज्ञ ततामत्र सौवर्णे तत्रायं नास्ति विविधिः ॥ सौवर्णे पुचयात्रेषु ताम्ररूप्यमयेषु
त वाभुंजन् भिक्षुर्नदुष्येत दुष्यते प्रतिग्रहात् भुक्त्वा पात्रं यतिर्नित्यं क्षालयेन्मंत्र
पूर्वकं।न दुष्येत्तस्य तत्पात्रं यज्ञेषु चमसा यथा ॥ क्रतुः ॥ प्रवीरा स्वैरिणी कुष्ठीग
र्भभर्तृद्रुहासती।कन्याधमत्रीपुनर्भूत्यो नाददी तोद्यतामपि ॥ मनुः ॥ नाद्यात्पातनिमि
त्ताभ्यां न नदस्त्रींग विद्यया। नानुज्ञासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ अत्रिः
॥ कुटुंबसंकरं चैव मलिनोपहते गृहे। पीडुयान्नं प्रयच्छेद्यस्तद्गृहं वर्जयेद्यतिः ॥ उ
दक्या चोदितं ह्यन्नं द्विजान्नं शूद्रचोदितं।प्राप्यं गोचायस्तेलक्ष्मं भिक्षुर्यान्न नवर्ज
येत् ॥ नाश्नंति ह्यशुचेर्दवा नाश्नंति वृषलीपात ॥ स्त्रीडितान्नं च नाश्नंति तदन्नं वर्ज

१ अग्रक्षान्नं नभोक्तव्यं हस्तात् कन्नुदनान्नैरपि । अदृष्यानस्य भोक्तव्यं स्नेहाद् पितुलादिभिः ॥१

75 यद्यति : ॥ चिकित्सकस्य मृगयाशल्यहर्तुश्च पापिनः । कुलटाषण्ढयोरन्नमुद्यत
संयन्जेद्यति : ॥ श्रोत्रियान्नं न भिक्षेत श्रद्धाभक्तिबहिःकृतं । व्रात्यस्यापि गृ-
हे भिक्षेच्छ्रद्धाभक्तिपुरस्कृते । दर्व्यादेयं घृतं चान्नं लवणं व्यंजनं तथा । अपक्व
मन्नं हपक्वं च न तु दर्व्या कदाचन । हस्तादेयं तु यद्दर्व्यादेयं तु हस्ततः । एतद्ब्रा
ब्राह्मणोऽश्नीयात् सोऽश्नीयान्मूत्ररेतसी ॥ ऊं विष्णुः ॥ यदि भिक्षां समादाय पर्युषेद्यो
गवित्तमः ॥ स पर्युषितदोषेण भिक्षुर्भवति किल्बिषी : तस्माद्भिक्षां समादाय पर्युष
न्न कदाचन । भिक्षार्थं प्रविशेद्ग्रामं भावे वनवासिनां । स्ववृत्तस्य गृहे भिक्षेन्नतु
द्वे वनिषद्मा : ॥ अभावे बहुगेहानां तेषु भिक्षेत लोलुपः ॥ देवलः ॥ उदक्या शावचाण्डा
लचोरनग्नकपालिकान् । पतितान् पिशुनान् स्पृष्ट्वा भिक्षां भिक्षुः परित्यजेत ।

५ अन्नं पर्युषितं भोज्यं स्नेहाक्तं । चिरसंस्थितं । अस्नेहा ह पिष्टो धूमा यवगोधूम रविकार : पयसे ॥५॥
५ मनकः । लवणं व्यंजनं चैव घृतं तैलं तथैव च लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् ॥५

एतद्व्यतिरिक्तास्पृश्यमात्रस्पर्शे ॥ जाबालः ॥ भिक्षाटने च संन्यासी अमेध्यं यदि
संस्पृशेत् । भिक्षां गृह्य ततः स्नात्वा प्राणायामान् समाचरेत् ॥ जमदग्निः ॥ अका
ककोद्वेश्याविट्खरोष्ट्रस्पर्शे न सति । स भिक्षुस्तु जले मग्नः शुद्ध्येत् तु जप्त्वाघ
मर्षणं ॥ जाबालिः ॥ भिक्षाटने च संन्यासी श्वानमेध्यं यदि संस्पृशेत् । भिक्षां गृह्य त
तः स्नात्वा प्राणायामान् षडाचरेत् ॥ निमंत्रितस्तु संन्यासी यदा मेदं समाचरेत्
॥ लोभात्तत्र प्रवर्तेत पतते च न संशयः ॥ यत्किंचिद्दीयमानं तु गृहिलोकैः संस्थि
तं । भिक्षां भिक्षुर्न गृह्णीयात् काककयोनिषु जायते ॥ अत्रिः ॥ उपस्थाना यदा पूर्वः भि
क्षार्थं यदि ग्रीता भवेत् । न गच्छेत् गृहं भिक्षुस्तद्गृहाद्वै कथंचन । द्वावेवाश्रमि
णौ प्रोक्तौ वानप्रस्थो गृहीत था । अभोज्यान्नमन्येषामितरेषां तु लिंगिनां ॥ मे

56

धर्मतिथिः ॥ ब्राह्मणक्षत्रियविट्शूद्राः स्वधर्मं नान्यदिष्टमाचरेत् ॥ तत्राथ संभवे पू
र्वीदाददीत नरेन्द्रगतान्त्रिवर्णं शूद्रादपि ग्राह्यं रक्षेत् प्राणाननु द्विजोत्तमः ॥ ७ ॥
॥ भिक्षाशनानंतरात्रौ शेषकालं पुराणश्रवणेन नयेत् ॥ तथा च दक्षः ॥ इतिहा
सपुराणाभ्यां षष्ठसप्तमकौ नयेत् ॥ कालानिविति शेषः ॥ अंगिराः ॥ पुराणश्र
वणे भक्तिः सर्वस्यापि प्रवर्तते । भक्त्या विच्छिन्नया मुक्तिस्तस्मात्तां योगतो
त्सभ्यसेत् ॥ तदभ्यासात्परं ब्रह्मभावमापद्यते मुनिः ॥ बृहस्पतिः ॥ बंधमो
क्षविभागज्ञो बुधश्चेन्मोक्षणेच्छया । उपायान्वेषणे युक्तः को न मुच्येत बं
धनात् ॥ यथा चित्तं समासक्तं जंतोर्विषयगोचरे । यदि नारायणेप्येवं को
न मुच्येत बंधनात् ॥ अस्त्राशास्त्रेष्वमार्गेषु यथा चित्तं हि यो भवेत् । यद्येवं

चतुर्दे ॥

शास्त्रदृष्टेषु कोः। आदरेण यथा स्तौति धनवंतं धनेच्छया। तथा चेद्विश्वकर्त्तारं
कोः। यथा सुनिपुणः सम्यक् परदोषेक्षणं प्रति। तथा चेन्निपुणः स्वेषु कोः।
अर्थार्थं यानि कर्माणि करोति कृपणो जनः ॥ तान्येव यदि मोक्षार्थी कोः। यावत्
ल्पयनेष्टस्त्रीदेश्यराज्यादिकं बहु। तावच्चेत्मलपेछास्त्रं कोः। आत्मनायेन यत्ने
न लोकस्य कुरुते प्रियं। आत्मनो यदि तन्नैव कोः। सुतां रूपवतीं दृष्ट्वा यथाचि
त्तं न कंपते। तथा चेत्परदारेषु कोः। लभमानो यथा नित्यं सुप्रसन्नो भवेन्नरः। य
द्येवं निंद्यमानोऽपि को न मुच्येत बंधनात्। अपापमशठं वृत्तमजिह्मं नियमाचार
त्। इंद्रियाण्युपसंहृत्य कूर्मोंगानीव सर्वशः ॥ क्षीणेंद्रियमनोबुद्धिर्निरीहेत
निरिंद्रियः। निर्द्वंद्वो निर्नमस्कारो निःस्वधाकार एव च। निर्ममो निरहंकारो निरपे

७९

द्वो निरामिषः। निराशः सर्वभूतेषु निराशी निष्परिग्रहः। सर्वत्रः सर्वता मुक्तो मु
च्यते नात्र संशयः॥ दक्षः॥ विलावेन त्रिदंडेन न त्रिदंडीति चोच्यते अध्यात्मदंडयु
क्तो यः स त्रिदंडीति कथ्यते। वागादिदंडयुक्तस्तु प्रत्यगात्मन्यवस्थितः। परब्रह्म
णि लीनो यः स त्रिदंडी व्यवस्थितः॥ यमः॥ श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च
यो नरः। न हृष्यति न च स्तौति स विज्ञेयो जितेंद्रियः॥ विष्णुपुराणे॥ निःसंगता
मुक्तिपदं यतीनां संगादशेषाः प्रभवंति दोषाः। आरूढयोगोपि निपात्यतेऽधः सं
गेन योगी किमुताल्पसिद्धिः। मनोरथानां न समाप्तिरस्ति वर्षायुतेनाप्यथवा
पि लक्षैः। पूर्णेषु पूर्णेषु पुनर्नवानामुत्पत्तयः संति मनोरथानां॥ यावतः कुरुते
जंतुः संबंधान्मनसः प्रियान्। तावंतोऽस्य निखन्यंते हृदये शोकशंकवः। नजा

॥८७॥

तुकामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धे
त। यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः। एकस्यापि न पर्याप्तं तस्मा
त्तृष्णां परित्यजेत्। या दुस्त्यजा दुर्मतिभिर्जीर्यता या न जीर्यति। तांतृष्णां संत्य
जन् प्राज्ञः सुखेनैवाभिपूर्यते॥ विद्याबुद्धिरविद्यायां अज्ञानात्तात जायते
। बालोग्निं किं न खद्योतमसुरेश्वर मन्यते। तत्कर्म यन्न बंधाय सा विद्याया
विमुक्तये। आयासायापरं कर्म विद्यान्याशिल्पनैपुणं। कः केन रक्षते जं
तुः कः केन हन्यते। हंति रक्षति चैवात्मा ह्यसत्साधु समाचरन्। तापत्रयेण
भिहितं यदेतदखिलं जगत्॥ तदाशोच्येषु भूतेषु द्वेषं प्राज्ञः करोति कः॥
यदा न कुरुते भावं सर्वभूतेषु पापकं। समदृष्टेस्तदा पुंसः सर्वाः सुखमया दि

त्रा:।आत्मान्येषोयानिपापानिचिंतयत्यात्मनोयथा।तस्यपापागमस्तातनहेत्वभा
78 वान्नविद्यते॥कर्मणामनसावाचापरपीडांकरोतियः।तद्बीजंजन्मफलतिप्र
भूतंतस्याशुभं।सोहंनपापमिच्छामिनकरोमिवदामिवा।चिंतयन्सर्व
भूतस्थमात्मन्यपिचकेशवं।शारीरंमानसंदुःखंदैवंभूतभवंतथा।सर्वत्र
समचित्तस्यतस्यमेजायतेकुतः।एवंसर्वेषुभूतेषुभक्तिरव्यभिचारिणी।क
र्तव्यापंडितैर्ज्ञात्वासर्वभूतमयंहरिं।सर्वभूतात्मकेतातजगन्नाथेजगन्मये
।परमात्मनिगोविंदमित्रामित्रकथाकुतः।त्वय्यस्तिभगवान्विष्णुर्मयिचा
न्यत्रचास्थितः।यतस्ततोयंमित्रंविशत्रुश्चेतिपृथक्कुतः॥देवामनुष्यापशवः
पक्षवृक्षसरीसृपाः॥रूपमेतदनंतस्यविष्णोर्भिन्नमिवस्थितं।एतद्विज्ञानता

सर्वं जगत्स्थावरजंगमं द्रष्टव्यमात्मवद्विभुः यतो ये विश्वरूपधृक्॥ एवं ज्ञाते स
भगवाननादिः परमेश्वरः। प्रसीदत्यच्युतः तस्मिन्प्रसन्ने क्लेशसंक्षयः॥ मनुः॥
अस्थिस्थूणं स्नायुबद्धं मांसशोणितलेपनं। चर्मावनद्धं दुर्गंधं पूर्णं मूत्रपुरीषयोः
जराशोकसमाविष्टं रोगायतनमातुरं। रजस्वलमनित्यं च भूतावासमिमं त्यजे
त्॥ सोतःकरणो सेंद्रियो देहे आत्मबुद्धिं विवेकबुध्या यजेदिति॥ श्लोकार्थः॥ न
दीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा। तथा यजन्निमं देहं कृच्छ्राद्ग्राहाद्विमुच्य
ते॥ कृच्छ्रग्राहात् दुःखसमुदायात्॥ विष्णुः॥ त्यक्त्वा लोकांश्च वेदांश्च विषयानिंद्रि
याणि च। आत्मन्येवस्थितो यस्तु प्राप्नोति परमां गतिं। दोषदर्शी भवेत्तत्र यत्र रा
गः प्रवर्तते। अनिष्टबुद्धितं पश्येत्तथाक्षिप्रं विरज्यते॥ यदि नामास्य कायस्य यद

रम

तस्तद्बहिर्भवेत्।तंदंडमुद्यम्यल्लोकोयंशुनःकाकांश्चवारयेत्।याद्येवमलवाही
79 निपूतिस्छिद्राणियोषितां।तान्येवखलुकाम्यानि ऽअहोपुंसांविडंबना।चर्म
खंडंद्विधाभिन्नंपुरीषोद्गारधूपितं।येरमंति।नरस्तेभ्यःसाहसंकिंनतःपरं
॥पृथिव्यांबीजवत्तुंसितिष्ठत्येवशुभाशुभं।कर्मा ब्रह्मणःपरिज्ञानात्संसरत्ये
वनाततः।यथापृथिव्यांबीजानिरत्नानिनिधयोयथा॥एवमात्मनिकर्माणि
तिष्ठंतिचविशंतिच॥निःश्रेयर्ज्ञानंसमासाद्यनरोबंधात्प्रमुच्यते॥धर्मोस्सुखं
चज्ञानंचज्ञानान्मोक्षोधिगम्यते।अनूदकानुपासंध्यमवाक्कायक्लेशवर्जि
ता॥संधिनीसर्वभूतानांसासंध्यायोगिनांस्मृता॥शून्यागारगुहायांवापर्व
तेषुवनेषुवनेषुवा।तत्रासीनःप्रसन्नात्माध्यानंविधिवदाचरेत्।निरूद्रका

ध्यानसंध्यमवाक्कायक्लेशावर्जिता। संधिनी सर्वभूतानां सा संध्यमुखेकदंडिनां
यज्ञवल्क्यः॥ ध्यानयोगेन संपश्येत् सूक्ष्मआत्मात्मनि स्थितः। योगाग्नि
रैत्तवृत्तिनिरोधः। आत्मैकाग्रता। ध्यानं योगेन निदध्यात् सनापरपर्यायेण
सूक्ष्मप्राणशरीरादिव्यतिरिक्तः स्थितः। आत्मनि ब्रह्मण्यवस्थितः तदैवं त
त्वंपदार्थयोरभेदं सम्यक्‌रूपं स्वेदपमादीकुर्यात्॥ लोहितार्कमुपासीत संध्य
मातारकोदयात्। ब्राह्मणपद्मकोटरीवासं चिन्मात्रं ज्योतिषं हरिं ध्यायेन्नारायणं ह्या
दौ नीनूरूवा प्राणसंयमान्॥ तावद्ध्यायेत्पुनर्यावन्निद्रावशमुपागतः। सुप्तोत्थि
तः पुनर्ध्यायेत्तिष्ठं ध्यायेज्जपेत्पुनः। एकस्मिन्नप्रतिक्रान्ते मुहूर्ते ध्यानव र्जिता।
दस्युभिर्मुषितेनेव युक्तमाक्रंदितं भृशं। प्राग्रात्रे पररात्रे च मध्यरात्रे समाहितः

८०
८०

।संध्यास्वस्ति विद्गोषेण चिंतयेन्नित्यमीश्वरं ॥ छ ॥ अथपर्यटनविधिः ॥ छ ॥ अ
त्रिः हिमवद्विंध्ययोर्मध्यः ख्यातः पुण्यतमः श्रुतौ । देशः सरस्वतीतीरे करो
दायास्तु पश्चिमाद्दिशो विवर्द्धिनापूर्वं प्रविश्रीकरणायवियोगज्ञानतपोध्यस
नसिध्यर्थं वि प्रहात्मनां । तस्मिन्देशे सदाभिक्षुः स्वधर्ममनुपालयन् । पर्यट
तु सदायोगी वीक्षयन्वसुधातलं । नगरोविनिवसन्ध्यान्हे संध्ययोर्नैवपर्यट
त् । नष्टान्नेन चतुर्गुवा प्राणबाधकरणैश्चायत्त्रप्रसुप्तेगवान्नाथस्तत्त्रयोगी
वसेत्सदा ॥ भिक्षार्थं प्रविशेद्ग्रामं वासार्थं वादिनत्रयां एकरात्रं वसेद्ग्रामे पत्त
ने तु दिनत्रयं । पुरे दिनद्वयं भिक्षुर्नगरे पंचरात्रकं । वर्षास्वेकत्र तिष्ठेत स्थाने
पुण्यजलावृते । आत्मवत्सर्वभूतानि पश्यन्भिक्षुश्चरेन्महीं ॥ अंधवत्कुब्ज
सामर्थ्ये शिविक्षामध्यंगतं एवमेव च । प्राणायामशतं कृत्वा तस्य पापैः प्रमुच्यते । ॥ ८० ॥

आत्मसामर्थ्ये समारूढ्या पानहृतवादितपुनः अहोरात्रमभोजनं प्राणायामान्समाचरेत् र

वच्चापि बधिरोन्मत्तमूकवत् ॥ [illegible] नामगोत्रादि चरतां देशं वा संश्रुतं कुलं वा
योवत्तं बलं शीलं व्यापयेन्न वसन्यतिः ॥ विष्णुः ॥ ग्रामान्ते निर्जने देशे नियतं कान
नकेतनः ॥ पर्यटेत्कीटवद्भूमिं वर्षास्वेकत्र संवसेत् ॥ वृद्धानामातुराणां च भीरू
णां संगवर्जितां ॥ ग्रामे वाथ पुरे वापि वासो नैकत्र दुष्यति ॥ यमः ॥ एकवासा अवासा
वा एकदृष्टिरलोलुपः ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ॥ सत्यपूतं वदेद्वा
क्यं मनःपूतं समाचरेत् ॥ अदूषयन्स तां मार्गं ध्यानासक्तो महीं चरेत् ॥ यमः ॥
॥ डालेडीवाख्ये लेती वा आकाशे जीवमालिनि जीवमालाकुले लोके वर्षास्वेक
त्र संवसेत् ॥ अत्रिः ॥ द्वादश्यां पूर्णमास्यां वा कुर्यात्संकल्पमात्मवित् ॥ आरुणी
श्रुतिः ॥ वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी यतिश्चरेत् ॥ द्वावेव वा चरेद्द्वावेव वा च

९।

रदिति ॥ कठश्रुतिः ॥ चतुरो मासान्वार्षिकान् ग्रामेनगारवापिवसेदिति ॥ अध्रुव
तिथिः ॥ यावद्वर्षाकालेपियावञ्चिन्नाचमेदिनी ॥ तावन्नाविचरेद्भिक्षुः स्वधर्मं
परिपालयन् । कालाच्च परुछेत्रोखावर्जं ऋतुसंधिषु वापयेत् । नत्रीन्सून् नतिक्र
मेन्नभिक्षुः संवछरे फकचितः । वपनानंतरं स्नायात् मद्भिर्द्वादशाभिर्यतिः । द्वादशै
व प्रकुर्वीत ताश्चोरांते प्राणसंयमं तु । आषाढ्यां पौर्णमास्यां तु कारयेद्वपनं यतिः ।
चातुर्मास्यस्य मध्ये तु वर्जयेद्वपनं यतिः ॥ द्वादशैव प्रकुर्वीत ताश्चोशांत प्राणसंय
मात् ॥ संप्रदायविदश्च तानि ॥ गुरूंत्वा शिरस्यभः क्षालनं तदनंतरं । आचम्य
वाग्यतो यन्नान् सर्वान्सान्दोर भावयेत् । अंतर्द्धा यत्र णं किंचित्तत्र निक्षेपयेद्य
तिः । क्षुरं संदंशतं चैव तथा नखनिकृंतनं ॥ अभिमंत्र्य द्विषड्वारं [illegible] प्रण

॥९१॥

षद्दूद्वयं परिक्षाल्य स्वयमादौ क्षुरेण तु ॥ केशान्नखांस्तु छित्वा ततः क्षौरं समाचरेत् ॥१॥

त्वेः प्रोक्षयेत्कलं क्षुरमादाय ततो रोमश्मश्रुकेशान्निकृन्तयेच्च ॥ शिरोरुहांस्ततो ना
ने २ साक्षितोऽप्रयतो यतिः । कारयेत्करपादस्थनखानां च निकृन्तनं । द्विषड्वारं निम
ज्यासु तीरं गत्वोपविश्य च । प्रतिष्ठाने द्विषड्वारं करावार्य पादयोः ॥ मृदं दद्या
न्मुखे चैव प्रतिवारं जलेन तथा ॥ ततो जलं प्रविश्याथ शिरस्यालिप्य सन्मृदा ॥ द्विष
ड्वारं निमज्याथ प्रतिवारं मृदं तथा । पुनरुत्सुत्य ततीरं गत्वा गण्डूषमाचरेत् ॥ पादौ च
कादशवारांश्च सम्यगाचम्य यत्नतः ॥ ततो द्वादशवारं मृत्तिकया प्रक्षालवन कमं
डलं प्रक्षाल्य दण्डं कमण्डलुं गृहीत्वा सचैलं स्नानमाचरेत् ॥ क्षौरस्नानं विधायै
वं नित्यस्नानं समाचरेत् ॥ प्राणायामांस्ततः कुर्यात्त्यां चैकादशसंख्यया ॥ क्षौरस्नाने श
विलेपे च पुरीषादौ विसर्जने । द्विगुणीकृत्य कर्तव्याः प्राणायामाः पुरोदिताः ॥ प्रल

92

मासमध्ये क्षौरं न कारयेत्॥ क्षौरस्नानं यतीनां तु व्याससवार्यैः प्रकीर्त्तितं॥ छ॥ ततो मठ
मागत्य व्यूहपूजां कुर्यात्॥ अत्रिः॥ वपनानंतरं स्नात्वा पूजयेत्तु रूषोत्तमं। मनसा क
र्मणा वाचा पूजयेच्च परस्परं॥ यतिधर्मसमुच्चये॥ देवं कृष्णं मुनिं व्यासं भा[illegible]ष्यका
रं गुरोर्गुरुं। गुरुं स्वं दंगणाध्यक्षं दुर्ग्गां देवीं सरस्वतीं॥ गणो गणेशाः॥ अध्यक्षाः क्षे
त्रपालः॥ व्यूहाः पुनस्त्रयस्तत्र कृष्णव्यासभाष्यकाराणामेव समाचारात्। व्यूहद्वयं च
तस्य परिवाराद्यो गात्। परिवाराश्च पुराणादिषु दृष्टाः। तत्र कृष्णस्य सनत्कुमार सनक
सनंदनसनत्सुजाताः। व्यासस्य सुमंतुजैमिनिवैशंपायनपैलाः। भाष्यकारस्य
पद्मपादविश्वरूपत्रोटकहस्तामलकाचार्याः। तत्र मध्ये कृष्णपंचकं। तस्य दक्षि
णतो व्यासपंचकं। वामतः आचार्यपंचकं। इति। न्यायादावारात्। गुरुपरमगुरुपर

॥९२॥

मेष्ठीगुरवः । अन्येचब्रह्मविदाचार्याः । यथासन्निवेशोभगवतः पुरतः पूजयेत् ॥ गणेशः
आग्नेये । ईशाने क्षेत्रपालः । वायव्ये दुर्गा । नैर्ऋत्ये सरस्वती ॥ यथादिशं चलोकपालाः पा२
। भगवत्पार्श्वयोर्ब्रह्मरुद्रौ । अत्र च भगवान् मूलमंत्रेण पूजनीयः ॥ अन्ये पुनः प्र
णवादिभिर्नमोंतैस्तत्तन्नामभिर्मंत्रैः पूज्याः । एवं पूर्वोक्तप्रकारेण संपूज्य गोपीचंदनादि
मृत्तिकादंतकाष्ठदोरकादि दद्यात् ॥ अथ तिथिः ॥ प्रशस्तां मृत्तिकां शुक्लां गृह्णीयाच्छु
चिशुक्लयोः । पूर्णीचतुरोमासानाषाढ्याः कार्त्तिको दद्यात् ॥ वृद्धयाज्ञवल्क्यः ॥
प्राग्गृह्णीतेदमादाय शुभ्रां किंचिदपीडयन् । प्राग्गृह्णीतेति ज्येष्ठाषाढयोरित्यर्थः ।
अत्र प्रथमत एव मृत्तिकासंग्रहो दंतकाष्ठपत्रादीनामपि संग्रहप्रदर्शनार्थं हि स
परिहारार्थं च व्यस्तवर्जसमानत्वात् । अधिवासमदं चैवं गृह्णीयाच्च शुभेदिनात्स्म

93

त्रै

यंश्वरं। विष्णुं वाराहं क्रोडरूपिणं। येनोद्धृतासिदं विश्वं क्रोडरूपेण दंष्ट्रया। ब्रह्म
सह समायानुकेसवोधरणीधरः॥ छ॥ ततः संकल्पं कुर्यात्॥ तथा चात्रिः॥ अस
तिप्रतिबंधे तु मासान्वै वार्षिकानिह निवसामीति संकल्प्य मनसा बुद्धिपूर्वकं
।प्रायेण प्रावृषि प्राणिसंकुलं वर्त्म दृश्यते॥ आषाढ्यादिचतुर्मासं कार्त्तिक्यंतं
तु संवसेत्। माधवश्चतुरो मासान्सर्वभूतहितायतान्। स्वापं यास्यति शेषांके न
हम्यास सह जगत्पतिः। सुमश्चौ वाञ्छितो यावन्न भवेत्सस नातनः। अहं तावन्निव
त्स्यामि सर्वभूतहितायवै॥ अत्रिः॥ नासमानसहायेषु निवसेद्योगवित्क्वचि
त्। वसेत्सममानशीलेषु सुशीलेषु तपस्विषु॥ दक्षः॥ एकोपि द्रुर्यथा कृत्स्नं
द्वावेवाग्निषु नं स्मृतं। त्रयोग्रामः समाख्यातः कुटुंबं तु नगरायते॥ नगरं तु नकर्त्त

यं ग्रामो वा मिथुने तथा। एतत्त्रयं प्रकुर्व्वाणः स्वधर्म्माच्च्यवते यतिः। राजवार्त्तादिकं
तेषां भिक्षावार्त्तां परस्परं। स्नेहपैशून्यमात्सर्यं सं निकर्षात्प्रवर्त्तते निराश्रयं निराबा
धं प्रसन्नसलिलाश्रितं। प्रधमन्नबकुलं चैव धनिनां कुलसंकुलं। भुक्त्वा यत्र जनाः
सर्वैस्स्ववृत्तिपरिपालकाः। श्रद्दधानामुदायुक्ताः शांताः कल्याणवादिनः। प्रयच्छंति
यथान्यायं भिक्षां सर्वरसान्वितां। भिक्षा व पुष्कलं साधु यच्चान्यत् धर्मसाधनं। अ
याचिता नियच्छंति तं देशं यन्ततो व्रजेत्॥ वृद्धशातातपः॥ निगृहीतेंद्रियग्रामो य
त्र यत्र वसेद्यतिः। तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं तथा॥ अत्रिः॥ चतुरो यं वसेन्मा
सान् द्वौ वा कौ त्रिकवार्षिकौ॥ वृद्धाननुक्रमेलोवनमस्कृत्य विधानतः॥ अने
न विधिना भिक्षुराषाढ्यां सुसमाहितः। स्थानाभावाद्व्रजेत्तावद्यावद्भवति पंचमी

९५

प्रायश्चित्तेन युज्येत पंचमासं ब्रजेद्यदि । कृच्छ्रमेकं चरेद्भिक्षुर्यदि ह्यात्रौ मगच्छति
। तेषु मासेषु केशादीन्नानुसंधेन वापयेत् ॥ नदीं च न तरेत्तेषु क्रोशादूर्द्ध्वं न च व्र
जेत् । वापयेद्यदि केशादीनुत्तरेद्यदि वा नदीं । प्राजापत्यं चरेच्छुद्ध्यै प्राणायामशत
त्रयं । विस्तीर्णे ग्रामसीमांते क्रोशादूर्द्ध्वं ब्रजेद्यदि । प्राणायामांसिहस्रं शकृत्वा जपे
त्रिकशतत्रयं ॥ स्थितियोग्यान्बहून्ग्रामान्यदि वर्षासु लंघयेत् । प्रत्येकं कृच्
रेत्कृच्छ्रमेतत्पापात्प्रमुच्यते । वर्षास्वेदं यतिः कुर्याद्यदि कश्चिदनापदि । प्राजापत्ये
न कृच्छ्रेण मुच्यते नात्र संशयः ॥ नमस्कारविधिः ॥ आसुरं न नमेत आतुरो न नमे
त् । अत्र संप्रदायविदः ॥ सर्वदा वंदनं कुर्याद्दूराद्दृष्ट्यते स्तथा । आपंचमीं नमस्कु
र्यादतिक्रांतेऽपि पर्वणि । त्रिमुहूर्ताधिकं ग्राह्यापर्वाह्णे प्रणामयोः ॥ यतिधर्मस ॥९६॥

मुच्यते॥ प्रणम्ता नोयतिर्ब्रूयादाशिषं व्यासशासनात्॥ नारायणेतिच ब्रूयात प्रणे
तायुर्विवृद्धये। धर्मसंकरसंकीर्णे स्थाने सोपद्रवे यति:। मुहूर्त्तं नापतिष्ठेत। यत्र
धर्म: पराङ्मुखे: तस्करोपद्रुतग्रामे ब्रह्महत्यादिदूषिते। दुर्भिक्षे राष्ट्रभंगे वाव
र्षास्वथाश्रुतं यजेत्॥ अत्रि:॥ पिता माता स्वसा भ्राता स्नुषा जाया सुतस्तथा॥ ज्ञाति
बंधुसुहृद्वर्गो दुहिता तत्सुतादय:। यस्मिन्देशे वसंत्येते तेन तत्र दिवसं वसेत्। द्वि
ष:त्त्राको भवेत्तत्र रागहर्षादयो मता:॥ अश्रुपातं यदा कुर्याद्द्विदु: शोके नवा
र्दित:। यो जनानां ज्ञातं गत्वा तदा पापात्प्रमुच्यते। दक्ष:॥ कथा वार्त्ता स्वकेसमा
र्थे पुरे गोष्ठे वसद्गृहे। निवसेन्नयति: षड्भु स्थानेष्वेतेषु कर्हिचित्॥ वृद्धयाज्ञव
ल्क्य:॥ चौरैरुपद्रुतं राष्ट्रं दुर्भिक्षव्याधिपी।हडितां वकेलानेनवाक्रांतं वर्षास्व

95

थाश्रुतं यजेत। मुहूर्त्तमपि नासीत देशे सोपद्रवे यतिः। उपद्रुते तु मनसि समाधि
र्नोपजायते। अधार्मिकराजग्रामे पाखंड जनसंकुले। मुहूर्त्तमपि नासीत यत्र
धर्मो विलुप्यते। चतुःक्रोशान्तरा यत्र नदी भवति कुत्रचित्॥ पक्षान्ते तत्र गं
तव्यं आपस्तंबवचो यथा। श्राद्धे निमंत्रितो गच्छेन्नदीलंघनवर्जितं। साय
मागत्य निवसेत्स्वाश्रमे कल्पितगृहे। यत्तीर्थमनुसंप्राप्य चित्तमस्य प्रसीद
ति। तत्र तिष्ठन्नरो विद्वान्मोक्षमार्गे व्यवस्थितः। चातुर्मास्ये च कार्त्तिक्यां
द्वौरं कार्यं न चांतरा। देशकालविरोधे तु मासद्वयमपि क्वचिन्मतं॥ ॥प्रश्नि:॥
कार्त्तिक्यां वा पयि वा तु स्नापयि वा त्रिविक्रमं। प। स्य रं तु सं पूज्य द्वामयि
वा परस्य रं। मासद्वयं चतुष्कं वा एकत्र निवसेद्यतिः। नैकत्र निवसेत् ग्रामे ॥८५॥

३ वर्षाभ्योन्यत्र सद्यति:। चा[illegible]तुर्मास्यं वसेन्मासानूर्द्ध्वोवाकोष्टिकवार्षिको॥ काष्ठोप
स्थ्यित्रिखावर्जेऋ[illegible]तु संधिषु वापयेत्। कुर्द्धे वार्षिकाभ्यो मासाभ्यो निकत्रस्था
नवासी स्यात् इति श्रीखस्मृति:॥ इत्युदाहृतवचनेभ्यो मासद्वयं चतुष्टयं वा एक
त्रग्रामादौ निवसेत्। मासद्वयं यदा॥ तदा भाद्रयां क्षौरं कारयेत्॥ भाद्रमपि प्र
[illegible] चिन्मतमितिवचनात्। यदा मासचतुष्टयं तदानंतरं वापनं कुर्यात्॥ चातु
र्मास्ये च कार्त्तिक्यां क्षौरं कार्यं न चांतरे इति वचनात्। वाराणस्यां गंगाकूले वा
सर्वदाप्येकत्र निवसेत्॥ तथा च प्र[illegible]स्य स्कंदपुराणेयो:॥ अष्टौ मासान् विहा
र: स्याद्यतीनां संजितात्मनां। एकत्र चतुरो मासान् वार्षिकान् निवसेत् पुन:॥ अविमु
क्तप्रविष्टानां विहारस्तु न विद्यते। न देहो भविता तत्र दृष्टं शास्त्रे पुरातनै:। मा

९६

न्तोप्यसेव्यं तत्र पंचत्वं तु गतस्य वै। हन्यमानोपि यो विद्वान् स वेद्विघ्नघाते
रपि। स याति परमं स्थानं यत्र गत्वा न शोचति। गं०गा० रू० लेवसोन्निग्यांम्म दुर्मध्य
परायणाः। सिद्ध्यन्ते जंतु तद्धेयं यावद्भानुश्शातत्रयं ॥ भविष्ये ॥ ब्रह्मादिदेवतालोका
नामुक्तेश्चप्राप्यते नृणां ॥ गंगेव परमो हेतुः कलिकाले विशेषतः ॥ ब्रह्मणा स्वे
व देहोयं नोपभोगाय जायते। इह क्लेशाय महते प्रेत्यानंतसुखाय च ॥ याज्ञ
वल्क्यः ॥ इज्येतदास्थिरं चर्मयस्य प्रोक्तायरू यसो। तत्र स्मृते रूपस्थानास्य वयो
गाद्यरिक्तयातु। कर्मणां सन्निकर्षाच्च सतां योगा ०प्रव[illegible]र्त्तते ॥ बृहस्पतिः ॥ बं
धमोक्षविभागज्ञो बंधाच्छेन्मो द्वैलता छयात् उपायात्वेषणोग्गुरुः को न मुच्येत बं
धनात् ॥ ७ ॥ अथाभ्यागताचारः ॥ अभ्यागते यतौ स्थापीयति लिंगनशिष्ट

तां। विज्ञाय शिष्योत्थितो भूत्वा वामवस्त्रादि संयुतः॥ चातुर्मास्ये किं यदिति॥ पृष्टाय
नो नरस्ते। अभ्यागतो यदि ह्येष्टस्तास्मि मन्त्र्यवं द्यसः। तस्य दंडमर्घ्यं दत्त्वात
नायकं यथाविधि। योग्यदेशो सुसंस्थापत स्मा आसनमादरात्तादत्त्वोपविष्टे
तास्मिन् सगरुडासने संस्थितः तदनुज्ञां गृहीत्वाथ पंचांगेनतिपूर्वकं। अभ्याग
तिप्रयुक्तं तत्पादग्रहणमादरात्। यथोपदेशं कृत्वा सतत्पादौ मूर्ध्नि धारयेत्। आ
घ्राय दक्षिणांसे तु धारयित्वा ततः सुधीः॥ गरुडासनमासीनो ज्योतिकार्चनपू
र्वकं। अनुज्ञाय शिष्यपंचांगनमस्कारपुरस्सरं। गृहीत्वा पूर्ववत्पादावस्याष्टांग
नमस्क्रियाः। तदनुज्ञानुसारेण त्रिषट्द्वादश संख्यया। ज्योतिमादाय विधिवल्लक
र्णयोर्धारयन् पुनः। विधिमायेकनमस्कारं तां गृहीत्वा यथाविधि॥ पंचांगेन

९१ प्रणाम्याथ गरुडासनमास्थितः॥ समाप्य यथादेशं शौचं पश्चे क्रमाचरेत्॥ अ
भ्यागतः कनिष्ठेन तेन स्नात्वाप्यभिवंदितः। गृहीत्वा तस्य दंडाग्रं पूर्ववत् स्थाप
येत्ततः॥ स्नायी स्वासनमासीनः शिष्यद्वारासनं शुचि तस्मै दद्यात् ततस्त
तु पूजां दापयन्निधाय च। अभ्यागतेन भूमौ सुस्थिते गारुडआसने प्रार्थिते
च प्रणामार्थं स्थाप्यानुज्ञां विधाय सः। अभ्यागतेनोर्द्ध्वमुक्तवंदि वस्त्राग्रसं
युगोद्धृगुल्ली कृत वस्त्रं तु ऊर्ध्वोरूपनिधाय च। यथोपदेशं पंचांगं नमस्का
रे कृते सति॥ उत्थाय तस्य स्कंधादि ग्रहणं विधिनाचरन्। स्वासने संविश्
य भूयः स उत्थाय द्वितीयकं। वस्त्रं निर्दिष्य वस्त्रेण सम्यक् मुक्तेन संयुतः
।आभिवंद्योपविश्याशु गारुडासनपूर्वकं प्रणा[illegible]मादियथापूर्वं कृत्वाग ॥८९॥

रूढा आसने। उपविष्टपांजलिं कृत्वा भक्तियुक्तो भवेत्तदा। स्थायी तु स्वसमी
पेतं स्थापयित्वा सुखासने। अभ्यागतिप्रयुक्तं तस्माद् ग्रहणमादरात्। कार्ये
स्वसमीपस्थे स्तक्रूनिष्ठैर्यथाविधि। जोटीनमस्कृतिं तद्वत्पर्यंकं। श्रोचम
पथ। तद्दिनेतस्य भिक्षादिर्यथाशक्ति विचारयेत्॥ इत्यभ्यागताचारः॥॥
अथ पर्यंकश्रौचं॥ स्वद्धिभागे विभाड्पाथ गारूडासने प्रास्थितः। पादयोस्तु
स्वदः पे चवतस्वस्तिस्वद्वचा। द्विचिकोचस्वद्दद्याज्जानुजंघादितः क्रमा
त्कं स्योर्द्ध्वं शासक्षाद्दो द्वितीयसप्तपंचवा। तृतीये षट् चतस्व श्वातिस्वोद्धव
चतुर्थके। द्वेचिकोचस्वद्दद्या छोचे पर्यंकसंज्ञके॥ अथ योगपट्टविधिः
॥ तत्र संप्रदायविदः। अधितविद्यः सम्यश्वेद्दद्याद्योगपट्टं गुरुः। पादोस्वद्

९४

रिःप्रक्षाल्यपादुकाभ्यांगृहंव्रजेत्।द्विगुणंकटिसूत्रंचबध्नवासोवगुंठ्यच।
उच्चासनंप्रकल्प्योपविशेत्तत्राज्ञयागुरोः।सम्यादिष्टमुपन्यस्यवेदांतेकिंचि
देवतुगुरुणाविधिचन्यासपूर्वंशांस्वामिषेचनं।वासोमाल्यादिकंदत्वा
गुरुणायतिभिःसहानमस्कृत्यप्रपूज्याथस्तोत्राणिचपठेत्तथा।वखंचो
परिसंधार्यबंधु[illegible]भिर्यतिभिःसह।गीताध्यायंविश्वरूपंमुद्गराज्यंतमे
वच॥ततोनामप्रकर्तव्यंगुरुणासर्वसंमतं॥तीर्थाश्रमवनारण्यगिरि
पर्वतसागराः।सरस्वतीभारतीचपुरीनामयतेर्दश।श्रीपादसंज्ञयावा
च्यंनामतस्ययथातथं।अद्यारभ्यचयाकार्यदीक्षाव्याख्यादिकंसदायो
गपट्टोपिदातव्यः।शिष्यःसम्यक्परीक्षितेइत्याज्ञांगुरुणादत्तांगृहीत्वा ॥९६॥

शिरसा स्वयं॥ उत्थाय च ततः सम्यक् कुर्यात्पादग्रहणाविति। सदोरकं नमस्कुर्यां
कुरुह्यिष्ठयंतीस्तथेति। आगतं स्वाश्रमे भिक्षुं प्रत्युत्थायाभिवाद्य च॥ विश्राम
गुरुवद्भक्त्या पूजयेत्तद्दिनं यति॥ अथ निषिद्धानि॥ नामगोत्रादि चरणं देशं
कालं श्रुतं कुलं वयो वृत्तं व्रतं च शीलं ख्यापयेन्नैव सद्यतिः॥ वायुपुराणे॥ द्व
तीतो समं वीर्यो नुसृणाताम्बूलमेव च॥ तस्मात्सर्वप्रयत्नेन ताम्बूलं वर्जयेद्य
तिः॥ व्यासः॥ प्रमदस्त्वेति यो ब्रूयात् कुवाग्मौ ब्राह्मणेषु च। श्वानयोनिं शतं ग
त्वा चांडालेष्वपि जायते॥ पः प्रव्रजितां श्रुतिं सम्यक्कृत्वा स्वं वा कुषिभाषितं। दू
षयेदतमिज्ञोयं स प्रवेद्ब्रह्मघातकः। यतीनां कांचनं दद्यात्ताम्बूलं ब्रह्मचारि
णां॥ चोराणामभयं दत्त्वा दातापि नरकं व्रजेत्॥ दशविधां हिंसां न कुर्यात्

११ उद्वेगजननं संतापजननं ॥ रुजाकरणं ॥ त्राणितोत्पादनं ॥ पैशून्याकरणं ॥ सुखाप
नयन प्रतिक्रमः संरोधश्च बुध इति । द्वाविमौ न विराजेते विपरीतेन कर्मणा ।
निरारंभो गृहस्थश्च कार्यवांश्चैव भिक्षुकः ॥ यश्चान्नं न तु भोक्तव्यं प्राणैः कंठ
गतैरपि । गामांसस्य समं ज्ञेयं सुराबिंदुसमं जलं ॥ गुरोरप्यवलिप्तस्य कार्याका
र्यमजानतः । उत्पथप्रतिपन्नस्य परित्यागो विधीयते । माद्यति प्रमदां दृष्ट्वा सुरां
पीत्वा च माद्यति । तस्माद्दृष्टमदा नारी दूरतः परिवर्जयेत् । न पाणिपादचपलो
न नेत्रचपलो द्विजः । न च वाक्चपलश्चैव इति शिष्टस्य लक्षणं । ज्वलितस्य व
नेर्वह्नेर्दूरं च दग्धमनसंस्थितिः । सर्पस्य वाप्यथाचोरात् सिंहव्याघ्रादिकस्य चाभ
यान्न संत्यजेन्मार्गे भयाद्यादिवि न नृपतिः । सोन्नं गच्छेयसौ विप्र निर्भयो यत्र सं

ग्रहः॥ छ॥ आरुणी श्रुतिः॥ कामक्रोधलोभमोहदंभदर्पासूयाममत्वाहंकारा
नृतादीनपि त्यजेत्। अतऊर्द्धं ममत्वं चर त्। ऊर्द्धं गमनं विसृजेत्॥ ॥काठ
कब्राह्मणं॥ संन्यस्याग्नीन्न पुनरावर्तयेन्मामसंतुं जायामावाहयेदिति॥ परम॥
हंसोपनिषदि॥ सावर्णादीनानि वपरिग्रहेत्। यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टः च स
ब्रह्महा भवेत्॥ तस्माद्भिक्षुर्हिरण्यं रसेन स्पृष्टं च समपोल्कसो भवेत्॥ यस्माद्भिक्षु
र्हिरण्यं रसेन ग्राह्यं च स आत्महा भवेत्॥ तस्माद्भिक्षुर्हिरण्यं न दृष्टं च न स्पृष्टं च
न ग्राह्यं च सर्वे कामा मनोगताः व्यावर्तेत न दुःखेनोद्विग्नः सुखे निस्पृहस्त्यागा
रागे सर्वत्र शुभाशुभयोरमिस्नेहः। न द्वेष्टि न मोदं च सर्वेषामिंद्रियाणां गतिरुप
रमते। यआत्मन्येवावस्थीयते यत्पूर्णानंदैकबोधः तद्ब्रह्माहमस्मीति कृतकृत्यो

भवति रुतरुद्यो भवति ॥ मेधातिथिः ॥ शुश्रूषालाभपूजार्थं यशोर्थं वा परिग्रहः
शिष्याणां ननु कारुण्यात्स ज्ञेयः शिष्यसंग्रहः ॥ विद्यादिनं प्रकाशत्वाद विद्याया
त्रिरुच्यते । विद्याभ्यासे प्रमादो यः स दिवास्वप्न उच्यते ॥ आध्यात्मिकीं कथां मुक्त्वा
भिक्षयाज्ञां सुरस्तुतिं । अनुग्रहं प्रथि प्रश्नं न थाजल्पो नाउच्यते ॥ हारीतः ॥ पंडित
स्यापि शूद्रस्याशास्त्रज्ञानतरतस्येचा वचनेतस्य न ग्राह्यं शुनोच्छिष्टं हविर्यथा
॥ अचपर्लोयथा द्वीरमापयं ब्रह्मवादिभिः । तथा शूद्रमुखाद्वाक्यं न श्रोतव्यं वं
कदाचन ।॥ बहूक्तवपारिशिष्टे ॥ योभवेत्सर्वसंन्यासी तुल्यो विधर्मता यदि ॥ तस्मि
प्रलयः कर्तव्यो नेतरायकदाचन ॥ आश्विः ॥ छेदभेदोपमर्दैश्च प्राकारं गृहमाश्रमं
। स्वाहा स्वाहा स्वधा वषट्कारो विषयाणां च सन्निधिः । स्तुतिनिंदाक्रियावादाः पर

11700

मर्म्मावघट्टनं । द्रव्यक्रोधेन दत्तं मायालोभमोहौ प्रियाप्रिये । शिल्पं व्याख्यानि
योगश्च कामो रागः परिग्रहः । अहंकारो ममत्वं च चिकित्साधर्मसाहसे प्रय
श्चित्तप्रदानं च मंत्रौषधागदस्त्रीषः ॥ एकान्नं मद्यं मांसं स्रग्गंधपुष्पविभूषणं ॥
तांबूलाभ्यंजनं क्रीडाभोगाः कांतारसायनं । कच्छनं कुसनं स्वाप्तिष्ठोति षे क्रयवि
क्रयो । क्रियाकर्म विवादश्च गुरुवाक्यविलंघनं । संधिश्च विग्रहो यानं मंचकः
शुक्लवाससी । शुक्रोत्सर्गो दिवास्वापोऽभिन्नाधारस्तु तेजसः । विषं चैवायुधं बी
जं हिंसा तैलं विमैथुनं । प्रतिषिद्धानि चैतानि सेवमानो व्रजत्यधः ॥ प्रेसदे
शान्नपज्ञातिपुत्रमित्रादियोषितां ॥ उपकारकथास्वल्पा मनसापि न चिंतयेत् ॥
आगच्छ गच्छ तिष्ठेति स्वागतं सुहृदेपि वा । सन्माननं न च ब्रूयान्मुनि[illegible]र्मोक्षप

दंडं प्रदर्शयेद्भिक्षुर्गयां गत्वान पिंडदः ॥ दंडं विष्णुपदे स्पृष्ट्वा पितृभिः सह मुच्यते ॥ २ ॥

१०।

गयायाः ॥ न स्नानमाचरेद्भिक्षुः पुत्रादि निधने श्रुते । पितृमातृक्षयं श्रुत्वा स्नात्वा शु
द्ध्यति सांबरः । न कुर्यात्सूतकं न वपनं भिक्षुः श्राद्धपिंडोदकक्रियां । त्यक्तं संन्यासमा
त्रेण गृहधर्मादिकं व्रतं । गोत्रादिचरणं सर्वं पितृमातृकुलं धनं ॥ वायुपुराणे ॥ दं
डं प्रदर्शयेद्भिक्षुः पितृभिः सह मुच्यते । गयायां मुंडपृष्ठे च रूपे युपे वटे तथा । दंडं
प्रदर्शयेद्भिक्षुः पितृभिः सह मुच्यते ॥ विष्णुः ॥ संभाषणं सह स्त्रीभिरालापप्रेक्ष
णे तथा । नृत्यं गानं सभा सेवां परिवादांश्च वर्जयेत् ॥ मेधातिथिः ॥ न संभाषेत्स्त्रियं
कांचित्पूर्वदृष्टां न च स्मरेत् ॥ कथां च वर्जयेत्तासां न पश्येल्लिखितामपि । एतच्चतु
ष्टयं मोहात्स्त्रीणामाचरतो यतेः । चित्तं विक्रियते वश्यं तद्विकारात्प्रणश्यति ॥ सु
त्रीलोकपि सु त्रीलो सुविद्वान् स्त्री षु न विश्व सेत् । सु त्रीर्णा स्वपि कंथा सु स ज्यते त्री

॥१११॥

र्षसंवरं क्रतुः॥ अर्थेन्द्रियाणां सततां नानुवाक्यस्य ज्ञानभाषणोः। याजनाध्यापनव्या
ख्यावस्त्रभांडपरिग्रहैः॥ मिथुनेद्वाणसंकल्पैः संकरास्तु पतितः सदा॥ मेधातिथिः
॥ स्त्रीवर्जं जंगमं बीजं तेजसं विषमायुधं षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत्
। रसायनं क्रियावादं ज्योतिषं क्रयविक्रयं। विविधानि च शिल्पानि वर्जयेत्पर
दारवत् दक्षः॥ भयं प्राणांतिकं मुक्त्वा विण्मूत्रोत्सर्ग एव च। नान्यत्र विचरेद्रात्रौ
न मध्याह्ने न संध्ययोः॥ मनुः॥ नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः। जा
नन्नपि हि मेधावी जडवल्लोकमाचरेत्॥ बृहस्पतिः॥ निंदादर्दीतपाथेयं यतिः।
किंचिदनापदि॥ पक्वमापद्गृह्णीयाद्यावदन्नापमुच्यते। पाथेयमेकरात्रस्यपा
नीयं दुर्गमपथि गृह्णीयान्नाधिकं चान्नं भेषजं तु यथेच्छया॥ विष्णुपुराणे॥ जरा

युजांडजादीनां वाङ्मनःकर्मभिः क्वचित्।युक्तः कुर्वीत न द्रोहं सर्वसंगांश्च वर्जे
येत्॥अत्रिः॥नचैकस्मिन्वसेद्ग्रामे नाचैकस्मिन्सरित्तटे॥शून्यागारे नचैक
स्मिन्वसेच्छून्यालये तथा।लोकयात्राप्रयत्नेन वर्जयेदात्मचिंतकः।नान्योपनि
षदं विद्याप्रभ्यसेन्मुक्तिहेतुकीं।ग्रासादाच्छादनादन्यन्न गृह्णीयात्कथंचन।या
वदाहारयेत्तावत्प्रतिगृह्णीत नान्यथा।परार्थे न प्रतिग्राह्यं न च दद्यात्कथंचन
दि ॥दैन्यभावात्तु भूतानां संविभागं यतिश्चरेत्॥क्रतुः॥निरुजश्च युवा चैव भिक्षु
र्नावसथे वसेत्॥स दूषयति तत्स्थानं वृद्धान्पीडयतीति च॥मनुः॥अतिवादां
स्तितिक्षेत नावमन्येत कंचन।न चेतं देहमाश्रित्य वैरं कुर्वीत केनचित्॥क्रु
ध्यंतं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्॥सप्तद्वारावकीर्णां च न वाचमनृतां ॥१०२॥

वदेत्। अत्रिः॥ पण्ढं वा यदि वा पण्ढं पाचयेद्यः क्वचिद्यतिः। स्वधर्मस्य तु लोपेन
तिर्यग्योनिं व्रजेद्यतिः॥ ॥आवालः॥ अन्नदानपरो भिक्षुर्वस्त्रादीनां परिग्रही
। गुक्रीता मंदबुद्धित्वात्पूतीनरकयायिनो॥ वायुपुराणे॥ यस्तु प्रव्रजितो भू
त्वा पुनः सेवेत मैथुनं। षष्टिर्वर्षसहस्राणि विष्टायां जायते कृमिः। अन्या
गारेषु घोरेषु आखुर्भवति दारुणः। स तिर्यक्स्यात्ततोऽन्ध्रः श्वाविद्वादश
वत्सराः॥ सर्वतो विंशतिवर्षाणि दन्नावर्षाणि शूकरः। अपुष्पोऽफलितो वृक्षो जा
यते कंटकान्वितः॥ ततो दावाग्निना दग्धः स्थाणुर्भवति कामुकः। स्थावराच्च
परिभ्रष्टो योनिमन्यां समागच्छति॥ पूर्णे वर्षसहस्रांते जायते ब्रह्मराक्षसः। द्रु
त्विपाप्मा परिश्रांतः क्रव्यादः रुधिराशनः॥ क्रमेणाल्लभते मोदं कुलस्योसद

103

नेनच॥चंडालगर्भसंभूतोजायतेनात्रसंशयः॥अंगिराः॥नतीर्थसेवीनित्यंस्या
न्नोपदासपरोयतिः॥नचाध्ययनशीलःस्यान्नव्याख्यानपरोभवेत्।नकिंचि
द्बुषजाद्न्यदथानाद्धंतधमवनात्मविनाभोजनकालेतुभक्ष्ययेदात्मवान्यतिः
॥यतिधर्मविहीनस्तुसंसारान्नातिवर्त्तेत॥हर्षक्रोधौनकुर्वीतमनःपूतंस
माचरेत्प्रतिग्रहंनगृह्णीयान्नैवचान्यंप्रदापयेत्।प्रेरयेद्वातथाभिक्षुःस्वप्ने
पिनकदाचन॥विष्णुः॥वानप्रस्थगृहस्थाभ्यांप्रीतिंयत्नेनवर्जयेत्॥दत्तात्रेयः
॥जायाभ्रातृसुतादीनांबंधूनांचशुभाशुभं।श्रुत्वादृष्ट्वानकंपेतशोकहर्षौ
यजेद्यतिः॥हारीतः॥छेदनेभेदनेपाकेयतिर्यस्तुप्रवर्त्तते।तादृशंकश्चपलंद
ष्ट्वाप्रेतशौचंविधीयते।तिलधान्यहिरण्यंचगोभूदासीगृहादिकान्तदादाय ॥१०३॥

निषिद्धं तु यो ऽकृतेन व्रजेद्यतिः। स साधुभिर्बहिः कार्यः स्मृतोसौ पतितो यतिः॥
तं दृष्ट्वा भिन्नमर्यादं स्नानं कुर्यात्सहांबरं॥ अंगिराः॥ संन्यासं चैव यः कृत्वा पुन
रुत्तिष्ठते द्विजः॥ [illegible] नतस्य निष्कृतिः कापि स्वधर्मात्प्रच्युतस्य च॥ विष्णुः॥ आ
रूढो नैष्ठिकं धर्मं पुनरावर्त्तयेद्य[illegible]दि। आरूढपतितो ज्ञेयः सर्वधर्मबहिः कृतः
। स निंद्यः सर्वभूतानां पितृघ्नश्चैव जायते चंडालाः प्रत्यवसिताः परिव्राजकताप
साः। तेषां जातान्यपत्यानि चंडालैः सह वासयेत्॥ नैष्ठिकानां वनस्थानां यतीना
मवकीर्णिनां। शुद्धानामपि लोकेस्मिन् प्रत्यापत्तिर्न विद्यते॥ बहिस्मृय यथापि
स्मृतेराचारात्तु उभयथापि प्रकृतप्रायश्चित्ताः कृतप्रायश्चित्तास्त्विते सद्भिः सहा
ध्यायनात्रान्नादिव्यवहारानार्ह एव कृताः॥ यतः॥ प्रायश्चित्तैर्निरस्यंते पारलौकि

105

कामशुद्धता। नहि कीवचनात् न्यायबाधो बालवधादिवत्॥ मनुः॥ बालघ्नांश्च
कृतघ्नांश्च विशुद्धानपि धर्मतः। शरणागतहंतॄंश्च स्त्रीहंतॄंश्च न संवसेत् इ
ति न भोजनादि सर्वव्यवहारमाचरेदित्यर्थः॥ आविकं वाधिकं वस्त्रं नूलं नू
लपटीं तथा॥ प्रतिगृह्य यतिश्चैतान् पततेनात्र संशयः। उत्तमां वृत्तिमाश्रित्य
पुनरावर्त्तते यतिः॥ आरूढपतितो ज्ञेयः सर्वधर्मबहिःकृतः॥ वद्धश्च परिशि
ष्टः॥ पतत्यसौ ध्रुवं भिक्षुर्यस्य भिक्षोर्द्वयं भवेत्॥ धीपूर्वं रेतउत्सर्गो द्रव्यसंग्रह ए
व च॥ कांचनं च तिला गावो भूमिर्धान्यं धनं स्त्रियः। प्रतिगृह्य यतिस्त्वेतान् पत
तेनात्र संशयः॥ भूमिर्गोवाहिरण्यं च यतेर्यस्य परिग्रहः॥ तादृशो कश्मलं दृष्ट्वा
सचेलो जलमाविशेत्। यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनं। षष्टिवर्ष

सहस्राणि विष्टायां जायते कृमिः ॥ अभयं सर्वभूतेभ्यो दत्त्वा यस्तु निवर्त्तते ॥ हं
ति जातानजातांश्च प्रतिगृह्णाति यस्य चादि वास्य च प्रं चयानं च स्त्रीकथा लोल्य
मेव च । प्रपंचकः शुल्कवासश्च यतीनां पतनानि षट् । अन्नदानपते भिक्षुश्च वारो
हं तिदानतः । दातारमन्नपानानां यस्मै चान्नं प्रयच्छति ॥ क्रतुः ॥ माधुकरं समाहृ
त्य ब्राह्मणेभ्यो ददाति यः । स याति नरकं विप्रो भोक्ता चान्द्रायणं चरेत् ॥ कात्यायनः
॥ द्रव्यस्त्रीमांससंपर्कान्मधुमाक्षिकलेहनात् ॥ विचारस्य परित्यागाद्यतिः प
तनमृच्छति ॥ व्यासः ॥ क्रोधलोभपरो नित्यं निद्रालस्यपरस्तथा । विषादीच्छाप
रश्चैव श्रेयसो भ्रश्यते द्विजः ॥ दक्षः ॥ पारिव्राज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति ॥
श्वपादेनांकयित्वा तं राजा शीघ्रं प्रवासयेत् ॥ क्रतुः ॥ वीजघ्नं तेजसं पात्रं शुक्लो

105

अर्धं सितांबरं ॥ निशान्ते च दिवा स्वप्नं यतीनां पतनानि षट् ॥ दासीदासं गृहं यानं गो
भूधनान्यधनं रसान् ॥ प्रतिगृह्णाति यो मोहान्याकुलं शतत्रयं ॥ आविकं पट्टिकां
मांसं तूलिकां मे च कं मधु ॥ शुल्कं वस्त्रं च यानं च तांबूलं स्त्रियमेव च ॥ प्रतिगृह्य कु
लं हंत्यात्म प्रतिगृह्णाति यस्य चापुष्पं शाकं वा पत्रं वा फलमूलं तृणादिकं भंक्ष्य
च यस्तु संन्यासी नाके पतति ध्रुवं ॥ यः स्वधर्मं परित्यज्य यदन्यत् कुरुते द्विजः ॥
न तस्य निःकृतिः कार्या स्वधर्मा प्रच्युतो हि सः ॥ आंगिराः ॥ आरूढपतितो हं
ति दश पूर्वान् दशापरान् ॥ निस्तारयति तानेव यदि सम्यग्व्यवस्थितः ॥ स्त्रीत्रं ग
वो हिरण्यं च यतेस्य परिग्रहः ॥ तादृशं कश्मलं दृष्ट्वा सचेलो जलमाविशेत् ॥
विधवां कंचुकोपेतां सधवां कंचुकं विना ॥ यतिं च कुंचावापं तं दृष्ट्वा चन्द्रं निरी

॥१०५॥

त्येव।चत्वारि [illegible] पतनीयानि यतीनां मनुरब्रवीत्।अपधं सेनिधम
नं च एकान्नकांस्यभोजनं।एकान्नी द्विव्रती चैव भेषजी वसुसंग्रही।चत्वारो नर
कं यांति मनुः स्वायंभुवोब्रवीत्॥अथ प्रायश्चित्तं॥प्रायोगसारे॥तिष्टेन्नं चिरमा
दिथ्यमुपस्थायेवमिदसया।स्त्रिवाद्वादश संयच्छे आत्मा यापीं स्तादि वनु।वा
चं विसृज्य चाभाषपत्री तवनुविनिश्चयः उदक्या चोदितं चान्नं द्विजान्नं शूद्र
चोदितं।प्रातण्यंगो चायसे चान्नं पित्रर्थं कल्पितं तथा।देवादि कर्मणि ल्लस
तथापापे रुदाहृतं।नोत्पन्ना संततिः काचित् स्त्रियां पुंसो पिवा गृहे।नाश्नीया
त्तद्गृहे मिद्नुः श्रंश्चांद्रायणं चरेत्॥अशौचं वा गृहे यत्र यावत्सूतकमेव वा।
पाषंडि कुष्ठिमूत्राणघ्नैः दृष्टं चान्नमुदक्यया।श्वषंढकाकचंडालै रन्यैरं त्यांनसा

106 यिभिः। चांद्रायणं चरेद्बुद्ध्वाभिद्विजानुयथेच्छया॥ पाचेनु पतिते भेद्दोल्कुभिद्दां
करोतियः। सकुर्यात्स्नातमश्चांतः प्राणायामान्विशुद्धये॥ जमदग्निः॥ अथवायं
द्गुरुर्भूयात्तत्कार्यंमविशंकया। निग्रहेनुग्रहेवापिगुरुः सर्वत्रकारणं। विहा
यदंडं गच्छानोद्रुदशैवतुधारयेत्। बहिर्दंडं प्रतिष्ठाप्य गच्छनः षोडशैवतु
॥ भैक्ष्यमितिशेषः॥ अत्रिः॥ भैक्षंचपरपाकान्नसंमिश्रं योत्तिविपतिः। त्रिरात्रो
ला पोषितोभूत्वाप्राश्याथमशातंचरेत्॥ श्व काकगर्दभैर्लिरुष्ट्रैर्जंबूकैर्वानरैस्तथा। चं
डालपतितैः स्पृष्टं यतिः पात्रं विसर्जयेत्। पूयत्राणितमांसेषुस्पृष्टंमू
त्रपुरीषयोः॥ श्लेष्माश्रुरेतस्पृष्टं चयतिः पात्रं विसर्जयेत्॥ यमः॥ यदिपर्युषि
तं भैक्ष्यमश्नाद्भिक्षुः कथंचन। तदाचांद्रायणं कुर्याद्यतिः शुद्ध्यर्थमात्मनः। भिक्षु

र्द्धिं भोजनं कुर्यात्कदाचित्तज्ज्ञानदुर्बलः। खि स्त्रावस्थोयदात्वौत्स्यात्तदा चान्द्रायणं च
रेत्। आखुडुंबूकप्राज्ञारखरकाकोष्ट्रसूकरान्। भासवानरवेसूपाचनरास्थिग्रा
मकुक्कुटान्। नकुलंमद्यभांडं च यूपकाष्ठं विधर्मिणं॥ अपविद्धमसन्मार्गं चितिका
ष्ठं चितिं तथा। वसनं नीलिकाक्तं च धर्मभेत्तारमेव च। आमेध्यानि च यः खट्वं स्प्र
ष्ट्वा देवलकं यतिः। स्थाप्य पात्रं शुचौ देशे शुभं गच्छेज्जलाशयं। शौचं कृत्वा यथा
न्यायं कृत्वापि कुर्यादाचमनं ततः॥ प्राणायामत्रयं कृत्वा त्रिर्जपेदघमर्षणं। आतर्जे
लेयथान्यायं शुध्यर्थे योगदीक्षितः॥ मैत्राधारं समादाय त्रिकेणाप्यक्षवारिणा
। निमज्य च ततस्तोये शुध्यर्थे संकरेत्तदा। एवमेषा हि संस्पृष्टाभिद्वाभिर्विशुद्ध्य
ति। यदापात्रं न संलग्नं तदा शुध्यति नान्यथा॥ संलग्ने च यपात्रे तु सद्यस्त्याग्या विधी

१०

यते॥ उद्धृत्यं सव्याहृस्तेन तोयं पिबति यो द्विजः॥ सुरापानेन तत्तुल्यं पीत्वा चांद्राय
णं चरेत्॥ तांबूलाभ्यंजनं चैव कांस्यपात्रे तु भोजनं। कृत्वा तूपवसेद्विद्वुःस्व
गंधादि विभूषणं॥ जाबालः॥ संन्यासं कुरुते यस्तु श्राद्धं तस्य विधीयते। तस्मा
न्नैव भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ क्रतुः॥ भर्तृहीना तु या नारी स्वतंत्रा बंधुव
र्जिता॥ तदन्नं नैव भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ स्वधर्मात्प्रच्युता ये वि पुरुषा
योषितोपि वा॥ आवीरास्ते सदत्रे यानित्यं सद्भिर्विगर्हिताः॥ जमदग्निः॥ आहारय
हतो राजैः प्राणायाः प्रादुःस्मृताः। डल्लप्रग्रहतो राज्ञो प्राणायामास्तथैव च भुक्त्वै
षं न कुर्वीत प्रमादात्कुरुते यदि। प्रतिग्रासं प्रदाकुर्यात्त्रींस्त्रीन्प्राणायमान्यतिः॥ विशी
र्णं च मलं पंचपात्रं सोपह[illegible]ते यदा। तत्र मोहाद्यतिर्भुंक्ते चरेद्दिंदुव्रतं स कृत्॥ देवलः

॥ दृष्टं मूत्र घ्रणाखंडिः कुष्ठादि भिरुद्‌क्याया श्वखंढ काक चंडालैरन्यैरप्यावसायिभिः

।एतान्यन्नपन्न भुंजीत भुक्त्वा चांद्रायणं चरेत्। पतितान्नं सकृद्भुक्त्वा प्रायश्चित्ती भवेद्यतिः।

तप्तकृच्छ्रत्रयं कृत्वा शुद्ध्यते नात्र संशयः॥ यमः॥ उपानहौ विना भिक्षुः कृत्वा भिक्षाट

नादिकं। मार्गे मूत्रादि संकीर्णे सप्य कृत्स्नानेन शुद्ध्यति। अज्ञानाद्या भवेद्धि सायदे

भिक्षाटनेषु चित्। प्राणायामत्रयं कुर्वीत तथा चाप्य विशुध्यति॥ जाबालः॥ स्वस्थाव

स्थो यदा भुंक्ते पुनराद्रूयतद्दिने। अन्यग्रामेथवा तस्मिन् तप्तकृच्छ्रं समाचरे

त्। यदा ग्रामभक्ष्येषु भैक्ष्याद्रिद्रि प्रमादतः। स्वधर्मी कृच्छ्रलोलुब्धस्तदा चां

द्रायणं चरेत्॥ अत्रात्रिः। प्राणरक्षार्थं पुनर्मूलफलादिकं। भक्षयेन्निवदुष्टो

तमे भैक्ष्यं दंतधावनं॥ यथा न पीड्यते कायाने वांतक वर्शां व्रजेत॥ तथाध मेंच

108

।रद्भिरद्भिः पञ्चपनूलिकाग्रास्त्रच चक्षुषा। एकान्नं मधुमांसं च कन्नं विष्ठादि दूषितं
हतकारान्नं निवेद्यं च प्रत्यक्षलवणं तथा॥ एतान्भुक्त्वा यतिर्मोहात्प्राजापत्यं समाचरेत्॥
पत्न न्नं यतिपात्रस्थं यतिनाप्रेरितं च यत्। अन्नत्रयं न भोक्तव्यं भुक्त्वा चान्द्रायणं चरे
त्॥ अत्रिः॥ सक्तुपेषणगोदोहादध्यन्नपाकादिकालतः॥ ऊर्ध्वं यदि प्रतीक्षेत भि
क्षार्थं भिक्षामाचरेत्। कालातिक्रमदोषेण स्वधर्मात्प्रच्युतो भवेत्। इदं दृष्टे
व तथा कुर्यात्प्राणायामांश्च शुद्धये। ज्ञातीनां तु कुले भिक्षुर्न भिक्षेत कथं च
ना। आचारं तद्यदा भिक्षां तदा चान्द्रायणं चरेत्॥ प्राणायामशतं कुर्याद्भुक्त्वा शू
द्रान्नमापदि। सगोत्रं समगोत्रं वा यद्भुक्त्वाह सूतकं भवेत्॥ न तावच्छुध्यते भि
क्षुर्यावत्तस्मादनिर्दिष्टां भिक्षां भिक्षुर्न भिक्षेत भिक्षां चान्द्रायणं चरेत्। निषि

॥१०८॥

द्वान्नं यदाश्नीयादननुज्ञाय यत्र नास्ति वा। अतिकृच्छ्रं तदा भिक्षुः कुर्याच्छुध्यर्थमा
त्मनः॥ जमदग्निः॥ गंधं घ्रात्वा सुरायाश्च तथा मूत्रपुरीषयोः। क्रव्याद पूतिगंधं
च प्राणायामो विधीयते॥ वृद्धच्यः वामहस्ते न भाजनं योन्नमत्ति वा। गध्योच्छिष्ट
तु विज्ञेयं भुक्त्वा चांद्रायणं चरेत्। भुंजानस्य यदा भिक्षोः कदाचित्स्रवते गुदं। अ
न्नं चास्य गतं यच्च कृत्वा शौचं समाहितः। स्नानं कृत्वा यथा न्यायं त्रिंशत्प्राणाय
मांश्चरेत्॥ अहोरात्रोषितो भूत्वा पंचगव्यं पिबेत्ततः॥ आश्वलायनः॥ विनागु
च्छतनाश्नीयान्नलिप्ते जिह्वया करं। अश्नन्नादि लिहेद्धस्तं तदा चांद्रायणं च
रेत्॥ विश्वामित्रः॥ मत्स्यमांसादिबहुलं यद्गृहे पच्यते सत्रां। तद्गृहं वर्जयेद्भि
क्षुर्यदि भिक्षां समाचरेत्॥ द्वादशांस्तु यमान्कृत्वा ततः पापात्प्रमुच्यते। मद्यमां

109

दकम[illegible]मन्नं वा भोज्यान्नानादायिनः॥ आददानः प्रमादेन प्रायश्चित्तं समाच
रेत्॥ त्रिंशत्प्राणसंयमान्कृत्वा जपेत्त्रिकत्रातत्रयं॥ अज्ञानादेवं सेवितं प्राय
श्चित्तं विधीयते। अभ्यासादधिकं किंचिद्वर्द्धेत दिनसंख्यया। एकान्नं तुच
हं भुक्त्वा निरंतरमनापदि प्राणायामशतं कुर्याच्छुध्यर्थं यतिरात्मवान्॥ उन्मद
[illegible]ग्निः॥ कृकलासे सीरगलेमण्डूके गृहगोधिके कुक्कुटादिषु मृतेषु द
शाहं वार्द्धभोजनं। मार्जारमूषिके सर्व्वस्थूलमत्स्येषु पक्षिषु। नकुलादि
षु मृतेषु चार्द्धांद्रायणं व्रतं। पिपीलिकायां सूक्ष्मायां प्राणायामास्त्रयस्त्र
यः॥ यूकायां मत्कुणे चैव मशके पंचनिर्द्दिशेत्। मूलांकुरेषु पुष्पेषु च फले
षु च। स्थावराणां चोपमर्द्दे प्राणायामास्त्रयस्त्रयः। धमन्यं वर्द्धं लतायस्तुस्थो

॥१०९॥

वरं जंगमं तथा ॥ उत्पादयति मूढात्मा अवीचीं नरकं व्रजेत् ॥ अकामादपि हिं-
सितप शूक्ष्मजंग्वादिकान्यतिः । कृच्छ्रातिकृच्छ्रौ कुर्वीत चान्द्रायणमथापि वा ॥ हारी-
तकः ॥ अज्ञानाच्चापि यान् जन्तून् हिनस्त्यज्ञानतो यतिः । प्राणायामान् दशाष्टौ
वा प्रायश्चित्ते यतिश्चरेत् ॥ चान्दुषेदत्ता कुर्वीत वा च्यावित्रं ध्यातिमेवच । मानसैर्वि-
ज्ञातं वापि पातके प्राणसंयमान् ॥ यमः ॥ दिवसे रात्रिविरूपस्य प्राणायामास्तु षोड-
श । अपि भ्रूणहनं मासात्पुनंत्यहरहः कृताः ॥ कन्दपिण्याकतक्रं वा शाकं मू-
लफलादिकं । पक्वं चा यथा वा पक्वं पचनं ज्ञानतो यतिः ॥ आचरेत्रीणि कृच्छ्रा-
णि प्राकृतान्येव शुद्धये । अभ्यासाद्बुद्धिपूर्वं हि पाकदोषान्न मुच्यते ॥ वृद्धवसि-
ष्ठः ॥ सुवर्णं रजतं ताम्रं तैजसं यच्च किंचन । स्पृष्ट्वा परिव्राट् शूद्रं सवासा जल-

च

110 मा विशेत्॥ द्रव्यं तु मुद्रितं स्पृष्ट्वा त्रिरात्रेण शुचिर्भवेत्॥ अत्रिः॥ श्वाघ्र[illegible]ष्ट्रजंबु
कैर्दष्टे नरवानररासभैः। क्रव्यादिर्दष्टिभिश्चान्यैः प्रायश्चित्तं यतिश्चरेत्
। स्नात्वा वा सप्तव्याहृतिं कुर्याद्द्वादश प्राणसंयमान्। स्वकाये स्वयमुत्पाद्य रात्रावलि
तं वियतिः क्वचित्। प्राणायामत्रयं कृत्वा तथाचम्य विशुध्यति॥ अत्रिः॥ आरूढ
पतितं दृष्ट्वा विना स्नानं तु यश्चरेत्। पानभिक्षादिकं कर्म तदा चांद्रायणं च
रेत्॥ कपिलः॥ स्वप्नस्त्रीसंभोगे स्नात्वा त्रिकसहस्रं जपेत्॥ कंडूयनं द्वरलोउ
पवासः। लेंद्रत्रयं वाजपेयादिति॥ देवलः॥ स्वप्नस्कन्ने दुर्बलो वा प्राणायामा
न्षोडश। एतैः सेकं क्वचिद्दिक्षु कुर्यान्माहानुका मतः॥ प्राजापत्यत्रयं कृ
त्वा प्राणायामशतं चरेत्। स्वभावतो दिवा स्कन्ने प्राजापत्यं समाचरेत्॥ स्त्रियं दृष्ट्वा ॥११०॥

यदा स्वप्ने रेतः क्षरति विकचित् । सवासाप्लुत्य शुध्यर्थं कुर्यात् षोडश संयमान् ॥ उपवा
सं यतिः कुर्यात् पुनः सुमक्षारद्यादि प्राणायामैर्विशुद्धात्मा विरजो जायते पुनः ॥ व्रण
तु कृमिसंभूतौ मक्षिकाणामधुमांसयोः । उप[illegible]वासत्रयं कृत्वा प्राणायामशतं चरेत् ॥ पू
कायाः शतसंभूतौ उपवासं समाचरेत् । तांबूलभक्षणे भ्यागे कांस्यपात्रे च भोजने ॥ ए
केकातिक्रमे तेषां प्राणायामशतं चरेत् ॥ अदंडेन गृहं गच्छेदिषुद्दे पत्रिकादने ।
यदि गच्छेत् प्रतिगृहं प्राणायामत्रयं चरेत् ॥ हारीतः ॥ गुरुवचनातिक्रमे च धर्मातिक्र
मे च पत्नीं चांद्रायणं चरेत् ॥ वर्षाकाले विना विघ्नं त्रारणं सह्यजद्यादि । शुद्ध्यर्थं तु तदा
कुर्यात् कृच्छ्रं चशतसंयमान् ॥ प्रतिक्रोशं चरेत् कृच्छ्रं लोभ[illegible]मोहादिना यजन् ॥ सचैक्य
मः ॥ दंडग्रहणं त्वा पुत्रमित्रभ्रात्रादि संभाषणं न कुर्यात् । अज्ञानात्तु संभाषणं कृत्वा

प्रायश्चित्तेन युज्यते ॥ उपवासमेकं कृत्वा प्राणायामशतं कुर्यात् । तद्गृहं गच्छति स्वैरो
तिमिश्रां गच्छति प्रजापत्यव्रतं कृत्वा प्राणायामशतं चरेत् । तं दृष्ट्वा दुःखं करोति
अश्रुपातयत् प्रायश्चित्तेन युज्यते ॥ उपवासत्रयं कृत्वा प्राणायामशतं चरेत् ॥ अ
त्रिः ॥ यदि कश्चित्प्रमादेन विना स्नानं समाचरेत् । खानपानादिकं कर्म प्राजाप
त्यं तदाचरेत् ॥ सत्यकामः ॥ संध्यामतिक्रमल्लोभिक्षुः प्रायश्चित्तं समाचरेत् ॥ जप
त्रिकं सहस्रं प्राणायामांश्च षोडश ॥ पैलः ॥ पूर्वसंभोगं न स्मरेत् ॥ प्रमादात्स्मर
णादावस्य प्राणायामत्रयं कृत्वा पुनराचामेत् ॥ स्वप्नसंभोगे स्नात्वा त्रिकं सहस्रं
जपेत् ॥ अत्रिः ॥ तिलधान्यसुवर्णानि गोभूयानगृहादिकं । दासीदासं रसं गंधं
याचितायाचितं तु यत् । कृदिशोकं पुरा कृत्वा तत्सर्वं तु परित्यजेत् । संध्याजपसर्वं द

॥११॥

व्यंनुचरेच्छ्रौं द्रायणं यतिः। प्रहीणं तु यदा द्यायति स्तिलनकुशादिकं। प्रक्षिप्य
तद्धृतं भूम्यां मोचारक्कृच्छ्रं जपेत्रिकं॥ वायुपुराणे॥ संन्यासी यो हि भूत्वा तु हिरण्यं स
गृहे यदि॥ तस्य दर्शनमात्रेण सचैलो जलमाविशेत्। द्रव्यादानं यतिर्यो वि
करोति च नराधमः। पच्यते नरके घोरे यावदाहूतसंप्लवं। आद्धृतभावमाश्रित्य
द्धृताचारेणवर्त्तते। रुदंति पितरस्तस्य हा कष्टं पतितं पुनः॥ लब्धं द्रव्यं परित्यज्य
उपवासत्रयं चरेत्॥ प्राणायामशतं कृत्वा त्वयुतं जपमाचरेत्॥ सामर्थ्ये शिबिका
मश्वं गजं वृषभमेव वा शाकटं वा रथं वापि समारुह्य च कामतः॥ व्रतं सांतप
नं कुर्यात् प्राणायामशतान्वितं। असामर्थ्ये समारुह्य यानं पूर्वोदितं पुनः॥ कृ
च्छ्रकं शोधनं तत्र प्राणायामस्त्रिकामतः॥ स्वयं पक्कान्नं तु यो भुंक्ते तस्य तपनत्र

112

यं।प्राचयित्वानुयोभुंक्तेतस्यकृच्छ्रंविधीयते।गलूषपादस्योचानियस्मिन्नूपा
त्रेचनिक्षिपेत्॥षण्मासांन्निक्षिपेद्भूमौदशरात्रेणशुध्यति॥मार्कण्डेयपुरा
णे॥ ॥मूत्रोच्चारंतुयःकृत्वाप्रकृत्वाशौचमात्मनः॥मोहाद्भुक्त्वात्रिरात्रंसग
व्यंपीत्वाविशुध्यति॥गव्यंघृतं॥मूत्रंकृत्वाव्रजेन्मार्गेस्मृतिभ्रंशाज्जलंपिबे
त्।उपोष्यरजनीमेकांपंचगव्येनशुध्यति॥छागलेयः॥व्रतानियानिभि
क्षूणांतथैवोपव्रतानिच॥एकैकातिक्रमेतेषांप्रायश्चित्तंविधीयते।अ
त्रोरात्रोषितोभूत्वाकृच्छ्रंचांद्रायणंचरेत्॥ज[illegible]पातज्ञानान्तथाध्यमनान्नान्य
द्विलोमस्तुश्रोधनात्तस्मात्तानिसदाकुर्याद्याति:शुध्यर्थमात्मनः।उपपात
किनोभिक्षोर्लंध्याहरोजपस्तपः॥मौनंकालत्रयेस्नानंविहितानिविशेष ॥११२॥

नः।सहस्राणियसाकुर्यात्प्रणवस्यायुतंजपेत्॥आरण्येव्रतमेतत्तुब्रामिर्वि
शुध्यति।महापातकजान्दोषान्शुध्यर्थंतुसदायतिः॥क्रिकलदंजपेद्यो
गीप्राणायामायुतंतथा॥ततःशतसहस्रंतुप्रणवानांजपेद्यतिः॥स्त्रीसंभोगे
सकृन्मोहाद्विधिनानेनशुध्यति स्मयंतरे॥अतःप्रज्ञान्यलिंगस्ययतिश्चां
द्रायणंचरेत्॥रेतोत्सर्गेयदाकुर्यात्प्रायश्चित्तीभवेद्यतिः॥प्राजापत्यत्रयंकु
र्यात्प्राणायामसतानिच॥कपिलः॥कंडूयनक्षरणेउपवासः॥चिंतनेत्रिरा
त्रं॥मधुमांसास्वादनेचसकृत्स्त्रीगमनेद्वादशरात्रमुपवासयेत्॥त्रिलक्षंजपे
द्भ्याससकृदथंयजागमने॥आरण्यंगत्वाबिल्वादिफलैःस्वपतितिर्यति
श्चांद्रायणव्रती।ब्रह्मावर्तेयन्नावज्जीवंवसेन्मतःशुध्यति॥आपस्तंबः॥स्व

113

कश्चर्मकारश्च नटो बरुड एव च ॥ किवर्त्तमेदभिल्लाश्च सप्तैते अंत्य
जाः स्मृताः ॥ दत्तात्रेयः ॥ उपेत्य तु स्त्रियं कामात्प्रायश्चित्तं विधीयते । प्राणायाम
समायुक्तं कृच्छ्रमब्दं समाचरेत् ॥ तथैव च पुनः श्रांतः कुर्यात्सांतपनं व्रतं । तत
श्चरितनिर्दिष्टात् कृच्छ्रः स्यात्समाहितः ॥ पुनश्चाश्मप्रागाग्यचराद्विरुक्तं
द्विजः । पराकं त्रिकलं दद्याच्च सकृद्वा स्त्रियं चरेत् ॥ त्रिरात्रमभ्यासे चैव संव
त्सरं त्रिकं जपेत् । गृहस्थश्च यतिश्चैव वर्षं दिनो यदि कामतः ॥ पराकत्रय
संयुक्तो अवकीर्णिव्रतं चरेत् ॥ स्कन्नं इंद्रियदौर्बल्यात्स्त्रियं दृष्ट्वा यतिर्य
दि तेन धारयितव्या वि प्राणायामास्तु षोडश ॥ इच्छया यदि ताः पश्येत् प्राणा
यामास्तु षोडश । रात्रौ पुष्करतो स्नात्वा द्वादशैव तु धारयेत् ॥ स्वप्ने सेकप्र ॥११३॥

बुद्धश्चेन्म्रू द्विर्द्विर्दशाभिर्यतिः। स्नात्वा चैवं कृत्वा विशुध्येत षोडशप्राणसंयमैः ॥ रात्रि
त्रौ षेयदा स्वप्ने रेतो मूत्रं च वापयेत्। स्नानं कृत्वा विशुध्येत षोडशप्राणसंयमैः
॥ पुनः प्रसंगे सुप्तस्य द्वैगुण्यं तु वीधीयते। स्कन्ने ज्ञाते नु सुप्तश्चेद् उपवासस्तदा भवे
त् ॥ आलिंगनादिषु स्कंन्नेन वियोगे चैवं द्विविधं यदा। कृच्छ्राद्धेन जपेल्लक्षं ततः शुद्धि
र्भिया द्यतिः। सशायाश्चेत्कृते तस्मिन् पुनः स्नात्वा समाचरेत् प्राणायामशतं कृत्वा
तस्माद्विकृद्विशुध्यति ॥ ऋतुः ॥ तांबूलभक्षणे भ्यंगे कांस्यपात्रेषु भोजने ॥ एकि
का [illegible]तिक्रमेत षां प्राणायामाद्दशस्मृताः ॥ आखुश्च जंबुके दृष्टे नरासभवान
रः। कृत्वाद्विर्द्विर्मिश्रान्यैः प्रायश्चित्तं यतिश्चरेत् ॥ स्मरन् हरिहरं गंगां कृत्वा
स्नानं यथाविधि। द्वादशैव विशुध्यर्थं प्राणायामान् समाचरेत् ॥ सद्यकामः ॥ स्त्री

शूद्रयोर्दंडीतरगमने प्राणायामांस्त्रीन् करोति॥ स्वखरोष्ट्रातरगमने प्राणा
मान् षडाचरेत्॥ स्वसूकरचंडालांतरगमने प्राणायामान् द्वादश॥ विहिता
तिक्रमे कृत्वा प्राणायामान् द्वादशैवेति॥ वायुः॥ अदं डो निवर्तिष्ठतयतिः कुत्र
चिदात्मवान्। यदि तिष्ठेत् प्रतिदिनं प्राणायामशतं चरेत्। दंडात्मनोस्तु वंडा
लेर्यं वधमने नभिक्षुकः। प्राणायामशतं तुर्यो म्नात्राभेदे तथैव च। शूद्रेणाव्य
वधाने तु प्राणायामांस्तु षोडश। द्वादशाष्टौ च चत्वारि विट्क्षत्रियद्विजोत्तमैः
। जलौ वरे षुक्ष्मि मैथुनकस्त्रिद्वोषभाग्भवेत्। भग्नदंडादिकं चैव जलेगाधे क्षिपे
द्यतिः॥ मद्यमूत्रपुरीषश्लेष्मशुक्रकीलालशोणितैः। स्पृष्टं दंडं त्यजेद्भिक्षुः त्रोषे
:संस्कारमर्हति॥ प्रातःस्नानं विना कामात् प्राणायामशतं चरेत्॥ एवमेव तु साया

॥११४॥

के मध्यमङ्के तु सह स्वकं । प्रेतश्राद्धे यतिर्भुक्त्वा चरेच्चान्द्रायणत्रयं । पितृस्थाने विना
न्यत्र श्राद्धं भुक्त्वा तदेव तु । एकश्चोत्पितृके स्थाने द्वितीयो विश्वदेविके । श्राद्धदि
ने विना श्राद्धं भुक्त्वा सांतपनं चरेत् ॥ बहुभोज्ये यतिर्भुक्त्वा कुर्यादेतल्लव्रतं पुनः ।
वाग्दंडो हंति विज्ञानं मनोदंडः परां गतिं । कर्मदंडस्तु त्रीन् लोकान् हन्यादपरिरक्षि
तः ॥ वाग्दंडो मौनमातिष्ठेत् कर्मदंडस्त्वभोजनं ॥ मानसे तु कृते दंडे प्राणायामो
विधीयते ॥ एकस्मिन्नपि निमित्ते गुरुलघुप्रायश्चित्तविधानं तु विद्वदविद्वत्स बुद्धिपू
र्वं प्रसङ्ग्यादि विभागतो द्रष्टव्यं । तत्रापि मंद मध्यमाधिकादिभिरवशीकृत
चित्तैस्तु कृच्छ्र चांद्रायण प्रणवजप प्राणायामादयः कार्याः ॥ वशीकृत चित्तैस्तु
ध्यानेनैव कार्यं ॥ उक्तं च ॥ प्रायश्चित्तेषु सर्वेषु यते ध्यानं विशिष्यते । प्रणवस्य

115

जपो वाप्य मूलमंत्रश्च संस्मृतः॥ प्राधान्यं श्रूयते श्रुत्यां प्रणवस्य जपादिषु॥ तस्मा
त्सर्वप्रयत्नेन प्रणवे कृपरो भवेत्। जपात् ज्ञानात् तथा ध्यानात् नान्यद्धि क्लिशशो
धनं॥ तस्मात्तानि सदा कुर्याद्युतिः शुध्यर्थमात्मनः। सर्वपापप्रसक्तो हि ध्यायन्निमिष
मच्युतं। द्विजस्तपस्वी भवति पंक्तिपावन एव सः। ध्यानेन सदृशं नास्ति शोधनं पाप
कर्मणां॥ श्वपाकेष्वपि भुंजानो ध्यायी नैव तु लिप्यते। कृष्णानुस्मरणादेव पापसंघा
तपंजरं। शतधा भेदमायाति गिरिर्वज्रहतो यथा। अग्निरुद्धसिखः कक्षं दहति सा
निलः॥ तथा चित्तस्थितो विष्णुर्नराणां सर्वकिल्बिषं॥ यथा विलीयते सद्यः संक्षयं
याति पातकं। तथास्यनाशापत्येति यत् दुःखं व्याधितो भवेत्॥ ज्ञानहृदे ध्यानजले
रागद्वेषमलापहे। यः स्नाति मानसे तीर्थे स याति परमां गतिं॥ कालोपित्र्यादिदोषा

द्यो विषयाकृष्टमानसः। कृत्वापि सकलं पापं गोविंदं संस्मरंछुचिः॥ शुचिरप्रयतो वा
पि सर्वावस्थां गतोपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः। कलिकल्मष
मत्युग्रं नरकार्तिप्रदं नृणां॥ प्रयाति विलयं सद्यः सकृद्विष्णोहि संस्मृते॥ छ ॥ अत्रि
ः॥ उपपातकेषु सर्वेषु पातकेषु महत्सु च। प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरे
त्॥ ब्रह्महत्यासहस्राणि अगम्यागमनानि च॥ एकेन ध्यानयोगेन नन्नु रूपच्यवन्यान्य
पि दह्नणात् यदि स्यात्पातकं किंचित् योगी कुर्यात्प्रमादतः॥ योगमेव निषेवेत नान्य
यत्नं कदाचन॥ विष्णुपुराणे प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै। यानि
तेषामशेषाणां कृष्णानुस्मरणं परं॥ कृते पापेनुतापो वै यस्य पुंसः प्रजायते। प्राय
श्चित्तं तु तस्यैकं हरिसंस्मरणं परं॥ प्रातर्निशि तथा संध्यामध्याह्नादिषु संस्मरन्। ना

116

राघवण्मवाप्नोति सद्यः पापक्षयान्नरः। विष्णुस्मरणसंदीप्तसमस्तक्लेशसंचयः। मु-
क्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोनुमीयते। वासुदेवे मनो यस्य जपहोमार्चनादिषु। त-
स्यांतरायो मैत्रेय देवेंद्रत्वादिकं फलं। क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणं।। क्व
जपो वासुदेवेति मुक्तिबीजमनुत्तमं। तस्मादहर्निशं विष्णुं संस्मरन् पुरुषो मुने।।
न याति नरकं शुद्धः संक्षीणाखिलपातकः। इति धर्मसमुच्चये।। अश्वमेधसहस्रेषु
वाजपेयशतैरपि। यत्पापं विलयं याति स्मृते तेन रूपतितद्धुरौ।। गंगास्नानसहस्रैश्च
पुष्करस्नानकोटिभिः। यत्पापं विलयं याति स्मृते तेन रूपतितद्धुरौ।। ब्रह्महत्यासह-
स्राणि अगम्यागमनानि च। एकेनधमनयोगेन नरूपं त्येतान्यपि द्रुणात्।। ग. हस्के
नानि पापानि भवंत्याश्रमितो यदि। त्रोबवछोधनं तेषां प्राक्कब्रह्मलादर्शनात्।।

।।११६।।

ज्ञानिनां सेवनाच्छुद्धिर्ज्ञानस्येति न संशयः। भिद्यते ग्रंथिर्मोहश्छिद्यंते सर्वसंशयाः।

। क्षीयं॥ क्षीयंते चास्य कर्माणि ज्ञाते ब्रह्मणि तद्विदः। सर्वसन्न्यासपरित्यज्य यस्तु ब्रह्मणि वर्त्ते

ते। लिप्यते न स पापेन पद्मपत्रमिवांभसा। यद्वाल्पेयस्य कौमारे यत्पापं यौवने कृते। तत्पा

पमखिलं क्षिप्रं स्मृते विष्णौ प्रणश्यति॥ भगवद्गीतासु॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पा

पकृत्तमः। सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि॥ याज्ञवल्क्यः॥ भूतात्मनस्तपोविद्ये

बुद्धेर्ज्ञानं विशोधनं। क्षेत्रज्ञस्येश्वरज्ञानात् विशुद्धिः परमा मता॥ स्कंदपुराणे॥ अभक्ष्य

कृतात्पापादगम्यागमनादिजं। नश्यते नात्र संदेहो गोविंदस्य च कीर्तनात्। गोविंदेत्युक्ते

[illegible] त्वघा कलिवर्द्धन॥ पापापोह्यां विलयं यांति दानमश्रोत्रिये यथा। तन्नास्ति कर्मजं

लोके वाग्जं मानसमेव वा॥ य [illegible] न क्षीयते पापं कलौ गोविंदकीर्तनात्॥ वामनपुराणे॥

तु२

अश्वमेधादिभिर्यज्ञैर्नरमेधैस्तथैव च। यजितं तेन येनोक्तं हरिरित्यक्षरद्वयं॥ विष्णुपु

राणे॥ अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः। पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरि

117 व॥ यन्नाम कीर्त्तनं भक्त्या विलापनमनुत्तमं। मैत्रेयाशेषपापानां धातूनामिव पावकः

॥ कमलनयन वासुदेव विष्णो धरणिधराच्युत शंखचक्रपाणे। भव शरणमितीरयंति

ये वै त्यज भट दूरतरेण तानपापान्॥ ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयेत॥ यदाप्नो न्य

ति तदाप्नोति कलौ संकीर्त्य केशवं॥ यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि यच्चिंत

ने विघ्नो यत्र निवेशितात्ममनसां ब्राह्मोपि लोकोल्पकः। मुक्तिं चेतसि यः स्थितोमम

लधियां पुंसां ददात्यच्युतः। किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्त्तिते॥ एवं सु

व्रतशरा जनसदा नाशायणां विभुं। यमलोकं न पश्येत्तु नरकं सुकृतः पुनः॥ ८ एवं नापि

स्तुवन्नित्यं स्मरन्नपि युधिष्ठिर। महापातकजालेभ्यो मुच्यते सर्वकिल्बिषात्॥ क
लेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः। कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजे
त्॥ येहनिशं जगद्धातुर्वासुदेवस्य कीर्तनं। कुर्वंति तान्नरव्याघ्र न कलिर्बाधते नरा
न्। चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत्॥ सर्वेषामेव पापानां संघाते समुप
स्थिते॥ अभ्यसेद्दश साहस्रं प्रणवं शोधनं तु तत्। दिने दिने तु वेदांतश्रवणाद्भक्ति
संयुतान्। गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं भवेत्। वेदांतश्रवणादेव नश्यंत्यु
पपातकाः। महापातकसंघाश्च नित्यं वेदांतसेवनात्॥ महाभारते भीष्मवचनं॥
एष मे सर्वधर्माणां धर्मोधिकतमो मतः। यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं। लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो

118

भवेत् ॥ मनुः ॥ जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यो
न्मैत्रो ब्राह्मण उच्यते । जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते ॥ अहिंसया च भूतानां ज
पयज्ञः प्रवर्त्तते । अमायत्वं जलं वह्निं सममसौ भास्करोदयः ॥ कीर्तिः कलेर्घोरघस्मन
मसंकीर्त्तनं हरेः ॥ स्तुत्वा विष्णुं वासुदेवं विपापो जायते नरः ॥ विष्णोः संपूजनान्नित्यं
त्तिन्दुः सर्वपापं प्रणश्यति । वरदस्मृतिपुराणेभ्यो वाक्यान्येतानि यत्नतः । विश्वेश्वरे
णमुनिना संगृहीतानि भागशः । यतिधर्मप्रकाशाय ज्ञानमोक्षप्रसिद्धये ॥ एकत्रप
रहंसानां मुमुक्षूणां विशेषतः ॥ छ ॥ इति श्रीपरमहंसपरिव्राजकविश्वेश्वरसर
स्वतीसंगृहीते यतिधर्मसमुच्चये नित्याचारः ॥ ॥ अहस्त्यादिभिर्यतिः पूज्यः ॥ उ
क्तं भगवता ॥ एकदंडी त्रिदंडी वा शिखी मुंडी तथैव च । काषायमात्रधर्मोऽपि यतिः पूज्यो

युधिष्ठिरेति॥ अत्रिः॥ चतुर्विधमाभिक्षुकः स्यात्कुटीचरबहूदकौ। हंसः परमहंसश्च
योयः पश्चात्सउत्तमः॥ ब्रह्मचारीसहस्रेच वानप्रस्थशतानि च। ब्राह्मणानां च कोटि
स्तु यतिरेकोविशिष्यते॥ अत्रिः॥ साक्षाद्वि[illegible]ा कृतिर्विप्रो नमस्योयं सुरासुरैः। चल
श्रमैः समस्तैश्च परहंसोद्विजोत्तमः। द्विरूपे वासुदेवस्य चलं चाचलमेव च। चलं सं
न्यासिनां रूपमचलं प्रतिमादिकं। देवतां प्रतिमां दृष्ट्वा यतिं दृष्ट्वा करंडिनं। नमस्का
रमकुर्वाणो नरकं रौरवं व्रजेत्॥ विष्णुलिंगाश्रितं विप्रं दृष्ट्वा चैव नराधमाः। स्थि
ताः शय्यासने यानेन यजंति विमोहिताः॥ अभ्युत्थानं नमस्कारः प्रसन्नवदना
दिकं। कर्मणा मनसा वाचा येन कुर्वंति सत्क्रियां। सदाचारपरिभ्रष्टास्ते पापा यां
त्यधोगतिं॥ हारीतः॥ सर्वेषामाश्रमाणां तु संन्यासी स्यात्तमाश्रमी। सएवाग्रनमः

119

स्वस्वाङ्कन्यासमन्त्राग्रवर्तिभिः । ब्रह्मिष्ठः परमोहंसः साक्षान्नारायणः स्मृतः । यस्तु
सं पूजयेन्नित्यं विष्णुस्तेन प्रपूजितः ॥ अष्टाक्षरेण मंत्रेण यतयस्तु नमस्कृताः । स्मृतना
रायणं घ्नंति प्राणिनां पापपंजरं ॥ अष्टाक्षरेण मंत्रेण नमो नारायणात्मना । नमस्यो
भक्तिभावेन विष्णुरूपी यतिर्यतः ॥ वृद्धयाज्ञवल्क्यः ॥ उपचर्यः सदा भिक्षुः श्रा
मस्थो विचक्षणैः । व्रतलोपो यथा चास्य न भवेद्धि तथा तथा ॥ जाबालेः ॥ आसनं श
यनं यानं यतिं दृष्ट्वा न यस्त्यजेत् ॥ समस्तोपि हि दुष्टात्मा श्वयोनावेव जायते ॥
दुर्वृत्तो वा सुवृत्तो वा यतीनां निंदां न कारयेत् । यतीन्विदूषमाणस्तु नरकं याति दारु
णं ॥ यतिहस्तगतं द्रव्यं गृह्णीयात् ज्ञानतो यदि । अधः स नयते मूढः कुलानामेकविं
शतिं ॥ वृद्धयाज्ञवल्क्यः ॥ शुष्कमन्नं पृथक्पाकं यो यतिभ्यः प्रयच्छति । स मूढो नर

कुर्यात्तेन पापेन कर्मणा। यतिभ्यः श्रद्धया दद्याद्भिक्षां पात्रप्रपूरणीं। न क्षीयते च तत्त
स्य कल्पकोटिशतैरपि। भिक्षाकाले यतिर्यस्य गृहं प्राप्तो यदा भवेत्। देयाः सर्वे रसास्तस्म
। आत्मनः शुभमिच्छता पूरयित्वाह विष्णिणा यतये यः प्रयच्छति। पात्रं स उद्धरेत्पूर्वान्
पितृन्नरकाश्रिताः॥ यावंति यतिपात्राणि यावद्यन्नं प्रतिष्ठितं। तावद्वर्षसहस्राणि
स्वर्गलोके महीयते॥ संवर्त्तः॥ ब्रह्मचारी यतीनां च वपनं यस्तु कारयेत्। नखकर्मादि
कुर्वाणश्च सुभान्न जायते नरः॥ क्रतुः॥ न क्रियायोगमाचारं शौचाशौचं शुभाशु
भं। पृच्छेन्माधूकरायातं कुलं शीलं श्रुतं यतेः। आश्रमेषु यतिर्यस्य मुहूर्त्तमपि वि
श्रमेत्। किं तस्यान्येन धर्म्मेण कृतकृत्यो हि स स्मृतः। जन्मप्रभृति यत्पापं गृहस्थेन
तु संचितं॥ तत्सर्वं नाशयत्याशु एकरात्रोषितो यतिः॥ यतियोगी ब्रह्मचारी शतायुः स

120

च्यवाक्सती। सच्चीवदान्यः शूराश्च स्मृताः शुद्धाश्च ते मदा॥ ऋ ३॥ व्याधितानां तु भिक्षू
णां कुर्याद्यत्नमखंडवं। पथ्याद्यैः परिचर्यां च भेषाद्यैरुपाचरेत्। किं तस्यान्येन ध
र्मेण स्वर्गे सोऽमृतपा भवेत्॥ यतिप्रार्थ्यं प्राप्य लोकं सोऽनंतसुखमश्नुते॥ अदुष्टाप
तितं विप्रं यतिर्यः परिवर्जयेत्॥ स तस्य सुकृतं दत्त्वा दुःकृतं प्रतिपद्यते। तथैव च
गृहस्थस्य निराशो भिक्षुको व्रजेत्॥ इष्टं दत्तं तपोधीतं सर्वमादाय गच्छति। सं
चितं यद्गृहस्थस्य पापमामरणांतिकं। निर्दहिष्यति तत्सर्वं भिक्षान्नोषितो य
तिः॥ यतिर्यस्य गृहे भुंक्ते तस्य भुंक्ते हरिः स्वयं। हरिर्यस्य गृहे भुंक्ते तस्य भुंक्ते
जगत्त्रयं। वाटेषु समदत्तं स्याद्गृहस्थे द्विगुणं। स्मृतं। वानप्रस्थे त्रातगुणं यतौ द
त्तमनंतकं। कुर्याद्ब्रह्मसर्थं यस्तु दद्याद्वापतये व पि। ज्ञानिने तु विशेषेण स याति ब्रह्म उ

॥१२०॥

णः पदं यतिहस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलं। तद्भैक्षं मेरुणा तुल्यं तज्जलं साग
रोपमं॥ विष्णुः॥ भिक्षादाने न सदा भिक्षोः सलिलं दक्षिणे करे। दद्याद्भिक्षां प्रयच्छेत्तु
पात्रे सव्यकरे स्थिते॥ अत्रिः॥ भिक्षां सत्कृत्य यो दद्यात् विष्णुरूपाय भिक्षवे। कृत्स्ना
वा पृथिवीं दद्यात्तेन तुल्यं न तत्फलं॥ हारीतः॥ सर्वेषामपरधर्मानां यतिनिंदाग
रीयसी। यतिर्नारायणः साक्षात्तस्मात्तां परिवर्जयेत्॥ बौद्धायनः॥ यतिमागतं स्वा
गतमित्युक्त्वाभ्युत्थायासनं पादशौचमभ्यंजनं चंदनं दत्वा कुशलमभिभाषोपासी
ता काले चान्नं प्रैक्षमुपहरेत् स्नातस्योपचार इति॥ ब्रह्मांडपुराणे॥ काले वा यदि वाका
ले श्राद्धं कुर्यादतंद्रितः। पितृणां तृप्तिकामस्तु यतीन्प्राशद्द्विजोत्तमः॥ दक्षः॥ विना
मांसेन मधुना विना दक्षिणयाशिषा। परिपूर्णं भवेत् श्राद्धं यतिषु श्राद्धभोजि

अपक्वान्नं परित्यज्य पचंतं पक्वभोजयेत्॥ आसुरं तद्भवेच्छ्राद्धं पितृणां नोपतिष्ठति २५

षु॥ शिववाक्यं स्कंदपुराणे॥ ब्रह्मा विष्णुश्च रुद्रश्च ससाध्यमरुतस्तथा। सरुद्रैस्तु तै
न यतिना पितृदेवाः सवासवाः॥ सर्वे त तृप्तिमायांति दत्त्वा वर्षाणि पंच च॥ जन्म
(12) कोटिसहस्रैषु पूजितस्तेन शंकरः॥ गृहे यस्य समायाति महाभागवतो यतिः॥
यतिभिः पूज्यमानैस्तु सर्वे देवाः सुपूजिताः। अपमाने कृते तेषां देवाः सर्वेऽपमा
निताः। सदोषं निर्गुणं वापि यतिं पुत्र न कीर्तयेत्। अज्ञानात् कीर्तयेद्यस्तु स याति
नरकं ध्रुवं। येनापमानितो भिक्षुस्तेनाहं चापमानितः। हरिर्ब्रह्मादयो देवाः पितरो मु
नयस्तथा। आगच्छंति सुराः सर्वे ऋषयो मुनिपुंगवाः। तीर्थानि क्रतवः सर्वे भिक्षु
के गृहमागते। यतिर्यस्य गृहस्थस्य संतुष्टो वसते गृहे। तुष्टो भवति दिव्यारिर्यो वदा
भूतसंप्लवं॥ येन मंति यतिं दृष्ट्वा काषायवाससं। स राजसूयफलावाप्तिस्तेषां भ

॥१२१॥

वतिपुत्रकाः। यतिरूपेण सर्वत्र विष्णुः पर्यटते महीं॥ अज्ञात्वा मनुजं पापमहत्सर्ववि
चक्षुये। यदाकार यतिस्नानं यतीनां यो द्विजोत्तमः॥ स्नानजलमते पुण्यं गंगायाः शत
वार्षिकं। कौपीनाच्छादनं दंडं बहिर्वासश्च पादुके। यो ददाति यथाशक्त्या पुण्यं तस्य
वदाम्यहं। दत्तं वाजिसहस्रं तु मातंगानां शतत्रयं। गोसुतस्य सहस्रस्य फलं प्राप्नोति मा
नवः॥ कौपीनाच्छादनं पात्रं भिक्षुकेयः प्रयच्छति। वाजपेयसहस्रं पुण्यं विष्णुर्दिश्य य मु ५
त्कृतं। ध्यानं भिक्षु प्रति क्रम्याय यद्यन्नं भोजयेद्गृही॥ न तत्फलमवाप्नोति सर्वांगात्रं प्रता
पयेत्॥ सुहृद्डयतां द्रियं शीतं ध्यानं भिक्षुमकल्मिषं। तन्नित्यं भोजयेच्छ्राद्धे दैवे पित्र्ये
च कर्मणि। अग्निचिल कपिला सत्री राजा भिक्षुर्महोदधिः। दृष्टमात्राः पुनंत्येते तस्मा
त्पश्येत नित्यशः। पक्वान्नं स्वामिको भिक्षुर्यदि तस्मिन्न दीयते। चान्द्रायणेन शुद्धि

ःस्यात् इति च स्मृतिशासनं ॥ यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ तयो
रन्नमदत्वा स्नात्वा भुक्त्वा चान्द्रायणं चरेत् । लक्षलक्षाणि यो दद्याद् ब्राह्मणे वेदपार
गे । न चान्नं च विदेशिस्तां तयोस्तुल्यफलं भवेत् । संन्यासदिवसे यस्य यतिर्भैक्षं
समाचरेत् ॥ पुत्रं स लभते श्रेष्ठं सफलं तस्य जीवितं । द्वितीयदिवसे चैवं तृतीये पंचे
वमेव हि ॥ अतस्त्रिदिनमध्ये तु यतिर्भोज्यः प्रयत्नतः ॥ पराशरः ॥ अकृते वैश्वदे
वे तु भिक्षुके गृहमागते । उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेत् । विश्वदेवकृ
तं दोषं भिक्षुः शक्तो व्यपोहितुं । न हि भिक्षुकृतं दोषं वैश्वदेवो व्यपोहति । निवेद्य
यतये । श्राद्धपितृकर्माणि भिक्षुकं । आकल्पकालिकीं तृप्तिं पितॄणामुपजा
यते ॥ बौधायनः ॥ पुत्रेणेति संन्यासिमृतश्रवणारभ्यैकादशाह एव पा

र्वणं।विधमनवलादितियथायतोमृतावोर्द्ध्वदैहिकप्रत्याम्नायेविहितमेकादशाहेपा
र्वणंश्राद्धंप्राप्तं॥ब्रह्मनिष्ठेचसंन्यस्तेपितर्युपरतेश्रुते।सपिंडीकरणंनैवनाशौचंनो
दकक्रिया।अहन्येकादशेप्राप्तेपार्वणंतुविधीयते।सपिंडीकरणंनितकर्त्तव्यंतुसु
तादिभिः।सद्यःसंन्यसनादेवप्रेतत्वंनैवजायते।एकोद्दिष्टंनकर्त्तव्यंसंन्यस्तानांक
दाचन॥शौनकः॥ब्राह्मीभूतेचसंन्यस्तेतातेचनिधनंगते।नतस्यसूतकंकार्यनच
पिंडोदकक्रिया॥ब्राह्मीभूतस्यतस्यात्रकर्त्तव्यंतैववविद्यते।दशाहेत्वतिक्रांतेपु
त्रःकुर्यात्तुपार्वणं॥प्रत्यब्दंपार्वणंकुर्यात्एषधर्मःसनातनः॥द्वादशाहमनध्यायंस
कुर्याच्छिष्यःसमाहितः।खननंवहनंस्पर्शंसंकुर्वन्शुद्धिमिच्छति।स्नानमात्रेण
लभतेअश्वमेधंपदेपदे॥अपुत्रोलभतेपुत्रं।ॐचिरंजीवितमुत्तमं।निषेकादिश्मशा

नांतावि घ योब्राह्मणाश्रिताः॥ तस्माद्यतेः कसंस्कारं मेव न कुरुते गृही। यतिदेहं गृ
123 हीस्पृष्ट्वा स्नानमात्रेण शुध्यति। अश्वमेधफलं सर्वं प्राप्नुवेति पदे पदे। असंस्कृतं वि
शीर्येत यत्र दशे कलेवरं। धर्मलोपो भवेत्तस्य दुर्भिक्षकमरकादिकं। उशनाः। यतोमृ
तेन वपनं नोदकं नैव च क्रिया। नाशौचं नैव शौकं च बंधूनां गोत्रिणामपि। व्रीबोत्स
र्गे वनदाहं च विप्रले स्याद्गुरो यतेः। सपिंडीकरणं नेवासनं कर्त्तव्यं सुतेन वै। एकोदिष्टं
न अर्वांत यतिनां तु कदाचन। मृते न दहनं कार्यं परमहंसस्य सर्वदा। कर्त्तव्यं खन
नं तस्य नाशौचं नोदकक्रिया। अश्वत्थे स्थापनं कार्यं तद्देशोऽथ युनामुने। अश्वत्थे
स्थापितेन स्थापितो हि महेश्वरः। दर्शनात्स्पर्शनात्तस्य सर्वं नश्यति पातकं। कुटी
चकं संप्रदहे— हूदकं जलं क्षिपेत्। हंसं चैवं तु निःक्षिप्य परमहंसं विकीरयेत्। बो

ह्वायनशौनकौ ॥ युवतीनां प्रेतसंस्कारविधिं व्याख्यास्यामः ॥ गृहस्थः शुद्धात्मा शोषित
ःस्नात्वा गंधपुष्पादिरलंकृत्य त्रिकोशरीरं आरोप्य द्योषिता जयत्रा वैकुंठभीनां रवै
रपि ॥ ग्रामात्प्राचीमुदीचीं गत्वा शुचिदेशं समाश्रयेत् ॥ नदीतीरे स्वच्छवस्त्रस्य ब्रह्मव
दवादधस्ताद्धे देवयजनं दत्वा याम प्रमाणं खात्वा लवणं प्रक्षिप्य दर्भो संस्तीर्य गायत्र्या
शरीरं प्रक्षाल्य पुरुषसूक्तेन स्नापयित्वा गंधपुष्पै रलंकृत्य विष्णोर्हव्यं रक्षस्वेति श
रीरं निदध्यात् ॥ इदं विष्णुरिति मंत्रेण दक्षिणहस्ते दंडं मल्कां निधाय हंसः शुचिष
दिति हृ—दये देशे जपेत् ॥ ब्रह्मजज्ञानमिति मूर्द्धदेशे जपेत् ॥ पुरुषसूक्तेन भ्रुवोर्म
ध्ये जपेत् ॥ भूमिर्भूम्निमगान्माता मातरमप्यगात् ॥ भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि
स भिद्यतां ॥ इति मंत्रेण मूर्द्धानमभिघाल्यानुमिति सप्तव्याहृतिभिः प्रणवे देवयजनं पू

125

रयेत्॥ अग्निनाग्निः समिध्यतइति॥ अनुमंत्रयेत्॥ नतत्र दोषसंस्कारोऽस्ति॥ अन्य
थाग्न्यादिभक्षणेऽनावृष्टिर्भवति॥ नाशौचं नोदकक्रिया॥ तस्माद्भूमिं भशंखा
त्वामदाच्छादयेत्॥ भशं॥ सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च॥ नतस्य दह
नं कार्यं नाशौचं नोदकक्रिया॥ निदध्यात्प्रणवेनैव ध्यानभिन्नं कलेवरं॥ प्रोक्ष
णं खननं चैव सर्वं तेनैव कारयेत्॥ यतीन्वहं स्पृशंश्चैव स्नानमष्टोत्तरेण शुध्यति॥ अ
श्वमेधफलं सर्वं प्राप्नुवंति पृथक्पृथक्॥ एकोद्दिष्टं जलं पिंडं नाशौचं नोदक
क्रिया॥ न अर्याम्पार्वणाद्यन्यत् ब्रह्मीभूताय भिक्षवे॥ यतेः कार्या क्रिया यस्य यते
र्ब्रह्मणि संस्थिताः॥ ब्रह्मीभूतस्य यतेर्देहायाः कथं च न॥ पुत्रोऽपरी नहस्य त्वाग्र
ह्मविदहनादिकः॥ क्रियाकलापः॥ कार्यं च॥ अतः॥ सान्निरुष्टे यतो येषां पितुरुर्ध्व

॥१२५॥

परते स्तुते गदहनंत स्यकर्त्तव्यं श्राद्धं पिंहडोदकक्रियाः। इति स्मृतेः। अश्रुनेर्दृह
नं कार्य्यपूर्वमिस्रो यथा विधेः। विदुषत्फतस्तत्कार्यं नैको द्विष्टानि कोहिचित्तापू
र्वमिस्तुकुरीचकः। बौद्धायनः। नारायणबलिं चास्य अर्वतिद्वादशेऽहनि [illegible] यो द्विस्त्री
र्महापूजापायसं चानिवेदयेत्॥ समाप्तोऽयं ग्रंथः॥ विश्वेश्वरी समाप्ता॥ शुभं
मंगलं॥ ॥श्री रस्तु॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ श्री

[illegible]

ग्रंथसंख्या १८३८

श्री

आत्मतत्वं सोधयामि स्वाहा । १

विद्यातत्वं सोधयामि स्वाहा । २

शिवतत्वं सोधयामि स्वाहा । ३

प्रकृतितत्वं सोधयामि स्वाहा । ४

पुरुषतत्वं सोधयामि स्वाहा । ५

मनस्तत्वं सोधयामि नमः । ६

बुद्धितत्वं सोधयामि नमः ।

अहंकारतत्वं सोधयामि नमः ।